GOVERNMENT OF TAMIL NADU
TRUTH ALONE TRIUMPHS

# SODASADHYAYI

## PART - II

TNSDA
10210

EDITOR :

*R. GANESAN*

GENERAL EDITOR :

*K. DAMODARAN*, M.A.,

राजकीय प्राच्यलिखितग्रन्थालयप्रसिद्धीकरण सङ्ख्या - 431
संस्कृतप्रसिद्धीकरणसङ्ख्या - 116

# षोडशाध्यायी - सटिप्पणी

## भाग: - 2

सम्पादक:
रा. गणेश:
संस्कृतपण्डित:
जि.ओ.एम्.एल्.

सामान्यसम्पादक:
के. दामोदर:
निर्देशक:
पुरावस्तुगवेषणविभाग:
चेन्नै - ११३

चेन्नै - ५

मूल्य:95 रू

1999

Govt. Oriental Manuscripts Library Publication No: 431

Sanskrit Publication No: 116

# SODASADHYAYI - WITH COMMENTARY

## Part - II

Editor

**R. GANESAN,**
Sanskrit Pandit,
Government Oriental Manuscripts Library
Chennai - 5

Gen. Editor

**K. DAMODARAN, M.A.**
Director
Dept. of Archaeology
Chennai - 113

G.O.M.L

Chennai 1999

Price: Rs.95

# சோடசாத்யாயி உரையுடன்

## பகுதி II

### நூற் சுருக்கம்

சோடச + அத்யாயீ எனப் பிரிக்கலாம். சோடசம் = 16, அத்யாயீ = அத்தியாயங்களைக் கொண்டது. கி.பி. 17 ஆம் நூற்றாண்டில் எழுதப்பட்ட உரையும், அதற்கு முன்பே எழுந்த மூலமும் கொண்டது இது. அத்வைத வேதாந்த நூல் இது. மூல நூல் சூத்திர வடிவில் அமைந்தது.

மூலநூல் என்பது பூர்வமீமாம்சை என்ற புகழ்பெற்ற மூலநூலே.

**- முனைவர் சு. சௌந்தரபாண்டியன்**
எம்.ஏ (தமிழ்), எம்.ஏ. (ஆங்), பி.எட்., பி.எச்.டி.,
காப்பாட்சியர்,
அ.கீ.சு. நூலகம்.

# PREFACE

Mimamsa Sastra is as important as the Veda itself. Without the help of this sastra study of vedas is impossible. Jaimini, in order to preserve the integrity of Vedas, laid down rules in the form of Sutras. There are many commentaries for the sutras. Sabarabhasya is the most important.

The present edition is the 'Keraliya' commentary for Sodasadhyayi. (Part II) In this second part the details of Soma yaga, the dos and don'ts during the performance, the superiority of Mantrapatha to Brahmanapatha and discussions on many Yastis and Yagas, are given.

This commentary is comprehensive and clear and will be a boon to the researches and scholars of Mimamasa sastra.

This part contains the portions starting from the 5th chapter and ending with the I Pada of 9th chapter.

**Dr. S. RAJALAKSHMI,** M.A.Phd.

Sanskrit Pandit,

G.O.M.L

Chennai-5

॥ श्रीः ॥

## ॥ अथ पञ्चमाध्यायस्य प्रथमः पादः ॥

### ॥ क्रमनिरूपणाधिकरणम्

### सू. श्रुतिलक्षणमानुपूर्व्यं तत्प्रधानत्वात्

(मू) किमनुष्ठेयपदार्थानां नास्ति क्रमनियमः क्रमनियमलक्षणं च पञ्चमं क्रमलक्षणं नारम्भणीयमिंति संशयता तत्र पदार्थक्रमनियमाभावात् नास्तिक्रमनियमः क्रम आरम्भणीयमितिप्राप्ते-

ब्रूमः। क्रमस्य वेदप्रमाणकत्वात् आरम्भ णीयमिति क्रमनियमः क्रमलक्षणं च।

सोऽयं क्रमो न विधेय उता विधेय इति संशयः तत्रक्रमस्य क्रियात्वाभावात् न विधेयविधानयोः प्राप्ते-

ब्रूमः। द्रव्यादिवत् भावार्थरूपक्रियाविशेषण क्रमस्य विधातुं शक्यत्वात् विधेयः क्रम इति।

इदमवधेयम्- एकप्रयोग वचनगृहीतानां एव क्रमचिन्तेति। सत्रभूते द्वादशाहे श्रुयते- "दीक्षितास्ते ऋत्विजस्ते यजमाना" इत्युक्त्वा श्रूयते- "अध्वर्युर्गृहपतिं दीक्षित्वा ब्रह्माणं दीक्षयति तत उद्गातारं ततो होतारं तत प्रतिप्रस्थाता दीक्षयित्वार्धिनो दीक्षयति ब्राह्मणाच्छंसिनं ब्रह्मणः प्रस्तोतारमुद्गातुः मैत्रावरुणं होतुः ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति आग्नीध्रं ब्रह्मणः प्रतिहर्तारं उद्गातुं अच्छावाकं होतुः ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति होतारं ब्रह्मणः सुब्रह्मण्यमुद्गातुः ग्रावस्तुतं होतुः ततस्तमन्यो ब्राह्मणो दीक्षयति ब्रह्मचारी वा आचार्यप्रेषित इति। इदमेव दीक्षावाक्यं पूर्वाधिकरणयोरप्युदाहरणमिति द्रष्टव्यमिति। तत्र संशयः- किमिह दीक्षा विधीयन्ते क्रमन्तु पाठाल्लभ्यते उत क्रम एव विधीयत इति।

तत्र श्रुत्या श्रुत्यर्थदीक्षाविधिसम्भवे वाक्येन वाक्यार्थ क्रमविधानस्यायुक्तत्वात् दीक्षा विधीयन्ते क्रमस्तु पाठाल्लभ्यत इति प्राप्ते-

ब्रूमः। चोदकप्राप्तानां दीक्षाणामपि विधेयत्वात् अप्राप्तः

गृहपतिदीक्षाद्युन्नेतृ दीक्षापर्यन्तदीक्षाणां पौर्वापर्योच्चारणेन प्रतीयमानक्रम एव विधीयत इति। अत्र क्त्वाततश्शब्दौ पौर्वापर्यं वदतः नत्वानन्तर्यं, तच्चार्थात् प्रतीयमानमत्र विधीयते। स च क्रमः शब्देनानभिहितोऽपि विधीयमानत्वात् श्रुतिक्रम इत्युच्यते। तस्मात् क्रमपरो वा क्रमविशिष्टपदार्थपरो वा। यत्र विधिः स श्रुतिक्रमः न तु शब्दाभिहितत्वं श्रुतिक्रमलक्षणं किन्तु विधीयमानत्वमिति पौर्वापर्योच्चारणेन प्रतीयमानत्वादेव क्रमस्य वाक्यार्थत्वमिति। "इहाश्विनो दशमो गृह्यत" इत्याद्यप्युदाहरणम्॥

॥ श्रीः ॥

## ॥ अथ पञ्चमस्य प्रथमः पादः ॥

(टि) एवं प्रवृत्तिलक्षणे वृत्तेऽधुना क्रमलक्षणमारभ्यते। प्रयोज्यगोचरः क्रमः प्रयुक्तिलक्षणतः परमेव निरूपयितुं शक्यते। न ह्यनिर्णीय प्रयोज्यं तद्गतस्य क्रमस्य विचारयितुमशक्यत्वादित्यनयोः पौर्वापर्यसङ्गतिरिति। अत्र लक्षणारम्भानारम्भविचारः फलविचारोनाधिकरणशरीरमिति। अत एव क्रमनियमः पञ्चममिति विरम्यव्यापारः। अन्यथा क्रमनियमाभावान्नारम्भणीयं क्रमलक्षणमित्येवावक्षयदिति। अवेदप्रमाणकत्वादिति। धर्मस्य वेदप्रामाण्यं चोदनासूत्रे स्थापितमेवात्रापि स्मरणार्थमुच्यत इत्यभिप्रायः।

अविस्मरणार्थत्वे ऽधिकरणस्य व्यर्थप्रायत्वमित्यस्वरसात् भाष्यकारेण वर्णकान्तरं कृतम्। तद्दर्शयति सोऽयं क्रम इत्यादिना। क्रियात्वाभावादिति। नापि विशेषणत्वेन विधानं सम्भवति, क्रमस्य सङ्घातविशेषणत्वात् सङ्घातस्य चाविधेयत्वादिति भावः। द्रव्यादिवदिति। न सङ्घातविशेषणं क्रमः तस्यैकत्वेनाक्रमभाजनत्वात् किन्तु मिलितेषु पदार्थेषु संयोगवद्वर्तत इति प्रत्येकमेव क्रमो विशेषणमित्यभिप्रायः।

एवं मन्दबुद्धीनां भ्रमनिवारणार्थमधिकरणमुक्त्वा तदपि व्यर्थप्रायमेवेत्यस्वरसात् पुनरन्यथा वर्णितं भाष्यकारेण। तद्वर्णकं दर्शयति-सत्रभूत इत्यादिना। न सर्वः क्रमोऽत्र चिन्त्यते, किन्तु श्रुतिक्रम

एव क्वचिदुदाहरणे चिन्त्यत इति। पाठाल्लभ्यत इति। न श्रुतिक्रमोऽयं किन्तु पाठक्रम इत्यभिपाय:। विधीयत इति। तस्माच्छ्रुतिक्रम इति भाव:। शब्दाभिहित एव क्रम: श्रुतिक्रम:। अत्र च क्त्वाप्रत्यय ततश्शब्दाभ्यां च क्रम उच्यत इति श्रुतिक्रम इति भ्रमं वारयन्नाह-अत्र क्त्वातत इत्यादिना। शब्दाभिहितो ऽपि क्रम: श्रुतिक्रम एवेति दर्शयन्नाह इहाश्विनो दशम इति ॥

### ॥ क्रमस्य क्वचिदार्थिकत्वाधिकरणम् ॥

### सू. अर्थाच्च ॥

(मू) "अग्निहोत्रं जुहोति" यवागूं पचतीति श्रूयते। तत्र संशय:-किं यवागुपाकहोमयो: अनियम उत पूर्वं पाक: उता होम इति नियम इति। अत्र क्रमस्याविधानात् अनियम इति प्राप्ते, ब्रूम:-होमद्रव्ययवागूत्पत्त्यर्थस्य वाक्यस्य पूर्वमकरणे श्रुतिलिङ्गावधारित होमत्वयवाग्वर्थ त्वोत्सादनप्रसङ्गात् पूर्वं पाक: ततो होम इति नियम इति। एवंविध: क्रमोऽर्थक्रम इत्युच्यते। अस्य न प्रातिस्विकविधि:, किन्तु प्रयोगविधिसङ्ग्रहमात्रमिति। इह "जातमञ्जलिना गृह्णातीत्याद्याप्युदाहरणम् ॥

(टि) एवं श्रुतिक्रममुक्त्वाधुनार्थक्रम उच्यते-अविधानादिति। विध्यो: पाक होममात्र पर्यवसानाद्विधानाभाव इति। श्रुतिलिङ्गावधारितेति। "यवागूं पचतीति द्वितीयाश्रुत्या लिङ्गेन च वाक्यस्य "यवाग्वर्थत्वं यवाग्वा जुहुयादिति तृतीयाश्रुत्या यवाग्वाग्निहोत्र होमार्थत्वमिति विवेक: किञ्चापक्त्वा होतुमशक्यत्वाच्च पूर्वं पाक इति। एवंविध इति। प्रयोजनवशाद्वा सामर्थ्याद्वा लभ्यमान इत्यर्थ:। इहेति।" जातमञ्जलिना गृह्णाति" "जातमभिप्राणितीत्यादीत्यभिप्राय:। अत्राभिप्राणनस्य लिङ्गादग्न्युद्दीपनार्थत्वात् पूर्वमनुष्ठानमिति ॥

### ॥ क्रमस्य क्वचिदनियमाधिकरणम् ॥

### सू. अनियमोऽन्यत्र ॥

(मू) दर्शपूर्णमासयोर्याजमाने काण्डे प्रयाजानुमन्त्रणमन्त्रा आम्नाता:- "वसन्तमृतुनां प्रीणामि ग्रीष्ममृतुनां प्रीणामि" इत्यादय:। शाखान्तरे च

व्यत्य येनाम्नाता: । तत्र संशय: किमेतेषां क्रतावनियम: उत नियम इति । एको ममेत्यादय:, तेषां चादृष्टार्थत्वात् समुच्चय: । तत्र प्रथमप्रयाजो नियामक प्रमाणाभावादनियम: द्वितीयादिषु संशय:-किं नियमो ऽस्ति उतानियम इति । तत्र वक्ष्यमाणप्रवृत्तिक्रमान्नियम इति प्राप्ते-

ब्रूम: । सहाचोदितानां प्रयाजानुमन्त्रणमन्त्राणां प्रवृत्तिक्रमायोगादनियम इतिं । अत्र यच्छाखाधीतेन मन्त्रेण समित्प्रयाज: प्रथममनुमन्त्रित: तच्छाखाधीतेनैव तनूनपात्प्रयाजो ऽपि प्रथममनुमन्त्रयितव्य इति हि प्रवृत्त्यावसीयते । सेयं प्रत्यासत्ति: सहचोदितानां प्रत्यासत्त्यनुग्रहाय क्रमनियन्त्रीति वक्ष्युते । न चेहानेकशाखागतानां प्रत्यासत्तिर्विहिता येन प्रवृत्ति: क्रमनियन्त्री स्यादिति । तस्मात् अनियम इति स्थितम् ॥

(टि) इदानीं प्रयाजानुमन्त्रणेषु प्रवृत्तिक्रममाशङ्क्य निराक्रियते । तत्र विषयं शोधयति तेषामित्यादिना । प्रवृत्तिक्रमाविषयत्वस्फोरणायाह-सहाचोदितानामिति । प्रवृत्तिक्रमस्वरूपप्रदर्शनपूर्वकं तदविषयत्वमेव प्रतिपादयति अत्र यच्छाखेत्यादिना ॥

### ॥ क्रमस्य क्वचित् पाठानुसारिताधिकरणम् ॥
### (पाठक्रमन्याय:)
### सू. क्रमेण वा नियम्येत क्रत्वेकत्वे तग्दुणत्वात् ॥

(मू) दर्शपूर्णमासयो: श्रूयते- "समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजतीति । तत्र संशय:-किं क्रमेण पठितानामेषां समिदादि यगानामनुष्ठाने क्रमनियमो नास्ति उत पाठक्रमेणानुष्ठानक्रमो नियम्यत इति । तत्र पाठक्रमस्यानुष्ठानक्रम विधायकत्वात् अनुष्ठाने क्रमनियमो नास्तिति प्राप्ते-

ब्रूम: । पाठक्रमस्य परम्परयानुष्ठानक्रमबोधकत्वात् पाठक्रमेणानुष्ठानक्रमो नियम्यत इति । अत्र स्वाध्यायाध्ययनविधिवशात् वाक्यपाठक्रमात् अनुष्ठानक्रमार्थं प्रयोगवचनापेक्षित पदार्थस्मरणक्रम: तत्क्रमेण चानुष्ठानक्रम इति सिद्धम् । पाठक्रमेणानुष्ठानक्रम इति पाठक्रमावगतानुष्ठानक्रमस्यापि अर्थावगतानुष्ठानक्रमवत् प्रयोगो

विधिसङ्ग्रहमात्रमिति बोध्यम्"

(टि) एवं श्रुत्यर्थक्रममुक्त्वाधुना पाठक्रम उच्यते। परम्परयानुष्ठानक्रमबोधकत्वमेव प्रतिपादयति अत्र स्वाध्यायेत्यादिना ॥

## ॥ क्रमस्य क्वचित् प्रथमप्रवृत्त्यनुसारिताधिकरणम् (प्रावृत्तिकक्रमन्यायः)

## सू. प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात्"

(मू) वाजपेये श्रूयते - "सप्तदश प्राजापत्यान् पशूनालभत इति। तत्र वैश्वदेविकत्वात् "प्राजापत्यैश्चरन्तीति वचनात् वैश्वदेव्युत्तरकाले सहेव सप्तदशापि पशवः साङ्गाः कार्या इति अवगतम्। तत्रोपाकरणनियोजनादयः सन्निपत्योपकारकाः प्रतिपश्वावर्तनीयाः। आवृत्तिश्चोपाकरणं यत्नः उपाकरणं यतः कुतश्चित् पशोरारभ्य सर्वेषां कृत्वा ततो नियोजनमित्येवंरूपा, न त्वेकस्य पशोः कात्स्र्येन कृत्वा पुनरपरस्येत्येवंरूपेति वक्ष्यति। तत्र प्रथमादारभ्य यस्मिन् कस्मिंश्चित् समापनीयमिति प्रथमपदार्थभूतोपाकरणे अनियमः द्वितीयादिपदार्थेषु नियोजनादिषु संशयः उत येन क्रमेणोपाकरणं प्राप्तं तेन क्रमेणैव नियोजनादिकमपि कर्तव्यमिति नियम इति।

तत्र श्रुत्यर्थपाठानां क्रमप्रमाणानामभवादनियम इति प्राप्ते-

ब्रूमः। प्रथमपदार्थप्रवृत्तिक्रमस्य द्वितीयपदार्थ प्रवृत्तिक्रमे प्रमाणत्वात् येन क्रमेण प्रथमपदार्थोपाकरणं प्रवृत्तं तेन क्रमेणैव द्वितीयादिपदार्थनियोजनादिकमपि कर्तव्यमिति नियम इति। सोऽयं प्रवृत्तिक्रमः प्रयोगविधिना सप्तदशानां साहित्यविधिबलादनुगतः उपाकरणादिवादार्थानां षोड शपदार्थव्यवधानात्मकं तुल्यव्यवधानं विदधता षोड शपदार्थव्यवधानस्य न्यूनातिरिक्त पदार्थव्यवधाननिरासार्थं गृह्यत इति। तथाहि-यस्यैकस्य उपाकरणं कृतं तस्यानन्तरमेव नियोजनं प्राप्तं, तच्च सह वचनात् षोडशेपाकारणक्षणव्यवहितं स... काङ्क्षति। द्वितीयस्तु प्रथमं पञ्चदशभि रूपकरणक्षणैरेकेन नियोजनक्षणेन च व्यवहितं नियोजनमाकाङ्क्षति। एवं तृतीयादयोऽपि। अन्त्यस्तु

षोडशनियोजनक्षणैर्व्यवहितं नियोजनमाकाङ्क्षति। तत्र यदि प्रवृत्तिक्रमो नाश्रीयेत तदा केषाञ्चित् न्यूनैर्व्यवधानं केषाञ्चित् अधिकैर्व्यवधानं च स्यात्। तच्च विध्यननुज्ञातत्वात् दोषाय भवतीति तद्दोषपरिहारार्थं प्रवृत्तिक्रम प्रयोगविधिना गृह्यत इति आश्रयितव्य मिति। तस्मान्नियोजनादिषु प्रवृत्त्या नियम इति॥

(टि) इदानीं प्रवृत्तिक्रम उच्यते। तत्र विषयं शोधयति तत्र वैश्वदेवीत्यारभ्य संशय इत्यन्तेन। नन्वयं क्रमः केन विधीयत इत्यत्राह- सोऽयमित्यादिना। सोऽयं प्रवृत्तिक्रमः प्रयोगविधिना गृह्यत इति सम्बन्धः। अर्थपाठक्रमवत् प्रवृत्तिक्रमस्यापि प्रयोगवचनसङ्ग्रहमात्रं न प्रातिस्विमं विधिरिति भावः। उक्तमेवार्थं विवृणोति तथाहीत्यादिना॥

॥ क्रमस्य क्वचित् स्थानानुसारिताधिकरणम्॥

सू. स्थानाच्चोत्पत्तिसंयोगात्॥

(मू) साद्यस्कनामा कश्चित् सोमयागः। तत्राग्नीषोमीयसवनीयानुबन्ध्यानां पशूनां क्रमेण विहितानां सहालम्भःश्रूयते "सह पशूनालभत" इति। स च सहोपालम्भः सवनीयस्थान इति स्थितम्। तत्र संशयः किमुपाकरणानां क्रमस्यानियमः किमुताग्निषोमीयस्य प्रथममुपाकरणं अथवा सवनीयस्येति। तत्र श्रुत्यर्थपाठप्रवृत्तीनामभावात् अनियम इति चेदुच्यते। प्रकृतौ अग्नीषोमीयोपाकरणस्य पाठावगतप्रथमानुष्ठानदर्शनादिहापि अग्नीषोमीयस्य प्रथममुपाकरणमिति प्राप्ते-

आश्विनग्रहेहानन्तर्यरूपसवनीयस्थानात् सवनीयस्य प्रथममुपाकरणमिति सहवचनेनाबाधितस्य सवनीयस्थानस्य बाधा मा भूदिति तत्स्थानं क्रमनियामकत्वेनाश्रीयते। सोऽयं स्थानक्रमः। स एव काण्डक्रम इत्युच्यते। सोऽपि प्रयोगविधिना क्लृप्तानन्तर्याबाधनार्थं गृह्यत इति। तत्राग्नीषोमीयानुबन्धयोः संशयः-किं वाऽनयोः क्रमनियमोऽस्ति किं वा नेति तत्र नियामकाभावादनियम इति प्राप्ते-

ब्रूमः। अनूबन्ध्योपकरणात् पूर्वं अग्निषोमीयस्योपाकरणमिति नियमः

प्रकृतौ तथा दृष्टत्वादिति।

अथवा इदं नाधिकरणान्तरम्। "एकविंशेनातिरात्रेण प्रजाकामं याजयेत् त्रिणवेनौजस्कामं त्रयस्त्रिंशेन प्रतिष्ठाकाममित्यादि श्रूयते। तत्र दाशतीभ्य ऋचः आगमय्य सङ्ख्यापूरणं वक्ष्यते। तत्र प्रथमं मन्त्रग्रहणे अनियमः द्वितीयादिष्वपि पाठक्रमेणपि नियमस्सिद्ध इति नासाधारणमिदं स्थानोदाहरणमिति स्थितम्॥

(टि) इदानीं स्थानक्रमोऽभिधीयते-क्लृप्तानन्तर्याबाधार्थमिति। आश्विनग्रहसवनीयोपाकरणयोः प्रकृतावानन्तर्यं क्लृप्तं तन्मा बाधीत्यस्य ग्रहणमित्यर्थः। इदानीमग्नीषोमीयानुबन्ध्ययोः क्रमनियमोऽस्ति नेति चिन्त्यते। भाष्यादावधिकरणत्वेनायं विचारो न दृष्ट इत्यभिप्रेत्याह- अथवेति। नासाधारणमिति। किन्तु सह पशूनित्येतदेवासाधारण मुदाहृतमिति स्थितं भाष्ये इत्यर्थः॥

## ॥ अङ्गक्रमस्य मुख्यक्रमानुसारिताधिकरणम्॥
## सू. मुख्यक्रमेण वाङ्गानां तदर्थत्वात्॥

(मू) काम्येष्टिकाण्डे "चित्रया यजेत पशुकाम" इति प्रकृत्य चित्रायागे सप्त हवींष्याम्नाति "प्रैवाग्रेयेन वापयति रेतः सौम्येन दधाति त्वष्टा रूपाणि विकरोति सारस्वतौ भवतः सिनीवाल्यै चरूर्भवति ऐन्द्र उत्तमो भवती"ति।

तत्र चतुर्थपञ्चमे सारस्वतौ भवत इत्याम्नाते "एतद्वै दैव्यं मिथुनमि"ति वाक्यशेषात् स्त्रीपुंसदैवत्ये विज्ञायेते। तत्र समाख्याक्रमलिङ्गैर्याज्यानुवाक्यायुगलद्वयं प्राप्तम्। तत्र लिङ्गात् "प्रणो देवी"ति प्रथमयुगलस्त्रीदेवतायाः "पीपिवांसमि"ति पुंदेवतायाः। तत्र याज्यानुवाक्यापाठक्रमात् स्त्रीदेवत्यस्य मुख्यं प्रदानं प्रथममनुष्ठेयम्। तत्र पुंदेवत्येत्यपि प्राप्तम्। तत्र चोदकेनाङ्गानि प्राप्तानि। तत्र सन्निपत्योपकारीणि निर्वापादीनि प्रत्येकं कर्तव्यानि। तेषु द्वितीयादिषु प्रवृत्या नियमः प्रथमपदार्थे निर्वापे संशयः किं स्त्रीदेवत्यस्य वा पुंदेवत्यस्य वा प्रथमं निर्वापः कर्तव्य इति अनियमः उत स्त्रीदेवत्यस्य प्रथमं निर्वापः ततः

पुंदेवत्येति नियम इति। तत्र श्रुत्यर्थपाठप्रवृत्तिकाण्डान्। क्रमनियामप्रमाणानामभावात् अनियम इति प्राप्ते-

ब्रूमः। मुख्यप्रदानानुष्ठानक्रमात् स्त्रीदेवत्यस्य प्रथमं निर्वापः ततः पुंदेवत्येति नियम इति। सोऽयं मुख्यक्रमः प्रयोगविधिना सह वचन सामाष्ट्यात् अनुज्ञातं निर्वापादिपदार्थानां एकपदार्थव्यवधानात्मकं तुल्यव्यव धानं विदधाति। आनन्तर्यस्य द्वादिपदार्थ व्यवधानस्य निरासार्थं गृह्यत इति। तथाहि-

पुंदेवत्यादारभ्य प्रवृत्तिक्रमेणानुष्ठीयमानेषु निर्वापादिषु स्त्रीदेवत्यस्याप्रदानात् पूर्वभावी यः पदार्थः तस्य स्त्रीदेवत्यप्रदानस्य नैरन्तर्यं स्यात्। पुंदेवत्यस्य प्रदानस्य तत्पूर्वभाविपदार्थस्य च द्वाभ्यां व्यवधानं च स्यात्। तद्द्वयमपि मा भूदिति प्रयोगविधिना मुख्यानुष्ठानक्रमेणाङ्गानुष्ठानक्रमोऽपि गृह्यत इति। तदेवं श्रुत्यर्थपाठप्रवृत्ति काण्डमुख्यानि षट् क्रमनियमप्रमाणानीति स्थितम्। तत्र श्रुत्यर्थपाठक्रमा उपदेशविषया एव। प्रवृत्तिकाण्डमुख्यक्रमास्त्वतिदेशविषया अपीति बोध्यम्। अत्र मुख्यक्रमे अप्रधानप्रत्यासत्तिरङ्गानां नियमकारणं, प्रवृत्तिक्रमे त्वङ्गानां मिथः प्रत्यासत्तिरिति विशेषः। उत्तरपदार्थप्रवृत्तिक्रमेण पूर्वपदार्थप्रवृत्तिक्रमनियमोपि सिध्यत इति सारस्वतोदाहरणं प्रवृत्ति मुख्यक्रमसङ्कीर्णं, मुख्यक्रमस्यासङ्कीर्णोदाहरणं तु प्रयाज शेषाभिधारणं इति बोध्यम्॥

(टि) इदानीं मुख्यक्रमोऽभिधीयते। तत्र विषयं शोधयति-तत्र चतुर्थेत्यारभ्य निर्वाप इत्यन्तेन। मुख्यक्रमस्यापि प्रयोगविधिसङ्ग्रहमात्रमित्याह-सोऽयमित्यादिना। सुखग्रहणार्थमाह-तदेवमिति। प्रयाजशेषाभिघारणमिति। दर्शे दध्नः पूर्वं धर्माःप्रवर्तन्ते

शाखाहरणादयः तत आग्नेयस्य निर्वापादयः। याज्यानुवाक्यापाठक्रमवशादाग्नेयस्य मुख्यं प्रदानं प्रथमं प्रवर्तते, पश्चाद्दध्नः। तत्र भूतभाविप्रवृत्तिद्वयवशात् प्रयाजशेषाभिघारणे ऽनियमः। मुख्यक्रमात्त्वाग्नेयस्य प्रथममभिधारणं ततो दध्न इति।

## ॥ अङ्गेषु मुख्यक्रमापेक्षया पाठस्य बलवत्त्वाधिकरणम्

## सू. प्रकृतौ तु स्वशब्दाद्यथाक्रमं प्रतीयेत ॥

(मू) दर्शपूर्णमासयोराग्नेयानन्तरमाग्नेयहविरूपांशुयाज आम्नातः, ततोऽग्नीषोमीयः पुरोडाशहविः तथा पूर्वमौषधधर्माः निर्वापावधातातदः समाम्नाताः तत उत्पवनचतुर्ग्रहणादयः आज्यधर्माः। तत्र पाठक्रमेण मुख्ययोः उपांशुयाजाग्निषोमयोः मध्ये उपांशुयाजस्य प्रथममनुष्ठानमिति स्थितम्। तत्र चतुर्ग्रहणरूपाज्यनिर्वाप उदाहरणम्। तत्र संशयः- किमाज्यनिर्वापः मुख्यक्रमादग्नीषोमीयनिर्वापात् पूर्वं कर्तव्य उत पाठक्रमात् अग्नीषोमीयहविर्निर्वापात् पश्चादिति।

तत्र प्रधानप्रत्यासत्त्यनुग्रहसम्भवात् मुख्यक्रमात् प्रथममाज्यनिर्वाप इति प्राप्ते-

ब्रूमः। क्रमप्रमाणान्तर सापेक्ष मुख्यक्रमापेक्षया क्रमप्रमाणान्तरानपेक्षस्य पाठक्रमस्य बलीयस्त्वात् पाठक्रमात् मुख्यक्रमं बाधित्वा पाठक्रमस्य प्रत्यक्षत्वात् बलीयस्त्वं बोध्यम् ॥

(टि) एवं षट्स्वपि क्रमप्रमाणेषूक्तेषु तेषां बलाबलमधुना चिन्त्यते। तत्र प्रथमं मुख्यपाठक्रमयोः बलाबलं चिन्त्यते। यद्यपि श्रुत्यर्थ पाठस्थानमुख्यप्रवृत्तीनां मिथो विरोधे परदौर्बल्यमिति श्रुत्यर्थक्रमबलाबलं प्रथमं चिन्त्यं श्रुतिलिङ्गादिवत्तथापि पूर्वाधिकरणापवादरूपेण सिध्दान्तमभिधातुं प्रथमं मुख्य पाठयोर्बलाबलचिन्तेति क्रमप्रमाणान्तरेति। इदं दुर्बलत्वे हेतुः। विलाम्बितप्रतिपत्तिरेवात्रापि दौर्बल्यहेतुः। शीघ्रप्रतिपत्तिश्च प्राबल्य इति मुख्यक्रमो हि मुख्ययोः केनापि क्रमप्रमाणेन क्रममवधार्य तदपेक्षया साहित्यसम्पत्त्यर्थमङ्गेषु कल्प्यमानो विलम्बते। पाठक्रमस्त्वन्यानपेक्षत्वात् शीघ्रमवगम्यत इति बलीयानित्यभिप्रायः ॥

## ॥ ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वाधिकरणम् ॥

## सू. मन्त्रतरस्तु विरोधे स्यात् प्रयोगरूप सामर्थ्यात् तस्मादुत्पत्तिदेशः सः ॥

(मू) दर्शपूर्णमासयोराग्नेयस्य पूर्वोऽ"ग्निर्मूर्धा अग्नये जुष्टं अग्नेरहमि"त्यादि मन्त्रपाठः, उत्तरो "यदाग्नेयो ऽमावास्यायामिति ताभ्यामेनमग्नीषोमीयमेकादशकपालमिति ब्राह्मणपाठः। अग्नीषोमीयस्य तु पूर्वो गणपाठ उत्तरो मन्त्रपाठः। तत्र संशयः-किं ब्राह्मणपाठक्रमेण अग्नीषोमीयस्य पूर्वमनुष्ठानमुत मन्त्रपाठक्रमेण आग्नेयस्येति। तत्र मन्त्रब्राह्मणपाठयोरुभयोः प्रत्यक्षत्वाविशेषादनियम इति चेदुच्यते। उत्पत्तिदशायामवगतस्य विधिक्रमस्य बलवत्त्वात् ब्राह्मणपाठक्रमेण अग्निषोमीयस्य पूर्वमनुष्ठानमिति। एवं प्राप्ते-ब्रूमः। स्मरणपूर्वकानुष्ठानक्रमे स्मरणैककार्यमन्त्रपाठक्रमस्य बलवत्वान्मन्त्रपाठक्रमेण ब्राह्मणपाठक्रमं बाधित्वा आग्नेयस्य प्रथममनुष्ठानमिति। तदेवं मन्त्रपाठक्रमाभावे ब्राह्मणपाठक्रमस्य प्रामाण्यमिति स्थितम्॥

(टि) इदानीं पाठयोरेव मन्त्रब्राह्मणगतयोर्बलाबलं चिन्त्यते। नहि प्रत्यक्षस्य प्रत्यक्षत्वेनान्य प्रमाणात् प्राबल्यं, किन्तु प्रथमोपस्थापकत्वेन। तच्च ब्राह्मण क्रमस्येत्याशयेनाह-उत्पत्तिदशायामिति। स्मरण पूर्वकेति। अयमाशयः न विधानक्रमेणानुष्ठानं, किन्तु स्मरणक्रमेण। स्मरणं च स्मारकमन्त्रक्रमेण प्रथममुपजायते न विधायकब्राह्मणक्रमेणेति। तथाहि प्रथमं तावद्दर्शपूर्णमासिकं पदार्थजातमधुनानुष्ठातव्यमिति स्वकाले आगते स्मर्यते। तदनन्तरं चानुष्ठानवेलायां पदार्थविशेषस्मरणार्थं तद्विधायकं वाक्यमालोचयति। तत आलोचितेन तेन वाक्येन पदार्थविशेषं मारयति। ततः सोऽनुषीठयते। अनुष्ठितश्च स न झटिति द्वितीयं पदार्थं स्मारयति। पदार्थानां ग्रन्थामनपेक्ष्य स्वतः पौर्वापर्याभावात् किन्त्वनुष्ठानोत्तरकालम्। अनुष्ठितमेव पदार्थमालोचयति समिद्यागः कुत इति। स चालोच्यमानः समिद्यागः स्वविधायकं "समिधो यजतीति वाक्यं स्मारयति। तच्च वाक्यं स्मृतं स्वस्मादुत्तरं "तनूनपातं यजतीति वाक्यं स्मारयति। तच्च स्वार्थमिति मन्दमेव स्मारयति मन्त्रः पुनरन्तः क्रतु प्रयुज्यमानः समाप्यमान उत्तरं मन्त्रं पर्युपस्थापयति। स चोत्तरो मन्त्रः पर्युपस्थाप्यमान उत्तरं पदार्थं पर्युपस्थापयन्नेव पर्युपतिष्ठत इति झटित्येव स मन्त्रक्रमो द्वितीयपदार्थं

स्मारयतीति बलवानिति। किञ्चानुष्ठानवेलायां क्रमेण मन्त्रपाठ इत्यतोऽप्यस्य बलवत्वमित्याह-स्मरणैककार्येति। ननु तर्हि ब्राह्मणपाठक्रमोऽप्रमाणमेवेत्याशङ्क्य ने त्याह-मन्त्रपाठाभाव इति॥

**॥ प्रयोगवचनाच्चोदकस्य बलवत्वाधिकरणम्॥**

**सू. तद्वचनाद्विकृतौ यथाप्रधानं स्यात्॥**

(मू) अपरकल्पाख्यायामिष्टौ हविस्त्रयं श्रूयते-"आग्ना वैष्णवमेकादशकपालं निर्वपेदभिचरन् सरस्वत्याज्यभागा स्यात् बार्हस्पत्यश्चरूरिति। तत्र प्रथमोऽग्निषोमीयविकार:, द्वितीय उपंशुयाजविकार: तृतीयोऽग्नेयविकार इति। तत्राग्नावैष्णवधर्माणां प्राथम्यं असन्दिग्धं चोदकप्राप्तपाठक्रमस्य प्रयोगविधिचोदिताङ्ग-प्रधानप्रत्यासत्त्यनुग्राहकमुख्यक्रमस्य च मिथो विरोधाभावात्। इतरयोस्तु संशय:-किमाग्नेयविकारस्य बार्हस्पत्यस्य धर्मा: पूर्वं कार्यप्रयोगवचनात् चोदकस्य बलीयस्त्वेन चोदकप्रापाठक्रमात् किं वा उपांशुयाजविकारस्य सारस्वताज्यस्य धर्मा: पूर्वं कार्या: चोदकात् प्रयोगवचनस्य बलवत्वेन प्रयोगवचनाङ्गचोदितप्रधान प्रत्यासत्त्यनुग्राहक मुख्यक्रमादिति। तत्रौपदेशिक प्रत्यक्षप्रधान पाठक्रमप्राप्तमुख्य क्रमग्राह्यत्वात् प्रयोगवचनस्य बलवत्वेन मुख्यक्रमाज्यस्य धर्मा: पूर्वं कार्या इति प्राप्ते-

ब्रूम:। पूर्वप्रवृत्तत्वाच्चोदकस्य पश्चात्प्रवर्तमान प्रयोगवचनात् बलीयस्त्वेन पाठक्रमान्मुख्यक्रमं बाधित्वा बार्हस्पत्यस्य चोदकप्राप्तौ षट् धर्मा: पूर्वं कार्या इति।

इदन्त्ववधेयम्-चोदकेन प्राप्यमाणा: पदार्था: सक्रमका एव प्राप्यन्ते। अतो निरपेक्षत्वात् प्रत्यक्षस्यापि दुर्बलत्वम्। ततश्च मुख्यप्रवृत्तिक्रमौ दुर्बलप्रयोगवचनाश्रितत्वात् दुर्बलौ। श्रुत्यर्थपाठकाण्डक्रमाश्च बलवच्चोदकाश्रितत्वात् बलवन्त:। श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिक्रमाणां षण्णामपि पूर्वबलीयस्त्वमिति॥

(टि) इदानीं विकृतिषु मुख्यपाठक्रमयोर्बलाबलं चिन्त्यते। अत्रापि

विषयशोधनं क्रियते तत्रेत्यादिना। प्रथम आग्नावैष्णवो द्विदेवत्यत्वादौषधद्रव्यत्वाच्चाग्नीषोमीयविकार:। द्वितीय: सारस्वत आज्यहविष्ट्वादुपांशुयाजविकार:। तृतीयस्तु बार्हस्पत्य: एकदेवताकत्वादौषधद्रव्यकत्वाच्चाग्नेयविकार इत्यर्थ:। उक्तवक्ष्यमाणक्रमप्रबलदुर्बलत्वे सुखग्रहणाय दर्शयति ततश्चेत्यादिना॥

## ॥ विकृतौ क्वचित् प्रकृतिधर्मानतिदेशाधिकरणम्॥
## (साकेमेधीयन्याय:)

### सू. विकृति: प्रकृतिधर्मत्वात्तत्काला स्याद्यथाशिष्टम्॥

(मू) चातुर्मास्येषु साकमेधो नाम तृतीयं पर्व। तत्र श्रूयते-"अग्नये ऽनीकवते प्रातरष्टाकपालं निर्वपेत् मरुद्भ्यस्सान्तपनेभ्यो मध्यन्दिने चरुं मरुद्भ्यो गृहमेधिभ्य: सर्वासां दुग्धे सायमोदनमिति। तत्र प्रकृतौ पर्वण्यन्वाधानादिकं प्रतिपदीष्टिरिति व्यहकपालत्वम्। तच्चेह चोदकेन प्राप्नोति। प्रातरादिकालश्चोपदिष्ट:। तत्र संशय:-किमेता इष्टय: औपदेशिकातिदेशिकयोरविरोधात् व्यहकाला उत विरोधात् उपदेशात् सद्यस्काला इति। तत्र द्वयोरपि प्रातरादिकालसम्भवात् औपदेशिकस्य प्रातरादिकालस्य आतिदेशिकस्य व्यहकालत्वस्य चाविरोधात् व्यहकालात् पूर्वेद्यु: प्रातरादिकालेषूपक्रम्य परेद्यु: प्रातरादिकालेषु समापनीया इति प्राप्ते-

ब्रूम:। प्रातरादिशब्दैरेकाहगत प्रातरादिकालेषु प्रसिद्धत्वादौपदेशिकाति देशिकयोर्विरोधात् उपदेशात् सद्यस्काला इति। अहर्द्वयेऽपि प्रातरादिकालसम्भवान्नातिदेशिकविरोध इति शङ्कानिरासार्थमिदमधिकरणमिति॥

(टि) इदानीं साद्यस्कालत्वं व्यहकालत्वं च क्रमविशेषैपयिकत्वाच्चिन्त्यते। ननु "य इष्टथा पशुनेति वचनेन सर्वविकृतीनां सद्यस्कालत्वं वयति तेनास्य पौनरूक्तयं स्यादित्याशङ्क्याह अहर्व्दयेऽपीत्यादिना। सूर्याचन्द्रमसो:

सहवासकालोह्यमावास्या। यस्मिन् काले चन्द्रः पूर्णो भवति स कालश्च पौर्णमासी। तयोश्च द्वयोरह्नोरसम्भवाद्युक्तो वाचनिकेन सद्यस्कालेनातिदेशिकस्य व्यहकालस्य बाधः, इह त्वविरोधान्न तथेति पूर्वपक्षाभिप्रायः। प्रसिद्धिवशाद्धि तत्र विरोधः। स चेहापि तुल्य इति सिद्धान्ताभिप्रायः॥

## ॥ अनुयाजाद्युत्कर्ष प्रयाजान्तापकर्षाधिकरणम्॥
## (तदादितदन्तन्यायः)

**सू. अङ्गानां मुख्यकालत्वात् यथोक्तमुत्कर्षे स्यात्॥**

(मू) ज्योतिष्टोमे सवनीयपशौ "आग्निमारुतादूर्ध्वं अनुयाजैश्चरन्तीति श्रूयते। तथाग्नीषोमीये पशौ तिष्ठन्तं पशुं प्रयजतीति। तत्र सवनीयपशौ प्रकृतितश्चोदकेन सूक्तवाकपूर्वकाले प्राप्तानामनूयाजानामाग्निमारुतादूर्ध्वमुत्कर्षः अग्नीषोमीये पशौ च हविरासादनोत्तरकाले प्राप्तानां प्रयाजानां जीवत्येव पशावपकर्षश्च विधीयते। तत्र संशयः, किमुत्कृष्टे अनूयाजमात्रमुत्कृष्यते अपकर्षे च प्रयाजमात्रमपकृष्यते उत उत्कर्षे अनूयाजादि अपकर्षे च प्रयाजान्तमिति। तत्रानूयाजमात्रोत्कर्षस्य प्रयाजमात्रापकर्षस्य च श्रवणादनूयाज मात्रमुत्कृष्यते प्रयाजमात्रं चापकृष्यत इति प्राप्ते।

ब्रूमः। अनूयाजाद्युत्कृष्यते प्रयाजान्तं चापकृष्यते। अन्यथा सूक्तवाकादीनामनूयाजोत्तरकालत्वरूपक्रमस्याघारस्य प्रयाजपूर्वकालत्वरूपक्रमस्य च बाधप्रसङ्गदिति॥

(टि) तदादितदन्तयथोक्तोत्कर्षचिन्तापि क्रमोपयोग्येवेति इदानीं क्रियते। श्रवणादिति। तदन्तापकर्षस्तदाद्युत्कर्षश्च निष्प्रमाणक इति भावः। क्रमस्यैवात्र प्रमाणत्वान्न निष्प्रमाणकत्वमित्याशयेनाह- अन्यथेति। भिन्नकर्तृकेति। भिन्नकर्तृकत्वान्न निर्वापस्य प्रोक्षणप्रत्यायकत्वं निर्वापेण व्यवहितत्वाच्च न पाठस्य प्रचरणीप्रत्यायकत्वमित्यर्थः॥

॥ प्रवृत्त्या प्रोक्षणादीनां सौमिकपूर्वभाविताधिकरणम्
सू. प्रवृत्त्या कृतकालानाम् ॥

(मू) ज्योतिष्टोमे श्रूयते "प्रातरनुवाककाले प्रतिप्रस्थातः सवनीयान्निर्वपस्वेति प्रेष्यन्तीति, तथा बहिष्पवमाने स्तुते आहाग्नी दग्नीन् विहर बर्हिस्तृणाहि पुरोडाशानलङ्कुर्विति। अत्रायं विवेकः होत्रे प्रातरनुवाकप्रैषदानानन्तरं प्रतिप्रस्थात्रे निर्वापप्रैषदानं पठतं, ततः सवनीयादयः, ततो बहिष्पव मानस्तोत्रं, ततोऽग्नीधेऽग्निविहरणादि प्रैषदानं, तत्र निर्वापप्रदानानन्तरं वचनादध्वर्योः प्रातरनुवाकोपासनं प्राप्तम्, उपासनस्य पाक्षिकत्वात् अभावपक्षे निर्वापप्रैषानन्तरं अध्वर्युणा किं प्रचरणीहोमादयः सौमिकाः पदार्थाः कर्तव्या उतानियमोऽथवा निर्वापालङ्कारमध्यवर्तिनः प्रोक्षणादयः पौरोडाशिका इति संशयः। तत्र पाठात् सौमिकादय इति चेदुच्यते। भिन्नकर्तृकनिर्वापे व्यवहितत्वादनियम इत्येवं प्राप्ते-

ब्रूमः। निर्वापप्रवर्तनात्मकप्रवृत्तेः पोक्षणादयः पौरोडाशिकाः कर्तव्या इति॥

इदं त्ववधेयम्-यत्पदार्थानुष्ठानानन्तरं यस्य पदार्थस्योपस्थितिः तत्पदार्थानुष्ठानानन्तरं तस्य पदार्थस्यानुष्ठानं, उपस्थितिश्चानुष्ठानकाले स्मरणं, उपस्थापकानि श्रुत्यादीनि च क्रमप्रमाणान्युच्यन्ते। तेषु च येन शीघ्रोपस्थितिः तत् बलवत् येन विलम्बितोपस्थितिः तत् दुर्बलम्। यत्र कुत्रापि पदार्थे प्रवृतं मनश्शब्दादन्यत्र प्रवर्तत इति श्रुत्या बलीयस्त्वम्। तत्र प्रतिप्रस्थातृकर्तृकत्वात् निर्वापस्याध्वर्योः प्रोक्षणानुपस्थापकत्वात् निर्वापव्यवहितत्वाच्च पाठस्य प्रचरण्याद्यनुपस्थापकत्वात् नियामकाभावात् अत्रानियमशङ्केति॥

(टि) इदानीं प्रमाणानां दुर्बलप्रबलत्वबीजं दर्शयति इदं त्वित्यादिना। तत्र श्रुतेर्बलीयस्त्वे हेतुमाह यत्र कुत्रेति। इदानीं भिन्नकर्तृकनिर्वापव्यवहहितत्वादित्यस्यार्थमाह-तत्र प्रतिप्रस्थातृक-

तृकत्वादित्यादिना। निर्वापव्यवहितत्वादिति। इदं शास्त्रदीपिकानुरोधेनोक्तम्। वार्तिके तु प्रैषेणाव्यवधानादिति स्थितम्।

इदं त्ववधेयम्। अत्र भाष्ये सौमिकाः कर्तव्या उत पौरोडाशिका इत्येव संशयो दर्शितः। न त्वनियमकोटिरूपन्यस्ता। पूर्वपक्षस्त्वनियम इत्युक्तम्। वार्तिकशास्त्रदीपिकादावत्येवमेव स्थितम्। तत्र संशयपूर्व पक्षोभय पर्यलोचनायां पक्षत्रयं सिद्ध मिति तथोक्तमिति ॥

## ॥ वैकृतयूपकर्ममात्रापकर्षाधिकरणम् ॥

## ( यूपकर्मन्यायः)

**सू. असंयोगात्तु वैकृतं तदेव प्रतिकृष्येत ॥**

(मू) ज्योतिष्टोमे अग्नीषोमीयप्रणयनात् परतो यूपच्छेदनं पशवङ्गमाम्नातम्। तस्य "दीक्षासु यूपं छिनत्तीत्यनेन दीक्षाकाले अपकर्षो विधीयते। तत्र संशयः किमेतच्छेदनमपकृष्यमाणं अग्निषोम प्रणयनादीनप्यपकर्षति उत नेति। तत्र यथा प्रयाजा आघारादीनपकर्षन्ति तथात्रापि क्रमबाधप्रसङ्गात् छेदनमग्नीषेमप्रणयनादीनपकर्षतीति प्राप्ते-

ब्रूमः। पाशुकस्य छेदनस्य सौमिकानामग्नीषोमप्रणयनादीनां च भिन्नप्रयोगवचनगृहीतत्वात् न पाशुकं छेदनं सौमिकाग्नीषोमप्रणयनादीन पकर्षतीति एकप्रयोगवचनान्तर्गतानामेव मिथः क्रमो न प्रयोगविध्यन्तर्गतानां, तस्मान्नात्र क्रम बाधोऽपि दोष इति श्रुतमात्रापकर्षः भिन्नप्रयोग गृहीतत्वादेव च पाठक्रमोऽप्यत्र नाङ्गमिति बोध्यम्॥

(टि) इदानीं तदन्तापकर्षस्यापवादः क्रियते-क्रमबाधोऽपीति। इदं च पूर्वपक्षाभिप्रायेण। सिद्धान्ते तु भिन्नप्रयोगवचनगृहीतत्वात् पाठस्यानङ्गत्वेन क्रमकल्पकत्वाभावान्नास्ति क्रम इति॥

## ॥ दक्षिणाग्निक होमानामपकर्षाधिकरणम्॥

**सू. प्रासङ्गिकं नोत्कर्षेदसंयोगात्॥**

(मू) ज्योतिष्टोमे श्रुयते "आग्निमारूतादूर्ध्वं अनूयाजैश्चरन्तीति।

अनेन च सवनीयपशुतन्त्रानूयाजोत्कर्षः क्रियते। तदुत्कर्षे च सूक्तवाकाद्युत्कर्ष उक्तिः। प्रकृतौ चानुयाजोत्तरकालौ दाक्षिणाग्निकौ पिष्टलेपफलीकरणहोमौ पौरोडाशिकौ तावप्यत्र सवनीयपुरोडाशे चोदकप्राप्तौ सवनीयपशुतन्त्रं च सवनीयपुरोडाशे प्रसज्यते। तस्मात् पशोः पुरोडाशस्य च यत् साधारणमङ्गं तत् कर्तव्यं दाक्षिणाग्निकौ तु पशावस त्वात् पुरोडाशार्थे कर्तव्यौ। एवं स्थिते संशयः किं दाक्षिणाग्निकौ पौरोडाशिकौ पाशुकैरनूयाजैः उत्कृष्यमाणैरुत्कृष्येते अथवा नेति। तत्र दाक्षिणाग्निकावप्युत्कृष्येते अन्यथा अनुयाजोत्तरकालरूप क्रमबाधप्रसङ्गादिति प्राप्ते ब्रूमः। भिन्नप्रयोगवचनगृहीतत्वात्तौ नोत्कृष्येते इति। अत्र पाशुकानामनूयाजानां पुरोडाशे प्रसज्यमानत्वात् पौरोडाशिकत्वेन तेषां होमयोश्च क्रमोऽङ्गम्। ततश्चानुत्कृष्यमाणयोः होमयोः क्रम लोपः स्यादिति शङ्का। अत्र पाशुकाएवानूयाजाः क्रियन्ते तत्प्रसङ्गेनैव पुरोडाशोपकारसम्भवात् न पौरोडाशिकाः अनूयाजाः क्रियन्ते। तथा च कुतः लोप इत्युत्तरमिति ध्येयम्॥

प्रासङ्गिकोत्कर्षे न तदाद्युत्कर्ष तार्थतामाशङ्क्याह-अत्र पाशु

कानामित्यादिना। पाशुका एवेति। नहि पाशुकस्य पुराडाशोपकारकत्वेन पौरोडाशिकत्वम्। कुतः? यतो नोपकारकत्वमङ्गत्वं किन्तु तादर्थ्यमिति।

नहि यद्यस्योपकरोति तत्तस्याङ्गं। किन्तु यदर्थं यदनुष्ठीयते तत्तस्याङ्गम्। न ह्यन्यार्थमनुष्ठीय-मानं प्रसङ्गादन्यस्याप्युपकरोतीति तस्याप्यङ्गं भवति। यथा राजार्थमनुष्ठितः प्रदीपः प्रसङ्गादमात्यस्याप्युपकरोतीति न तदङ्गं भवति तथेति भावः॥

### ॥ पुरोडाशाभिवासनान्तरस्य दर्शेऽनपकर्षाधिकरणम्॥

### सू. तथाऽपूर्वम्॥

(मू) दर्शपूर्णमासयोः "भस्मनाभिवासयतीति" कपालेषु श्रपयितस्य पुरोडाशस्य भस्मनाच्छादनमाम्नातम्। तदेवाहाभिवासनमुच्यते। तदुत्तरकाला चापदिराम्नाता। सामावास्यायां पूर्वेद्युरपकृष्यते

"पूर्वेद्युरमावास्यायां वेदिं करोती"ति। तत्र संशयः किं वेदिरपकृष्यमाणा हविरभिवसनान्तान् स्वपूर्वभाविपदार्थानप्यपकर्षति वा न वेति। तत्रापकर्षति अन्यथा वेद्याः क्रमलोपप्रयुक्तवैगुण्यप्रसङ्गादिति प्राप्ते-

ब्रूमः। अमावास्यावेदेः हविरभिवासनोत्तर कालतारूपक्रमावगमकल्पनात् पूर्वमेव अपकर्षान्न वेदिः पूर्वपदार्थापकर्षतीति। अत्र एकप्रयोगवचनगृहीतत्वेनापकर्षः स्यादिति शङ्का तन्निरासार्थमिदमधिकरणम्। उत्कर्षापकर्षवचने च क्रमविधायके। ततश्च श्रौतक्रमात् पाठक्रमं बाधित्वा अमावास्यायां वेदेरन्य एव क्रमः। न तु हविरभिवासनोत्तरात्मकः पाठक्रमः। स तु पौर्णमास्यामेवेति स्थितम्॥

(टि) इदानीं तदन्तोत्कर्षमपवदति। तत्र क्रमकल्पनात् पूर्वमपकर्ष इत्युक्तम्। तदेव विवृणोति उत्कर्षापकर्षेत्यादिना। श्रौतक्रमात् पाठक्रममिति। इदं च प्रदर्शनमात्रम्। त्रिविधं चात्र पूर्वदिनस्यबलवत्त्वम्। तथाहि-पूर्वदिनानुष्ठानस्य श्रुतिः प्रमाणम् विशेषरूपेण प्राप्तिः। वाक्यं च विनियोजकम्। हविरभिवासनोत्तरकालतायां पाठः प्रमाणम्। सामान्यरूपेण च प्राप्तिः। प्रकरणं च विनियोजकमिति। तस्मात् त्रिविधादपि

कानामित्यादिना। पाशुका एवेति। नहि पाशुकस्य पुराडाशोपकारकत्वेन पौरोडाशिकत्वम्। कुतः? यतो नोपकारकत्वमङ्गत्वं किन्तु तादर्थ्यमिति।

नहि यद्यस्योपकरोति तत्तस्याङ्गं। किन्तु यदर्थं यदनुष्ठीयते तत्तस्याङ्गम्। न ह्यन्यार्थमनुष्ठीय-मानं प्रसङ्गादन्यस्याप्युपकरोतीति तस्याप्यङ्गं भवति। यथा राजार्थमनुष्ठितः प्रदीपः प्रसङ्गादमात्यस्याप्युपकरोतीति न तदङ्गं भवति तथेति भावः॥

### ॥ पुरोडाशाभिवासनान्तस्य दर्शेऽनपकर्षाधिकरणम्॥

### सू. तथाऽपूर्वम्॥

(मू) दर्शपूर्णमासयोः "भस्मनाभिवासयतीति" कपालेषु श्रपयितस्य पुरोडाशस्य भस्मनाच्छादनमाम्नातम्। तदेवाहाभिवासनमुच्यते। तदुत्तरकाला चापदिराम्नाता। सामावास्यायां पूर्वेद्युरपकृष्यते

"पूर्वेद्युरमावास्यायां वेदिं करोती"ति। तत्र संशयः किं वेदिरपकृष्यमाणा हविरभिवसनान्तान् स्वपूर्वभाविपदार्थानप्यपकर्षति वा न वेति। तत्रापकर्षति अन्यथा वेद्याः क्रमलोपप्रयुक्तवैगुण्यप्रसङ्गादिति प्राप्ते-

ब्रूमः। अमावास्यावेदेः हविरभिवासनोत्तर कालतारूपक्रमावगमकल्पनात् पूर्वमेव अपकर्षान्न वेदिः पूर्वपदार्थापकर्षतीति। अत्र एकप्रयोगवचनगृहीतत्वेनापकर्षः स्यादिति शङ्का तन्निरासार्थमिदमधिकरणम्। उत्कर्षापकर्षवचने च क्रमविधायके। ततश्च श्रौतक्रमात् पाठक्रमं बाधित्वा अमावास्यायां वेदेरन्य एव क्रमः। न तु हविरभिवासनोत्तरात्मकः पाठक्रमः। स तु पौर्णमास्यामेवेति स्थितम्॥

(टि) इदानीं तदन्तोत्कर्षमपवदति। तत्र क्रमकल्पनात् पूर्वमपकर्ष इत्युक्तम्। तदेव विवृणोति उत्कर्षापकर्षेत्यादिना। श्रौतक्रमात् पाठक्रममिति। इदं च प्रदर्शनमात्रम्। त्रिविधं चात्र पूर्वदिनस्यबलवत्त्वम्। तथाहि-पूर्वदिनानुष्ठानस्य श्रुतिः प्रमाणम् विशेषरूपेण प्राप्तिः। वाक्यं च विनियोजकम्। हविरभिवासनोत्तरकालतायां पाठः प्रमाणम्। सामान्यरूपेण च प्राप्तिः। प्रकरणं च विनियोजकमिति। तस्मात् त्रिविधादपि शैघ्र्यात् वेदि-करणस्याक्लृप्तावस्थ एव हविरभिवासनोत्तर कालात्मकक्रमेऽपकरर्ष इति भावः। अन्य एवेति फलितार्थकथनम्॥

॥ सान्तपनीयाया अग्निहोत्रानुत्कर्षताधिकरणम्॥

सू. सान्तपनीया तूत्कर्षेत् अग्निहोत्रं सवनवद्वैगुण्यात्॥

(मू) चातुर्मास्यैषु साकमेधपर्वणि सान्तपनीयेष्टिः श्रूयते-"मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुमिति"। सेयं सान्तपनीयेष्टिः मध्यन्दिन उपक्रान्ता दैवान्मानुषाद्वा प्रतिबन्धात् सायङ्कालं यावदुत्कृष्टा

यदि स्यात् तदा किं अग्निहोत्रमपि उत्कर्षेणेति। तत्राग्निहोत्रमप्युत्कर्षेदन्यथाग्निहोत्रस्य अनग्निहोत्रकालोद्धृताग्नौ श्रूयमाणत्वरूपवैगुण्यप्रसङ्गादिति प्राप्ते-

ब्रूमः। "सायं जुहोतीति वचनबलात् नोत्कर्षेदिति। इदं त्ववधेयम्। अत्र

प्रवृत्तिक्रमादिष्टिशेषानुष्ठानं अग्निहोत्रानुष्ठानमिति ॥

(टि) इदानीं भिन्नप्रयोगवचनगृहीतानामपि येन केनचिन्निमित्तेनानङ्गेऽपि पौर्वापर्येऽवश्यम्भाविनि प्राप्ते कथमिति चिन्त्यते- अग्निहो-त्रमपीति। सान्तपनीया तावत् स्वकालं मध्य न्दिनमतिपन्नैवेति तस्या उभयथापि न कश्चिद्विशेषः। अग्निहोत्रस्य तु तत्कालेऽनुष्ठाने प्रणयनलोप उत्कर्षे काललोप इति कस्य लोपो न्याय्य इति चिन्त्यत इत्यभिप्रायः। वैगुण्येति। साङ्गप्रधानप्रयोगोत्तरकालप्राप्तेः कालस्य जघ न्यत्वेन बाधो युक्त इत्यभिप्रायः। वचनबलादिति। अयमाशयः - यद्यपि कालोऽङ्गत्वेनोपदिश्यते तथापि तस्यानुपादेयत्वात्तस्मिन् सति कर्म कर्तव्यमिति तत्संयोगस्य निमित्तवद्भवति। अस्मिन् काले जीवने निमित्ते सति कर्म कार्यमिति तेनासति स्वकाले ऽधिकाराभावात् सर्वमेवाकृतं भवेदिति कालस्य बलवत्त्वमिति। इदमेव बलाबलत्वमभिप्रेत्य वक्ष्यति- कालस्य बलवत्वादिति ॥

**॥ उक्थ्यानुरोधेन षोडश्युत्कर्षाधिकरणम् ॥**

**सू. षोडशी चोक्थ्यसंयोगात् ॥**

(मू) ज्योतिष्टोमे षोडशीग्रहं प्रकृत्य श्रूयते "तं पराञ्चमुक्थ्येभ्यो निगृह्णातीति। तत्र "ग्रहंवा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति सामान्यवचनेन षोडशिग्रहणपरभावः षोडशिस्तोत्रस्य प्राप्तः "तं पराञ्चमिति" वाक्येन षोडशिग्रहग्रहणस्योक्थ्यपरभावः। ततश्च उक्थ्यपरभूत षोडशिग्रहणपरभावः षोडशिस्तोत्रस्य प्राप्तः। "समयाविषिते सूर्ये षोडशिनस्स्तोत्रमुपाकरोती"ति विशेषवचनेन षोडशिस्तोत्रस्य सूर्यास्तमयकालः प्राप्तः। एवं स्थिते संशयः - यदा दैवान्मानुषाद्वा प्रतिबन्धात् उक्थ्यग्रहा अस्तमयादूर्ध्वं उत्कृष्यन्ते तदा किं षोडशिग्रहोऽपि उत्कृष्टव्यो न वेति। तत्र दुर्बलेनोक्थ्यपरत्वरूप ग्रहक्रमेण बलवन्तं समया-विषितसूर्यकालं स्तोत्रकालं बाधितुमशक्यत्वान्नोत्कृष्टव्य इति प्राप्ते- ब्रूमः। क्रमत्वेन रूपेण दुर्बलेन सता हविषोऽप्युक्थ्यपरभावरूपक्रमेण

प्रधानभूतषोडशिग्रहा ङ्गत्वेन रूपेण प्रधानभूतषोडशिग्रहयागाद्यासङ्गत्वेन रूपेण वा बलवता सता कालत्वेन रूपेण बलवन्तं सन्तमपि समयाविषितसूर्यकालं अङ्गभूतस्तोत्राङ्गत्वेन रूपेण दूर्बलं सन्तं बाधितुं

शक्यत्वात् उत्कृष्टव्यः षोडशीति।अत्र षोडशिग्रहोत्कर्षे तदङ्गभूतस्य तत्परकालस्य स्तोत्रस्याप्युत्कर्षात् कालबाधा। "तं पराञ्चमिति" वाक्येन

उक्थ्यपरत्वं षोडशिग्रहाङ्गत्वेन विधीयते। षोडशिग्रहयागाभ्यासाङ्गत्वेन उक्थ्यग्रहयागाभ्यासपरत्वं विधीयत इति पक्षद्वयमाकरे स्थितमिति

च बोध्यम्॥

**॥ इति पञ्चमाध्यायस्य प्रथमः पादः॥**

(दि) एवं क्रमात् कालस्य बलवत्त्वमुक्त्वेदानीं तस्यापवादः क्रियते-अशक्यत्वादिति। क्रमस्येति शेषः। एवं शक्यत्वादित्यत्रापि। प्रधान-

भूतषोडशिग्रहाङ्गत्वेनेति। इदं च ग्रहं वा गृहीत्वेति वचनस्याङ्गप्रयोजन परत्वमप्यभ्युपेत्योक्तम्। अथवा ग्रहणं हि साक्षादुपकारित्वरूप सन्निपत्योपकारित्वाद्यागस्यान्तरङ्गं। स्तोत्रं तु न साक्षादुपकारि किं त्वारादुपकारीति तत् बहिरङ्गम्। ततश्चान्तरङ्गत्वेन ग्रहणस्य प्राधान्यं बहिरङ्ग त्वेन स्तोत्रस्य गुणत्वं चेत्यभिप्रायेण अप्रधानभूतत्वम्। अङ्गभूतत्वं च ग्रहणस्तोत्रयोक्तमिति बोध्यम्। पक्षान्तरमाह-प्रधानभूतषोड शिग्रहयागेति। अस्मिन् पक्षे ग्रहणस्यावदानवत् यागोपक्रमत्वात् गृह्णातेर्यागपरत्वमिति बोध्यम्। ननु षोडश्युत्कर्षे ऽपि स्तोत्रं नोत्क्रष्टव्यम्। तस्य ग्रहपरभावः क्रमः। समयावि षितस्तु कालः। स च क्रमाब्दलीयान्। न ह्यत्राङ्गप्रधानकृतो बलाबलभेद उभयस्यापि स्तोत्राङ्गत्वात्। ततश्च पूर्वपक्षानुत्थानात् व्यर्थमिदमधिकरणमित्याशङ्क्याह-अत्र षोडशीति। तत्परकालेस्येति। तदाद्युत्कर्ष इत्युक्तमिति भावः। सुखग्रहणार्थमाह-तं पराञ्चमित्यादि॥

**॥ इति केरलीये षोडशाध्यायीटिप्पणे॥**

**॥ पञ्चमाध्यायस्य प्रथमः पादः॥**

॥ श्रीः ॥

## ॥ अथ पञ्चमाध्यायस्य द्वितीयः पादः ॥

### ॥ वाजपेयपशूनां सर्वेषां एकदा उपकरणादि धर्मानुष्ठानाधिकरणम् (पदार्थानुसमयन्यायः)

### सू. सन्निपाते प्रधानानां एकैकस्य गुणानां सर्वकर्म स्यात् ॥

(मू) वाजपेये श्रूयते - "सप्तदशप्राजापत्यान् पशूनालभत" इति। सप्तदश पशवः तेषां च "वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीत" त्येककालत्वं विहितम्। ततस्ते सह प्रयोक्तव्याः। तत्रारादुपकारकाणि तन्त्रम्। ये तु सन्निपातिनो द्रव्य संस्काराः उपाकरणनियोजनादयः प्रतिपशुभेदेन कर्तव्याः। त इहोदाहरणम्। तत्र अनुष्ठान क्रमे द्वौ प्रकारौ संभवतः। एकस्य पशोः कृत्स्नं गुणकाण्डं कृत्वा परस्य कर्तव्यमित्येकः प्रकारः। स एव काण्डानुसमय इत्युच्यते। सर्वेषामुपाकरणं कृत्वा पुनः सर्वेषां नियोजनं कर्तव्यमित्येवंरूपोऽपरः। स एव मे धार्थानुसमय इत्युच्यते।

तत्र संशयः-किमत्र काण्डानुसमयः स्यादुत पदार्थानुसमय इति। तत्र इतरेतरसंश्लिष्टानामेव उपाकरणनियोजनादीनां चोदकेन प्राप्त त्वात् काण्डानुसमय इति प्राप्ते ब्रूमः। वेश्वदेवीमिति साहित्यविधायकप्रत्यक्ष वाक्येन सर्वेषामुपाकरणस्यैकक्षणकर्तव्यत्वा वगमात् पदार्थानुसमय इति। एवं दर्शपूर्णमा सादिष्वनेकप्रधानसमवाये पदार्थानुसमय इति स्थितम् ॥

॥ श्रीः ॥

### ॥ अथ पञ्चमस्य द्वितीयः पादः ॥

(टि) इदानीमनुसमयश्चिन्त्यते सोऽपि क्रमविशेष एवेति। चोदकेनेति। वाचनिकमपि साहित्यमारादुपकारक विषयत्वेनाप्युपपद्यत इत्यभिप्रायः। प्रत्यक्षवाक्येनेति। काल्पनिक प्रयोगवचननिबन्धनं हि प्रकृतौ उपाकरण नियोजनादि धर्मसाहित्यम्। तच्चेह चोदकेनानुमानिकेन प्राप्यत उपाकरणानां परस्परसाहित्यं तु क्लृप्तेन प्रत्यक्षवाक्येनावगम्यते।

काल्पनिकात् क्लृप्तस्यानुमानाच्च प्रत्यक्षस्य बलत्वादुपाकरण-नियोजनादिसाहित्यं बाध्यत इति। एकक्षण कर्तव्येति। यद्यपि यस्मिन् क्षणे एकस्योपाकरणं कर्तव्यमापतितं तस्मिन्नेव क्षणे परस्योपाकरणं कर्तव्यं सदशक्यतया केवलं न क्रियते। द्वितीयक्षणे तु न कश्चिद्धेतुरस्ति येन पश्वन्तरोपाक्रिया न क्रियेतेति पदार्थानुसमयः सिद्ध इति भावः। एवमिति। यस्मिन् क्षणे एकस्य निर्वापः कर्तव्यः तस्मिन्नेव क्षणे परस्यापीत्याद्युक्तरीत्येत्यर्थः ॥

**॥ सहस्राश्वप्रतिग्रहणस्थले एकैकस्यैकदा सर्वधर्मानुष्टानाधिकरणम् (काण्डानुसमयन्यायः)**

**सु. कारणादभ्यावृत्तिः ॥**

(मू) "यावतो ऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेदि"ति श्रूयते। तत्र शतादिसङ्ख्यायुक्तबह्वश्वदाने बहुषु पुरोडाशेषु प्राप्तेषु संशयः- किं पदार्थानुसमयः अथवा काण्डानुसमय इति। पूर्ववत् प्रत्यक्षवचनात् पदार्थानुसमय इति प्राप्ते-

ब्रूमः। काण्डानुसमयः। अन्यथा प्रधानविरोध प्रसङ्गादिति। यदि सर्वेषामधिश्रयणं क्रत्वथोद्वासनं क्रियते ततः सर्वे दह्येयुरिति प्रधानविरोधः। यत्र तु त्रिचतुराद्यश्वदाने तत्र काण्डपदार्थानुसमय एवेति स्थितम्। इदं नाधिकरणान्तमिति पक्षोऽप्याकरे स्थितः ॥

(टि) इदानीमपवादः क्रियते-प्रत्यक्षवचनादिति। "यावतोऽश्वानि"त्येव प्रत्यक्षवचनमिति न्यायमालायामुक्तम्। वार्तिके त्वस्य वाक्यस्य साहित्यवि धायकत्वं निराकृत्य वचनान्तर साहित्यप्रतिपादकं द्रष्टंव्यमित्युक्तमिति। प्रधानविरोधमेवाह-यदीत्यादिना। पुरोडाशाङ्गं ह्यधिश्रयणादयः संस्काराः। तदङ्ग च क्रमः पदार्थानुसमयस्वरूपः। तदाश्रयणे च पुरोडाशबाधप्रसङ्गः। न चाङ्गानुरोधेन प्रधानबाधो युक्त इत्यभिप्रायः। इति पक्षोऽपीति अत्रापीति काक्वास्य पक्षस्यारस्यमपि ध्वनितमिति बोध्यम्। तथा हि-

भाष्यकारेण पूर्व दृष्टान्तपरिहारत्वेन व्याख्याय पुनरधिकरणान्तरत्वेन व्याख्यातमिति। तत्राधिकरणाङ्गानां सङ्गतिविषयसंशयपूर्वपक्षसिद्धान्त

प्रयोजनानां षण्णां पृथगेव सम्भवे अधिकरणान्तरत्वमेव न्याय्यमित्यस्वारस्यबीजमिति भावः ॥

॥ मुष्टिकपालादीनां समुदायानुसमयाधिकरणम् ॥

सू.मुष्टिकपालावदानाञ्जनाभ्यञ्जन वपनपावनेषु चैकेन ॥

(मू) दर्शपूर्णमासयोराग्नेयाग्नीषोमीय निर्वापयोः श्रूयते-"चतुरो मुष्टिन्निर्वपति"। तत्र पदार्थानुसमय इति स्थितम्। तत्र संशयः- किमेकमुष्टिनिर्वापः एकः पदार्थः तत एकमुष्टिनानुसमय उत चतुर्मुष्टिनिर्वाप एकः पदार्थः ततश्चतुर्मुष्टिभिरनुसमय इति।

तत्र भिन्नप्रत्ययानां चतुर्णां निर्वापाणां भेदस्य लोकसिद्धत्वात् एकमुष्टिनिर्वाप एकः पदार्थः तत एकमुष्टिनानुसमय इति प्राप्ते-

ब्रूमः। चतुस्सङ्ख्याविशिष्टनिर्वापस्य एकाङ्गत्वेनात्र विधानात् चतुर्मुष्टिनिर्वापः एकः पदार्थः। ततश्चतुर्मुष्टिभिरनुसमय इति। ततश्च पदार्थानुसमय इत्यत्र पदार्थशब्दोऽङ्गपर्याय इति। एवं कपालोपधानद्विखदानाभ्यञ्जनवपनवापनेष्वपि द्रष्टव्यम् ॥

(टि) इदानीं पदार्थानुसमयार्थमेव पदार्थश्चिन्त्यते कियानेकः पदार्थ इति। एकाङ्गत्वेनेति। अङ्गमेव पदार्थ इत्वभिपायः।

॥अवदानस्य प्रदानान्तानुसमयाधिकरणम् ॥

सू. संयुक्ते तु प्रक्रमात्तदङ्गं स्यादितरस्य तदर्थत्वात् ॥

(मू) दर्शपूर्णमासयोः श्रूयते-"द्विर्हविषोऽवद्यती"ति ॥ तत्र नैकावदानानुसमय इति स्थितम्। तत्र संशयः किं द्विरदानमात्रस्यैक पदार्थ त्वात् द्वाभ्यामवदानाभ्यामनुसमय उतावदानादिप्रदानान्तस्यैक पदार्थत्वात् तावतानुसमय इति। तत्र "द्विर्हविष" इति वचनेन द्वित्वविशिष्टावदानविधानात् द्विरवदान मात्रस्यैकपदार्थत्वात्तावता नुसमय इति प्राप्ते ब्रूमः।

"चतुरवत्तं जुहोती"त्यनेन चतुरवत्तस्य होम विधानात् अवदानादिप्रदानान्तस्यैकपदार्थत्वात् तावतानुसमय इति। "द्विर्हविष"

इत्यनेन तु हविषोऽवदानस्य विशेषो... द्वित्वसङ्ख्यामात्रं वा विधीयते।

इदं त्ववधेयम्-भिन्नदेवताकेषु प्रदानेष्वेवायं प्रदानान्तानुसमयः। एकदेवताकेषु सान्नाय्यादिषु तु प्रदानस्य तन्त्रत्वात् चतुरवदानानुसमय इति॥

(टि) अत्रापि पदार्थैयत्तैव चिन्त्यते-चतुरवत्तस्य होमविधानादिति। चतुरवत्तस्य होमविधाने हि अवदानचतुष्टयं तदवयवत्वेनैवावगम्यते न पदार्थबलेनेति। अवदानादिप्रदानान्तस्य एकपदार्थत्वसिद्धिरित्यभिप्रायः। तन्त्रत्वादिति। तथा च होमान्तानुसमयत्वस्याशक्यत्वाच्च तुरवदानानुसमय इति।

॥अञ्जनादेः परिव्याणान्तानु समयाधिकरणम्॥

सू. वचनात्तु परिव्याणान्तमञ्जनादि स्यात्

मू. ज्योतिष्टोमे अग्निषोमीयपशौ यूपधर्माः श्रूयन्ते अञ्जनं उच्छ्रयणं संमाननं परिव्याणमिति। ते च यूपैकादशिन्यां चोदकेन प्राप्ताः। तत्र संशयः-किं पदार्थानुसमयः उताञ्जनादिपरिव्याणान्तपदार्थकाण्डानुसमय इति। तत्र पदार्थानुसमयः, अन्यथा प्रयोगवचनावगत साहित्यबाधप्रसङ्गादिति प्राप्ते,

ब्रूमः। "अञ्जनादिपरिव्याणान्तं यजमानो यूपं नावसृजेदि"ति वचनसामर्थ्यादञ्जनादिपरिव्याणान्तकाण्डानुसमय इति॥

(टि) इदानीं पदार्थानुसमयस्य वचनाद्बाधमाह-अन्यथेति। अञ्जनादीत्यनवसर्गवचनं तु यजमानेनाध्वर्योः साहाय्यमाचर तानुष्ठितस्यानवसर्गस्यार्थप्राप्तस्यानुवादमात्रम्। अर्थप्राप्तं च न चोदकेन प्रतिदिश्यत इति भावः। वचनसामर्थ्यादिति। न चायमनुवादः नियमेनाप्राप्तेः शक्यतेत्येकाकिना पुरुषान्तरसनाथेनाध्वर्युणा यूपाञ्जनादि कर्तुमिति॥

॥ दैवताद्यवदानेषु पदार्थानुसमयाधिकरणम्॥

सू. पशुगणे तस्य तस्यापवर्जयेत् पश्वेकत्वात्॥

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ अवदानादिहोमान्तानुसमयः

चोदकेन प्राप्तः। तत्र वचनमिदं आम्नायते "दैवतान्यवदाय न तावत्येव होतव्यं सौविष्टकृतान्यवद्यति सौविष्टकृतान्यवदाय न तावत्येव होतव्यं ऐडान्यवद्य"तीति। अनेनावदानान्तरप्राप्तहोमनिषेधपूर्वकावदानानन्तरविधायकेन वचनेन प्रकृतौ अवदानस्य पदार्थावयवत्वेऽपि पशौ पदार्थत्वं गम्यते। दैवतसौविष्टकृतैडावदानामानन्तर्यं चार्थात् गम्यते। एवं स्थिते वाजपेये प्राजापत्यपशुषु संशयः - किमेकस्य पशोर्दैवतसौविष्टकृतैडान्यववदानानि कृत्वा परस्येत्येवमवदान-काण्डानुसमयउत सर्वेषां दैवतान्यवदानानि कृत्वा परस्येत्येवमवदानकाण्डानुसमय उत सर्वेषां दैवतान्यवदानानि कृत्वा ततः सर्वेषां सौविष्टकृतानि तत ऐडादीनीति अवदानपदार्थानुसमय इति। तत्र काण्डोऽनुसमयः, अन्यथा चोदकप्राप्तदैवतसौविष्टकृतैडानन्तर्भबाधप्रसङ्गदितिप्राप्ते-

ब्रूमः। प्रयोगवचनविहितसाहित्यानुग्रहात् अवदानपदार्थानुसमय इति। न चानन्तर्यबाधः षोडशक्षणव्यवधानस्य साहित्यवचनबलेन स्वीकर्तव्यत्वात् प्रकृतावर्थप्राप्तस्येहाप्राप्तेः।

इदं त्ववधेयम् - एकदेवताकेषु पशुगणेष्वेवायं पदार्थानुसमयः, भिन्नदेवताकेषु एकादशिन्यादिषु पशुगणेषु तु एकस्यैव पशोः दैवतसौविष्टकृतैडान्यवदाय दैवतस्य होमं च कृत्वा पुनः पश्वन्तरस्यापि तथैव कर्तव्यमिति

(टि) इदानीमवदानादिप्रदानान्तानुसमयः क्वचिदपोद्यत इत्याह। तत्र विषयः शोध्यते अनेनेत्यादिना। अवदानपदार्थानुसमय इति सजातीयानुसमयो ऽप्युक्तः। आनन्तर्यबाधमाशङ्ख्याह - नचेति। प्रकृताविति। प्रकृतौ हि यावन्तः पदार्थाः कर्तव्यास्ते मिथः संश्लिष्टाः कर्तव्या इत्येतावद्विवक्षितम्। न त्वानन्तर्यमपि तद्वाचकशब्दाभावात्। नहि "दैवतान्यवदाये"ति वाक्ये आनन्तर्यवाचकः शब्दः श्रूयते। तस्मात्तत्र पशोरेकत्वादर्थप्राप्तं दैवताद्यवदानानन्तर्यं च अर्थप्राप्तं च नातिदिश्यत इति भावः। एकदेवताकेष्विति। तेषु प्रदानस्य तन्त्रत्वात्तदन्तानु

समयासम्भवादिति भाव: ॥

॥ नानाबीजेष्टौ उलूखलादीनां तन्त्रताधिकरणाम् ॥

सू. नानाबीजेष्वेकं उलूखलं विभवात् ॥

(मू) अस्ति राजसूये नानाबीजेष्टि: "अग्नये गृहपतये" पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणां सोमाय वनस्पतये श्यामाकं चरुमित्यादि। तत्र संशय:किं कृष्णाजिनास्तरणादि फलीकरणान्तस्यैकपदार्थत्वात्तावता चानुसमय: तथा तन्त्रेण एकमुलूखलं किं वा कृष्णाजिनास्तरणोलूखलाधिवर्तनबीजावापावघातपरावपनविवेचन फलीकरणानां पृथक्पदार्थत्वात्प्रत्येकमनुसमय: तथा च भिन्नमुलूखलमिति। तत्र "कृष्णाजिनमवस्तृणाती"त्यादिवाक्यै: पृथग्विहितत्वात्तेषां पृथक्पदार्थत्वात् प्रत्येकमनुसमय इति भिन्नमुलूखलमिति प्राप्ते-

ब्रूम:। "व्रीहीनवहन्ती"त्यनेन विहिताया: तण्डुलभावनाय: अवयवत्वेन कृष्णाजिनास्तरणफली करणान्तानां कृष्णाजिनमित्यादिवाक्यै: विधानात् कृष्णाजिनास्तरणादि फलीकरणान्तस्यैकपदार्थत्वात् तावता न समय इति एकमेवोलूखलमिति। इदं त्ववधेयम्-"द्विर्हविष" इत्यत्र अवदानविधिर्नास्ति विधिभेदात् द्विरदानमात्रस्य पदार्थत्वं निराकृतम्। इह तु सत्यपि विधिभेदे अवयवत्वेन विधानान्न पदार्थान्तरत्वमुच्यत इति ॥

(टि) अत्रापि पदार्थेयत्ता चिन्त्यते। तन्त्रावापविचारस्तु फलविचार:। एतदेव ध्वनयन् तथा चेति। विरम्य व्यापृत इति। वैयर्थ्यमाशङ्क्याह इदं त्वित्यादिना"

॥ अग्नीषोमीयपशौ प्रयाजानुयाजयो: पात्रभेदाधिकरणम् ॥

सू. विकारे त्वनुयाजानां पात्रभेदोऽर्थभेदात् स्यात् ॥

(मू) ज्योतिष्टोमे अग्निषोमीये पशौ श्रूयते-"पृषदाज्येनानूयाजान् यजती"ति। तृषदाज्यं नाम दधिमिश्रमाज्यम्। दर्शपूर्णमासयोस्तु "अष्टावुपभृति गृह्णाती"ति प्रयाजानूयाजार्थत्वं चतुगृहीतद्वयमेकस्यां

उपभृति युगपत्कर्तव्यत्वेन विहितम्। तच्च चोदकेन पशौ प्राप्तम्। तत्र चानूयाजानामाज्यद्रव्यविकारत्वेन पृषदाज्येनेति वाक्येन पृषदाज्यं विहितम्। प्रयाजद्रव्यं त्वाज्यमेव। आज्यपृषदाज्ययोश्च संस्कारो मा भूत्। एवं चतुर्गृहीतद्वयस्य नैरन्तर्यैकपात्रयोः अदश्यमन्यतरत् बाधितव्यम्॥

तत्र संशयः- किमेकपात्रत्वानुग्रहाय नैरन्तर्य बाधेन प्रयाजद्रव्यं गृहीत्वा हुत्वा ततः अनूयाजदव्यं पृषदाज्यमपि उपभृत्येव गृहीतव्यं उत नैरन्तर्यानुग्रहाय पात्रैकत्वबाधेन प्रयाजाज्यग्रहणानन्तरमेव पात्रान्तरं सम्पाद्य तस्मिन् अनुयाजद्रव्यं पृषदाज्यं गृहीतव्यमिति।

"तत्राष्टावुपभृति" इत्युपादेयोपभृद्गतैकत्वस्य प्रकृतौ विवक्षितत्वादिहाप्येकपात्रत्वानुग्रहाय नैरन्तर्यबाधेन उपभृत्येव प्रयाजहोमानन्तरं ग्टहीतव्यमिति प्राप्ते-

ब्रूमः। प्रयाजाज्यग्रहणेनानूयाजाज्यग्रहणमुपस्थाप्यते। तस्य चोपस्थितस्यानूयाजाज्यग्रहणस्य परित्यागे कारणाभावात् पात्रान्तरमुत्पाद्य पृषदाज्यं गृहीतव्यमिति॥

(टि) इदानीं पात्रभेदाभेदौ चिन्त्येते क्रमोपयोगित्वात्। तथाहि- पूर्वपक्षे प्रयाजहोमानन्तरं पृषदाज्यग्रहणम्। सिध्दान्ते तु प्रकृत एव स्थान इति विवाक्षितत्वादिति। अनेन पात्रेकत्वस्य श्रुतत्वं बलवत्त्वे कारणमुक्तम्। अयमाशयः- पात्रैकत्वं हि श्रुतम्। आनन्तर्यं च क्रमः। स च न श्रुतः। किन्तु पाठकल्प्यः। तस्मात् पात्रैकत्वस्य बलवत्त्वम्। किञ्च पात्रैकत्वं पदार्थः। क्रमश्च पदार्थ धर्म इत्यतोऽपि दुर्बल इति। कारणाभावादिति। पात्रैकत्वानन्तर्ययोरुभयोरपि ग्रहणाङ्गत्वाविशेषात् विकृतौ चानुमानिकचोदकप्राप्त्यविशेषात्तुल्यबलत्वमिति उपस्थितपरित्यागे न कारणमित्युपस्थितिरेव पात्रैकत्वबाधिकेति भावः।

**॥ नारिष्टहोमस्योपहोमपूर्वताधिकरणम्॥ (नारिष्टन्यायः)**

**सू. प्रकृतेः पूर्वोक्तत्वात् अपूर्वमन्ते स्यान्न ह्यचोदितस्य शेषाम्नातम्॥**

(मू) "अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपे" दित्यादिभिः काम्या

नक्षत्रेष्टयो विहिता: । तत्सन्निधौ चोपहोमा:" सोऽत्र जुहोति अग्नये स्वाहा कृत्तिकाभ्य: स्वाहा अम्बायै स्वाहा दुलायै स्वाहा" इत्यादिभि: । प्रकृतौ च प्रधानान्तरं "दश ते तनुव" इत्यादिमन्त्रै: आज्याहुतयो नारिष्टहोमा: । ते ऽत्र चोदकप्राप्ता: । तत्र संशय:-किं नारिष्टहोमा: पूर्वमुतोपहोमा इति । तत्र प्रत्यक्षपाठेन प्रधानानन्तर्थस्यावगातत्वादुपहोमा: पूर्वमिति प्राप्ते-

ब्रूम: । प्रत्यक्षपाठेन प्रधानवाक्यगृहीतप्राकृताङ्गानन्तर्यस्यैवावगमात् पूर्वं नारिष्टहोमा: पश्चादुपहोमा इति । एवं प्राकृतवैकृतयो रेकस्थानपतितयोर्मध्ये प्राकृतं कृत्वा वैकृतं कर्तव्यमिति स्थितम् ॥

(टि) इदानीं प्राकृतवैकृतक्रमश्चिन्त्यते । प्रधानवाक्यगृहीतेति । विकृतिभावना हि विकृतित्वादेव क्लृप्तोपकारभावां प्राकृतीमेवेतिकर्तव्यतां प्रथममाकाङ्क्षति । ततश्च तां गृहीत्वा पुनर्यदि सन्निधौ वैकृत्याम्नायते तदा तामपि गृह्णातीति न प्रत्यक्षावगतानन्तर्यबाध इति भाव: । अत्र साधितमेव सुखग्रहणार्थमाह एवीमत्यादिना । यदत्र वैकृतानामन्ते करणमुक्तं तदेव बादरायणन्याय इत्युच्यते ॥

## ॥ विदेवनादीनामभिषेकपूर्वताधिकरणम् ॥

### सू. कृतदेशात्तु पूर्वेषां स देश: स्यात्तेन प्रत्यक्षसंयोगान्न्यायमात्रमितरत् ॥

(मू) राजसूये अभिषेचनीयाख्यं सोमयागं राजसूयावयवं विधायानन्तरं श्रूयन्ते विदेवनशौनश्शेपाख्यानाभिषेका: "पष्ठौही दीव्यति अक्षैर्दीव्यति शौनश्शेपमाख्यापयति अभिषिच्यत इति । तत्राभिषेको ऽभिषेचनीयप्राकृताङ्गभूतमाहेन्द्रस्तोत्रं प्रत्यभिषिच्यत इति । तत्र संशय:-किमभिषेको ऽपकृष्यमाणो विदेवनादीन्नाप कर्षति विदेवनादयो ऽभिषेचनीय सकलप्राकृताङ्गान्ते कर्तव्या उत तानप्यपकर्षतीति ते चाभिषेकात् पूर्वं कर्तव्या इति ।

तत्र वेदिवदभिषेकस्यापि क्रमकल्पनात् पूर्वमेवापकर्षान्न स विदेवनादीनपकर्षतीति विदेवनादयोऽन्ते कर्तव्या अभिषेकस्त्वपकृष्टो माहेन्द्रस्तोत्रकामे कर्तव्य इति प्राप्ते-

ब्रूमः। प्रत्यक्षपाठक्रमे सामर्थ्यक्लृप्तक्रमकस्यैवात्रापकर्षात् अभिषेको

ब्रूमः। प्रत्यक्षपाठक्रमे सामर्थ्यक्लृप्तक्रमकस्यैवात्रापकर्षात् अभिषेकोऽपकृष्यमाणो विदेवनादीनपि अपकर्षतीति विदेवनादयोऽभिषेकात् पूर्वमेव कर्तव्या नान्त इति ॥

(टि) अस्यापवाद इदानीमाशभ्यते-वेदिवदिति। अनेन श्रुतमात्रापकर्षापवादत्वमप्यस्तीति ध्वनितम्। प्रत्यक्षपाठक्रमेति। अयमाशयः-यद्यप्यत्र वेदिवदपकर्षवेलायामक्लृप्त एव क्रमः कल्प्यः तथापि किमभिषेकात् प्राक्पठितानां विदेवनादीनामभिषेकपूर्वभावित्वं कल्प्यतामुताभिषेचनीयादूर्ध्वं पठितत्वात्तदीयप्राकृताङ्गपरभावः कल्प्यतामिति चिन्तायामभिषेकात् प्राग्भावित्वमेव कल्पयितुं युक्तं, तस्य प्रत्यक्षपाठनिमित्तत्वात् प्राकृताङ्गपश्चाद्भाविता सानुमानिकी। नहि विकृतिविधिवाक्ये प्राकृतानां प्रत्यक्षपाठोऽस्तीति। किञ्च यथा वेदेरभिवासनोत्तरपाठः पौर्णमास्यां कृतार्थस्तथेहाभिषेकस्य विदेवनाद्युत्तरपाठः क्वचित् कृतार्थः अतोऽपि न वेदिवदत्र स्यादित्याशयेनाह-सामर्थ्येति। बादरायणन्यायापवादत्वमेव ध्वनयनाह-नान्त इति ॥

### ॥ सावित्रहोमादीनां दीक्षणीयपूर्वप्रयोगाधिकरणम् ॥

### सू. पाकृताच्च पुरस्तात् ॥

(मू) अस्त्यग्निः "य एवं विद्वानग्निं चिनुत" इति। तत्र "सावित्राणि जुहोती"ति सावित्रहोमात् महता प्रबन्धेन उखासम्भरणमिष्टकाः पशुं च पूर्वान् विधाय पश्चादाग्नावैष्णवैमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इत्यादिभिः दीक्षणीयादयो गुण वि... म्नाताः। तत्र संशयः किं सावित्रहोमादयः पूर्वं कर्तव्या उत दीक्षणीयादय इति।

तत्र सावित्रहोमादीनां वैकृतत्वात् (दीक्षणीयादयः) ते तावदन्ते कर्तव्याः दीक्षणीयादयस्तु पूर्वमिति प्राप्ते-

ब्रूमः। चोदकानुमितपाठनिमित्तक्रमतः प्रत्यक्षपाठनिमित्तक्रमस्य बलवत्वात् सावित्रादयः पूर्वं कर्तव्याः पश्चाद्दीक्षणीयदाय इति ॥

(टि) अत्रापि बादरायणन्यायापवाद एव क्रियते पूर्वमिति। दीक्षणीयादिपुनश्श्रवणं तु गुणविधानार्थं न क्रमार्थमिति भावः। प्रत्यक्षपाठक्रमेति। यद्यपि गुणार्थमेव श्रवणं तथापि सावित्रहोमादि पाठोत्तरपाठ स्याकृतार्थत्वात्तेन क्रमः कल्पयितुं शक्यत एवेति॥

**॥ यजमानसंस्काराणां रुक्मप्रतिमोकात्**
**पूर्वभाविताधिकरणम्॥**

**सू. सन्निपातश्चेद्यथोक्तमन्ते स्यात्॥**

(मू) अग्नौ दीक्षणीयाया अनन्तरं रुक्मप्रतिमोचनाद्याम्नातम्। दीक्षणीयानन्तरमेव चोदकेन दीक्षितसंस्काराः प्राप्ताः। तत्र संशयः किमनियमः उत पूर्व रुक्मप्रमोचनादि अथवा दीक्षितसंस्कारा इति। तत्र नियामकाभावात् अनियम इति चेत्, उच्यते। प्रत्यक्षपाठक्रमाद्दीक्षणीयाया अनन्तरं दीक्षितसंस्कारेभ्यः पूर्वं रुक्मप्रतिमोचनादि कर्तव्यमितीति प्राप्ते- ब्रूमः। पूर्वं दीक्षितसंस्काराः कर्तव्याः पश्चात् रुक्मप्रतिमोचनादि तावतापि दीक्षणीयापरत्वाबाधादिति सोऽयं पूर्वोत्तरपाठयोर्विशेषः यत् पश्चादनुष्ठाने पूर्वपाठो न स्यात् पश्चात्पाठस्तु स्यादिति॥

**॥ इति पञ्चमाध्यायस्य द्वितीयः पादः॥**

**॥ शुभं भूयात्॥**

(टि) अस्यापवाद इदानीं क्रियते। नहि प्रत्यक्षपाठमात्रं बादरायणन्यायापवादः, किन्तु अकृतार्थ प्रत्यक्षपाठ इत्याशयेन पूर्वोत्तरपाठयोर्विशेषं दर्शयति सो ऽयमित्यादिना॥

**॥ इति केरलीये षोडशाध्यायीटिप्पणे॥**

**॥ पञ्चमाध्यायस्य॥**

**॥द्वितीयः पादः॥**

**॥श्रीः॥**

**॥ अथ पञ्चमाध्यायस्य तृतीयः पादः॥**

**॥ प्रयाजादीनामेकादशादिसङ्ख्यायाः सर्वसम्पाद्यताधिकरणम्॥**

सू. विवृद्धिः कर्मभेदात् मृषदाज्यवत्तस्य तस्योपदिश्यंत ॥

(मू) ज्योतिष्टोमे अग्निषोमीये पशौ श्रूयते- "एकादश प्रयाजान् यजति एकादशानूयाजान् यजतीति, चातुर्मास्येषु श्रूयते" न प्रयाजान् यजति नानूयाजान् यजती"ति, अग्नौ श्रुयते "षडुपसद" इति। तत्र संशय:-किमयं विकृतौ श्रूयमाणा प्राकृतानां प्रयाजानूयाजोपसदां सङ्ख्याविवृद्धि: प्रत्येकंसम्पादनीया उत सर्वसम्पादनीयेति।

तत्र उद्देश्यप्रयाजादिगत साहित्यस्याविवक्षितत्वात् प्रत्येकं सम्पाद्येति प्राप्ते- ब्रूम:। यथा प्रकृतौ पञ्चपादिकसमुच्चितानां न त्वेकैकस्य तथेहापि एकादशत्वादेरङ्गीकरणीयत्वात् सर्वसम्पाद्येति ॥

॥श्री: ॥

(टि) ॥ अथ पञ्चमस्य तृतीय: पाद: ॥

इदानीं प्रत्येकसर्वसम्पादनं क्रमोपयोगीत्यारभ्यते। सर्वसम्पादने ऽन्यादृश: क्रम: प्रत्येकसम्पादने चान्यादृश इति। उत्तराधिकरणोपोद्घातं चेदम्। स्थिते समुदायसम्बन्धे दण्डकलितवदावृत्तिस्स्वस्थानविवृद्धिरिति चिन्तावतरति प्रत्येकसम्बन्धे तु स्वस्थानविवृद्धिरेवेति न चिन्तावतार इति। प्रत्येकमिति। प्रयाजलक्षित प्रयोगैक सम्पाद्येत्यर्थ:। सर्वसम्पाद्येति। प्रयाजलक्षित सर्वप्रयोगसम्पाद्येत्यर्थ:। यत्तूदेश्यगतसाहित्य स्याविवक्षितत्वादिति, तन्न, न ह्यत्र प्रयाजानुद्दिश्य सङ्ख्या विधीयते, प्रत्येकमेकत्वात् समुदितानां च पञ्चत्वादेकादशान्वयात्। अत: सङ्ख्यान्वयसिद्धये प्रयाजा: स्वप्रयोगं लक्षयन्ति। ते च तं लक्षयन्तो न प्रत्येकं लक्षयन्ति, किंतु इतरेतरसापेक्षं, लक्षणाया: सङ्ख्यान्वयार्थत्वात्। सङ्गथा हि स्वभावतो भिन्नेष्वितरेतरयुक्तेषु वर्तते। तत्र यादि पञ्च प्रयोगा लङ्ख्यारंस्तदा पुनरपि सङ्ग्यान्वयो न स्थादित्येकादश प्रयोगा लक्ष्यन्ते। तांश्चोद्दिश्य सङ्गथा विधीयते। द्ववादिसङ्ख्यनां च तन्त्रेणैवोपकारकत्व मित्यभिप्रय:। एवमनूयाजोपसत्स्वपि द्रष्टाव्यम्॥

॥ प्रथमोपसत्त्रयस्य स्वस्थानावृत्त्यधिकरणम् ॥

10210

**सू. स्वस्थानात्तु विवृध्येरन् कृतानुपूर्व्यत्वात् ॥**

(मू) अग्नौ श्रूयते- "षडुपसद" इति। तत्र सर्वसम्पाद्याषट्सङ्ख्येति स्थितम्। तत्र तिसृणां द्विरावृत्तिः कर्तव्या। सा किं दण्डकलितवदावृत्तिः उत स्वस्थान विवृद्धिरिति संशयः। समुदायावृत्तिर्दण्ड कलितवदावृत्तिरित्युच्यते। प्रत्येकमवयवानामावृत्तिः स्वस्थान विवृद्धिरित्युच्यते। तत्र लोके "त्रिरनुवाकः पठ्यतामित्यादौ दण्डकलितवदावृत्तिदर्शनादिहापि दण्डकलितवदावृत्तिः स्यादिति प्राप्ते-

ब्रूमः। दण्डकलितवदावृत्तौ तृतीयस्याः पश्चात्प्राथम्यादित्येवं प्राकृतक्रमविरोधप्रसङ्गात् स्थानवृद्धिरिति ॥

(टि) इदानीमावृत्तिरूपक्रमश्चिन्त्यते। पूर्वाधिकरणस्यैतदधि करणोपोद्घाततत्वं सूचयन्नाह तत्र सर्वसम्पाद्येति। प्राकृतेति। प्रकृतौ तु प्रथमोपसदनन्तरं द्वितीयोपसत्, तदनन्तरं तृतीयोपसत् तदनन्तरं प्रवर्ग्योद्वासनादिकमित्येतावदवगतम् तत्तथैव चोदकः प्रापयतीति न स्वस्थानविवृद्धौ क्रमविरोध इति ॥

**॥ सामिधेनीष्वागन्तूनामन्ते निवेशाधिकरणम् ॥**

**सू. समिध्यमानवर्ती समिवद्धतीं चान्तरेण**
**धाय्याः स्युर्द्यावापृथिव्योरन्तराले समर्हणात् ॥**

(मू) दर्शपूर्णमासयोः सन्ति सामिधेन्यः "सामिधेनीरन्वाहेति। तत्र काम्याः सामिधेनीकल्पाः श्रूयन्ते ऐकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्ये "त्वेवमादयः तत्र सामिधेनीविवृद्ध दाशतयीनामृचामगमेन सङ्ख्यापूरणं वक्ष्यते। तत्र संशयः-किं सर्वासामेवागन्तूनां सामिधेन्यृचां प्राकृतीनां सामिधेन्यृचां अन्ते निवेश उत सर्वासामेव समिध्यमानवर्तीं समिध्यन्वर्तीं चान्तरेण। अथवा यासु वेदे धार्याशब्दो दृश्यते तासां पृथुवाजपहादीनां समिध्यमानवर्तीं समिद्धवर्तीं चान्तरेण निवेशोऽन्यासामागन्तूनामन्ते निवेश इति।

तत्रोपहोमन्यायात् सर्वासामन्ते निवेश इति चेत्। उच्यते। "इयं वै

समिध्यमानवती असौ समिद्धवतीयदन्तरा तद्धाय्येति श्रूयते, तदागन्तूनां सर्वासां सामिधेनीना सामिंधेनीवाचकधाय्या शब्दाभिधेयत्वाविशेषात् सर्वासामन्ते अन्तरेण निवेश इतीति प्राप्ते-

पृथुपाजपत्यौ धाय्ये उष्णीककुभौ धाय्ये इति वेदे यासु पृथुवाजपत्यादिषु धाय्याशब्दो दृश्यते तासामेव धाय्याशब्दाभिधेयत्वात् ते अन्तरेण निवेशः अन्यासां अन्त इति। इयं वा इत्यादि वाक्यानामयमर्थः- समिध्यमानवती पठितासु सामिधेनीषु एकादशसु ऋक्षु मध्ये समि"ध्यमानोऽध्वर इति नवमी ऋक् साइयं पृथिवीत्वेन यां समिद्धवतीं समिद्धो अग्न आहुतेति दशमी, सा "असौ द्यौः यदन्तरा द्यावापृथिव्योर्मध्ये यदन्तरिक्षं तदन्तरिक्षधाय्याइति समिध्यमानवतीसमिद्धवत्योः द्यावापृथिवीत्वेन धाय्यानां चान्तरिक्षत्वेन स्तुतिः, स्तुतेश्च विधिः कल्प्यते। तत्र का धाय्या इत्यपेक्षायां" पृभुवाजपत्यौ धाय्ये" इत्यादिभिः पृथुवाजपत्यादय इत्यवसीयते ततश्च समिध्यमानवतीसमिद्धवत्योर्मध्ये पृथुवाजपत्यादयो धाय्याः प्रयोक्तव्या इति फलितार्थः सम्पद्यते॥

(टि) इदानीमागम्यमानानां देशश्चिन्त्यते। उपहोमन्यायादिति। उपहोमन्याय एव बादरायणन्याय इतिवक्ष्यति। ते इति। समिध्यमानवतीसमिद्धवत्यावित्यर्थः। "अन्तरान्तरेण युक्तेति द्वितीया। ततश्चसमिध्यमानवतीसमि ध्दवत्योर्मध्य इत्यर्थः। निवेश इति। तासामेवेत्यनुषज्यत इति। अन्यासामन्त इति। एवं त्रैधातवीयायामा धाय्याशब्दिताया" अग्ने त्रीते वाजिने"त्यस्यास्त्रिष्टुभोऽन्ते निवेशात् "त्रिष्टुभा परिदधाती"त्यादि दर्शनमुपपन्नं भवति नान्यथा। अतोऽप्यधाय्याशब्दितानामागन्तूनामन्ते निवेश इति॥

**॥ बहिष्पवमान आगन्तूनां पर्यासोत्तरकालताधिकरणम्॥**

**सू. स्तोमविवृद्धौ बहिष्पवमाने पुरस्तात्**
**पर्यासादगन्तवः स्युस्तथा हि दृष्टं द्वादशाहे॥**

(मू) सन्ति वृध्दिस्तोमकाः क्रतवः "एकविंशेनातिरात्रेण प्रजाकामं याजयेत् त्रिणवेनौजस्कामं त्रयस्त्रिंशेन प्रतिष्ठाकाममिति। सन्ति च

ज्योतिष्टोमे बहिष्पवमाने "त्रयस्तृचा उपास्मै गायते"ति प्रथमः, स एव स्तोत्रीय इत्युच्यते, दर्वित्युतत्येति द्वितीयः, सोऽनुरूप इत्युच्यते। "परमानस्य ते कव" इति तृतियः। स पर्यास इत्युच्यते ते च वृध्दिस्तोमकेषु चोदकेन प्राप्ताः। तत्र चागमेन सङ्ख्यापूरणं वक्ष्यते। तत्र च एकविंशस्तोमपूरणाय अष्टौ ऋचः। तत्र संशयः- किमागन्तूनां ऋचां प्राक् प्राकृतात् पर्यासान्निवेश उत प्राकृतानां त्रयाणां त्रृचानामन्ते निवेश इति। तत्र द्वादशाहावयवभूतस्य पृष्ठ्याषडहस्य द्वितीये ऽहनि प्राकृतपर्यासात् प्राक् वैकृतपृषण्वत्रृचानां पाठदर्शनात् प्राक्पर्यासान्निवेश इति प्राप्ते-

ब्रूमः। बादरायणदर्शनादागन्तूनामन्ते निवेश इति। उपहोमन्यायो बादरायणदर्शनमित्युच्यते।

इदं त्ववधेयम्-द्वादशाहे प्रत्यक्षपाठाद्वृषण्वतां मध्ये निवेशात् द्वादशाहप्रकृतिकेषु वृषण्वतां मध्ये निवेशोऽन्यासामागन्तूनामन्ते निवेश इति॥

(टि) अत्राप्यागन्तूनां देश एव चिन्त्यते। पाठदर्शनादिति। सामान्यतो दृष्टमनुमानमत्र प्रमाणम्। किञ्च पर्यायशब्दोऽन्तवचनः लोके वेदे च प्रसिद्धः। आगम्यमानानामन्ते निवेशे सा समाख्या बाध्येत। तस्मादविपर्यासात् प्रागेव निवेश इति। बादरायणेति। नहि सामान्यतो दृष्टानुमानेन शास्त्रार्थनिश्चयः सापेक्षत्वेनाप्रामाण्यापत्तेः समाख्या च प्रकृतौ चरितार्था न शक्नोति न्यायं बाधितुमित्यभिप्रायः। अत्र न्यायसिध्दमेवार्थं दर्शयति इदं त्वित्यादिना॥

॥ बहिष्पवमान एवागन्तूनां साम्नां मध्ये निवेशाधिकरणम्॥

सू. अन्ते तूत्तरयोर्दध्यात्॥

(मू) वृद्धिस्तोमका एवोदाहरणम्। तत्रोत्तरयोर्माध्य न्दिनार्भवपवमानयोः पञ्चदशसप्तदशस्तोमौ चोदकप्राप्तौ। तत्र बहिष्पवमान्बहृगागमेन पूरणं, किन्तु सामागमेनेति वक्ष्यते। तत्र एकविंशस्तोमपूरणाय पञ्चदशे षण्णामागम इत्याद्यूह्यम्। तत्र संशयः-किमागम्यमानानां साम्नामन्ते निवेश उत गायत्रीबृहत्यनुष्टुप्स्विति तत्र बादरायणदर्शनादन्ते क्रमेणेति षट् छन्द

जागति च... निवेश इति प्राप्ते-

ब्रूम:। "त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् च अत्र ह्येवावपन्ति अत एवाद्वपन्तीति वचनात् गायत्रीबृहत्यनुष्टुप्सु निवेश इति। तत्र उच्यत इत्याद्यास्त्रयस्तृचा माध्यन्दिनपवमानतृचास्वादिष्योद्या आर्भवपवमानतृचा:। तत्र उच्चा ते स्वादिष्ठयेत्येतौ तृचौ गायत्रीछन्दस्कौ तयोरेव निवेश: न तु त्रिष्टुप्जगतीछन्दस्कयो: अन्तयोस्तृचोर्निवेश इति। इदं नाधिकरणान्तरमिति क्वचिदाकरे स्थितम्॥

(टि) इदानीं बादरायणदर्शनापवाद: क्रियते-इदं नाधिकरणान्तरमिति। सति वचने पूर्वपक्षानुत्थानात् बहिष्पवमानप्रत्युदाहरणमात्रमिति भाव:॥

**॥ ग्रहेष्टकादीनां क्रत्वग्निशेषताधिकरणम्॥**

**सू. ग्रहेष्टकमौपानुवाक्यं सवनचितिशेष: स्यात्॥**

(मू) अनारभ्य किञ्चित् कर्मोपानुवाक्ये काण्डे ग्रहा: इष्टकाश्च समाम्नाता: "एष वै हविषा हविर्यजते योऽदाभ्यं गृहीत्वा सोमाय यजत" इति, तथा "परो वा एतस्यायु: प्राण एति योंऽ शुं गृह्णाती"ति, तथा इष्टका:" चित्रिणीरुपदधाति वज्रिणीरुपद्धाति भूतेष्टका उपदधाती"ति। तत्र संशय: किमेते ग्रहा: सवनाङ्गं प्रतिसवनं चावर्तनीया: इष्टकाश्च चित्यङ्ग प्रतिचिति चावर्तनीया: किं वाग्रहा: क्रत्वङ्गं इष्टकाश्च अग्न्यङ्गं उभये च सकृदेव कर्तव्या इति।

तत्र ग्रहै: सवनानां इष्टकाभिश्चितीनां च निष्पत्तिदर्शनात् ग्रहेष्टकं सवनचित्यङ्गं प्रतिसवनं प्रतिचिति चावर्तनीयमिति प्राप्ते-

ब्रूम:। "इष्टकाभिरग्निं चिनुतेऽदाभ्यं गृहीत्वा यजत" इत्यादिवाक्यैर्ग्रहेष्टकस्य क्रत्वग्न्यङ्गत्वावगमात् ग्रहेष्टकं क्रत्वग्न्यङ्गं सकृदेव कर्तव्यामिति॥

(टि) इदानीमुत्तराधिकरणोपोद्घाताङ्गाङ्गविचार आरभ्यते। तत्र प्रतिसवनमसकृदनुष्ठानविचार: फलविचार: फलवत्त्वेऽपि चास्योपोद्घातत्वमिति। क्रत्वग्न्यङ्गमिति। किं चाग्नियागस्यापि सफलत्वात्

TAMIL NADU STATE DEPARTMENT OF ARCHAEOLOGY LIBRARY, Date MADRAS

चितिसवनयोर्निष्फलत्वात् "फलवत्सन्निधावफलं तदङ्ग"मिति न्यायेनाग्नियागाङ्गत्वात् "गुणानां च परार्थत्वादि"ति मिथः सम्बन्धासम्भवाच्चाग्नियागाङ्गमिति ॥

## ॥ चित्रिण्यादीनां मध्यमचितावुपधानाधिकरणम् ॥

## सू. अन्ते स्युरव्यवायात् ॥

(मू) औपानुवाक्ये काण्डे श्रूयते- चित्रिणीरूपदधाति वज्रिणीरूपदधाति भूतेष्टका उपदधातीति। तत्र तासां सकृदनुष्ठानमित्युक्तम्। तत्र संशयः-किं तासां पञ्चम्यां चितावुपधानं उत मध्यमायामिति। तत्रानारभ्याधीतानामिष्टकानां पञ्चम्यां चितावुपधानं स्यात्। अन्यथा क्लृप्तक्रमाणां प्रकारणिकेष्टकाना अनारभ्याधीतेष्टकव्यवधान प्रयुक्तक्रमबाधप्रसङ्गादिति प्राप्ते-

ब्रूमः। "यां काञ्चित् ब्राह्मणवतीमिष्टकां विजानीयात् तां मध्यमायां चितावुपदध्यादि"त्यनेन ब्राह्मणवाक्यविहितानां इष्टकानां मध्यमचितावुपधानस्य विधायकेन वाक्येनानारभ्याधीत चित्रिणीरित्यादि ब्राह्मणवाक्यविहितानां चित्रिण्यादीष्टकानामपि मध्यमचितावुपधानस्य विधानात् मध्यमायां चितावेव तासामुपधानमिति ॥

(टि) इदानीं तेषामेव क्रमश्चिन्त्यते। पूर्वाधिकरणस्यैतदुपोद्धातत्वं दर्शयन्नाह-तासां सकृदिति। क्रमबाधप्रसङ्गादिति। "यां काञ्चि"दिति वचनमनुवादमात्रमित्यभिप्रायः। विधायकेनेति। अनुवादमात्रं ह्यनर्थकम्। तच्च सम्भवत्यर्थवत्वे न युक्तं कल्पयितुमिति अनारभ्याधीतेत्यादि न व्यावर्तकतयोपात्तं क्रिन्तूपरज्जकतयेति ध्येयम् ॥

## ॥ लोकम्पृणातः पूर्व चित्रिण्याद्युपधानाधिकरणम् ॥

## सू. प्राग्लोकम्पृणयाः, तस्याः सम्पूरणार्थत्वात् ॥

(मू) औपानुवाक्ये काण्डे इष्टकाः समाम्नाताः "चित्रिणीरुपदधाति वज्रिणीरूपदधाति भूतेष्टका उपदधाति" इति। मध्यमायां चितौ च तासामुपधानमित्युक्तम्। इदं चापरं श्रूयते "यदेवास्योनं यच्चन्द्रं तदेतया

परिपूरयति लोकं पृण छिद्रं पृणेति मन्त्रयुक्तयेष्टकया पूरयेदित्यस्यार्थः। अनेन मन्त्रेणोपधीयमानेष्टका लोकम्पृणेत्युच्यते। तस्याश्च पूरणार्थत्वात् सर्वान्ते उपधानमिति च प्राप्तम्। तत्र संशयः,

किं चित्रिण्यां प्राकरणिकानामिष्टकानां मध्ये अन्तिमा लोकम्पृणा, तस्याप्यन्ते चित्रिण्यादीनामुपधानं किं वा प्राक् लोकम्पृणाया इति।

तत्र बादरायणदर्शनादन्ते स्यादुपधानमिति प्राप्ते ब्रूमः। प्राक् लोकम्पृणायाश्चित्रिण्यादीनामुपधानं अन्यथा तस्याः पूरणार्थत्वश्रवणविरोधप्रसङ्गादिति॥

(टि) इदानीं मध्यमायामेव चितौ देशविशेषश्चिन्यते। बादरायणन्यायापवादत्वमस्य स्फोरयन् पूर्वपक्षमाह-बादरायणेति। "यदेवास्योनमि"ति वचनं तु चित्यन्तरे सावकाशत्वान्न न्यायं बाधितुं शक्नोतीति। अविशेषेण श्रुतस्य वचनस्य सङ्कोचो युक्त इत्यभिप्रेत्याह-अन्यथेति।

**॥ इष्टिसंस्कृतेऽग्नावग्निहोत्राद्यनुष्ठानाधिकरणम्॥**

**सू. संस्कृते कर्म संस्काराणां तदर्थत्वात्॥**

(मू) आधाने सन्ति पवमानेष्टयो ऽग्निसंस्काराः। ताश्च "द्वादशरात्रिष्वनुनिर्वपे"दित्यादिवचनैर्विप्रकृष्यन्ते। तत्र संशयः- किमग्निहोत्रादीनि कर्माण्याधानानन्तरमेव कर्तव्यानि उत कृतास्विष्टिष्विति। तत्राधानमात्रेणाहवनीयाद्यग्नीनां निष्पन्नत्वादाधानानन्तरमेव अग्निहोत्रादीनि कर्तव्यानीति प्राप्ते,

ब्रूमः। अकृतास्विष्टिष्वाहवनीयादीनां अनिष्पत्तेः। कृतास्वेवेष्टिषु अग्निहोत्रादीनि कर्तव्यानीति...न किं....न्नदार्वभ्यामादधीते"त्यादीनि। आहिताग्निव्रतानि तु आधानमात्रे कृते भवन्तीति बोध्यम्॥

(टि) एवमिष्टकाक्रममभिधायाग्निहोत्रादीनां पवमानहविषां क्रमो ऽधुनाभिधीयते-निष्पन्नत्वादिति। आधानमात्रस्य निरपेक्षस्यैव "अग्निनादधीते"ति वाक्येनाग्न्युत्पादकत्वमवगतम्।

पवमानहविर्भिस्तूत्पन्नस्यैव आहवनीयस्य संस्कारः क्रियते। उत्पन्नेषु ह्यग्निष्वधिकारसत्वात् कर्तव्यानि कर्माणीत्यभिप्रायः। अनिष्पत्तेरिति। अयमभिप्रायः-

भाष्यकारमते तावत् यद्यप्याधानमग्यर्थतया निरपेक्षेणैव वाक्येन विहितं, तथापि पवमानहवींष्यवपि प्राकरणिकेन "यदाहवनीये जुह्वती"ति वाक्येनाग्न्यर्थतयैव विनियुज्यन्ते। ततश्च तेष्वकृतेषु नाग्न्युत्पत्तिसम्भवः। न चाधानस्य हविषां च विकल्पः सम्भवति, आधानोत्तरकालं हविषां विधानात्। तथाहि श्रूयते" यः सोमेन यक्ष्यमाणोऽग्नीनादधीत न स पुरा संवत्सराद्धवींषि निर्वपेत् यत् सद्य एव हवींषि निर्वपेत् रुद्राय पशूनपि दध्यात् द्वादशसु रात्रिष्वनुनिर्वपेदिति। तत्र द्वादशसु रात्रिष्विति "यतश्चाध्वकालनिमानमि"ति वचनात् सप्तमी। ततश्च आधानाद्द्वादशरात्रीरतीत्य निर्वपेदित्यर्थ इति। तस्मादाधानस्य हविषां च समुच्चित्यैवाग्न्युत्पादकत्वमिति।

वार्तिककारमते तु हवींष्याधानाङ्ग ततश्च अनङ्गेन करणेन न कार्यनिष्पत्तिरिति हविष्वकृतेष्वग्यनिष्पत्तिरिति, आहिताग्निव्रतानां तु "आहिताग्निःन क्लिन्नं दार्वभ्यादधीते"त्याद्याहिताग्नित्वेन निमित्तेन पुरुषसंयोगश्रवणादाहिताग्नित्वं निमित्तं न त्वाहवनीयादिनिष्पत्तिराहिताग्नित्वं चाधानमात्रे कृते भवतीत्यभिप्रेत्याह-न क्लिन्नेत्यादि।

अत्राचार्यैः पवमानहविर्भ्यः प्राक् क्रियमाणेतूष्णीं होमे, किं अग्निहोत्रधर्माः प्राप्यन्ते न वेति प्रसङ्गात् चिन्तितम्। तत्र तूष्णीं होमे "अग्निहोत्रेणानुद्रवती" त्यग्निहोत्रशब्दश्रवणान्मासाग्निहोत्रवन्नाम्नाग्नि होत्रधर्माः प्राप्यन्त इति पूर्वः पक्षः। अर्थवादस्थत्वान्न नामत्वम्। अथवार्थवादस्थस्थ नामधेयस्य धर्मातिशकत्वाभावान्न धर्माः, अथवा तूष्णींहोमस्याग्निसन्धुक्षणार्थत्वेन अग्यर्थत्वादग्यर्थोऽतो होमो "ऽग्नये होत्रमि"ति यौगिकं नामधेम्। यौगिकस्य नामधेयस्य च न धर्मातिदेशकत्वमिति वक्ष्यति। अतो न नाम्ना धर्मप्राप्तिरिति सिद्धान्तः॥

**॥ अग्निचिद्वर्षणादिव्रतानां क्रत्वन्तेऽनुष्ठानाधिकरणम्॥**

सू. सञ्चिते त्वग्निचिद्युक्तं प्रापणान्निमित्तस्य ॥

(मू) अग्निचिद्व्रतान्यामनन्ति अ... "अग्निचिद्वर्षति न धावेत् नाग्निं चित्वा रामामुपेयात् तस्तादग्निचिता पक्षिणो नाशितव्या" इत्यादीनि । तत्र संशयः- किं चयनानन्तरमेवाग्निचिद्व्रतानि प्रवर्तन्ते किं वा साङ्गक्रतुसमाप्त्यनन्तरमिति । तत्र वचनमात्रेणाग्निचित्त्वस्य व्रतनिमित्तस्य निष्पन्नत्वात् आहिताग्निवत् चयनानन्तरमेव अग्निचिद्व्रतानि प्रवर्तन्ते आहिताग्निव्रतवदिति प्राप्ते, ब्रूमः । क्रतुसमाप्त्युत्तरकालमेवाग्निचित्त्वस्य प्रवृत्तिनिमित्तस्य निवृत्तेः साङ्गक्रतुसमाप्त्यनन्तरमेव अग्निचिद्व्रतानि प्रवर्तन्त इति । येनाधानेनाग्निः संस्कृतः स आहिताग्निः येन त्विष्टका चिता वा क्रतुसमाप्तेरग्निर्धारितः सोऽग्निचिदिति विवेकः ।

(टि) इदानीं पूर्वदृष्टान्तेनाग्निचिद्व्रतान्याक्षिप्यन्ते । वैषम्यमेव प्रतिपादयाति येनेत्यादिना । अयमाशयः न ह्युभयत्रापि धात्वर्थो निमित्तं, उपसर्जनत्वात् किन्तु तत्करणिकाग्निकर्मिका भावना । सा च फलापवर्गिणी आधाने त्वदृष्टमग्निगतं भाव्यम् । तच्चानन्तरमेव निर्वृत्तम् । इह च अग्न्युपकारो भाव्यः । सच क्रतुं साधयतो ऽग्नेः धारणम् । तच्च क्रतुसमाप्तेः प्राङ्न निवृत्तं भवतीति विशेष इति ॥

## ॥ दीक्षाया इष्टिसिद्धताधिकरणम् ॥

**सू. परेण आवेदनाद्दीक्षितः सर्वै र्दीक्षाभिसम्बन्धात्** ॥ अग्नावैष्णवमेकादशकपालं निर्व पेद्दीक्षिष्यमाण "इति दीक्षणीयेष्टिः, तथा "दण्डेन दीक्षयति मेखलया दीक्षयति कृष्णाजिनेन दीक्षयती"त्येवमादीनि च श्रूयन्ते । तत्र संशयः-किं सर्वान्ते दीक्षितो भवति उत इष्ट्यन्ते, दण्डादीनि तु दीक्षितत्वाभिव्यक्त्यर्थानीति ।

तत्र सर्वेषां दीक्षासाधनत्वाभिधानात् सर्वान्ते दीक्षितो भवतीति,

ब्रूमः, क्रियार्थक्रियोपपदे विधीयमानेन दीक्षिष्यमाण इति लृटा इष्टेर्निरपेक्षदीक्षार्थत्वावगमादिष्ट्यन्ते दीक्षितो भवति, दण्डादीनि तु दीक्षितत्वाभिव्यक्त्यर्थानीति । तस्मादिष्ट्यन्ते दीक्षितधर्माः प्रवर्तन्त इति ॥

(टि) एवमाहिताग्नित्वाग्निचित्त्वयोर्निमित्तमुक्त्वेदानीं

दीक्षितत्वनिमित्तमुच्यते। कदा दीक्षितस्य होमादिनिषेध: प्राप्यत इत्येवंरूप क्रमसिद्धयर्थं सर्वेषामिति। दण्डादीनां तृतीयमा इष्टेश्च लृटा साधनत्वावगतिरिरिति। दीक्षितत्वाभिव्यक्त्यर्थानीति। दण्डादीनामक्रियात्वेन दीक्षितत्वरूप संस्काराजनकत्वेन करणत्वबाधादित्थम्भूतलक्षणे तृतीयेत्यभिप्राय: ॥

## ॥ काम्येष्टीनामनियमेनानुष्ठानाधिकरणम् ॥

### सू. अङ्गवत् क्रतूनामानुपूर्व्यम् ॥

(मू) काम्येष्टिकाण्डे काम्या इष्टय: क्रमेण श्रूयन्ते "एन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामा इत्यादय: तथा नैमित्तिका: अपि तस्मिन्नेव काण्डे आम्नाता:"अग्नये पथि"कृते पुरोडाशमष्टाकपालं निर्वपेत् यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपातयेदित्यादय:, तथा गवादय: सोमा: सौम्यादयश्च पशव: काम्या आम्नाता: तत्र संशय: किमेते पाठपाठक्रमेण प्रयोक्तव्या उत नेति। तत्र पाठक्रमानुग्रहात् पाठक्रमेणैव प्रयोक्तव्या इति प्राप्ते-

ब्रूम:। एकप्रयोगवचनानुगृहीतानां क्रमानपेक्षत्वात् न पाठक्रमेण प्रयोक्तव्या:। किन्तु कामनिमित्तोत्पत्त्यनन्तरमेव काम्यनैमित्तिका: प्रयोक्तव्या इति। तदेवं क्रतूनामङ्गवत् क्रमो नास्तीति स्थितम् ॥

(टि) इदानीमेकप्रयोगवचनगृहीतानामेव क्रम इत्येतदेवोपपादयति-पाठक्रमानुग्रहादिति। यथाङ्गानां पाठक्रमार्थवत्त्वाय क्रमनियम: तथा क्रतूनामपि तद्वाक्यानामपि विवक्षितमेव क्रमाध्ययनमध्ययनविधिना विधीयते। तत्सार्थक्यायानुष्ठाने क्रमो ऽभ्युपगन्तव्य इति। एकप्रयोगेति। नहि पाठ: स्वयमेव क्रमं विधत्ते अविधायकत्वात्। स्वाध्यायविधिरपि यद्येन कर्तुं शक्यते तत्तत्रैव विनियुङ्क्ते नान्यत्राशक्यत्वात्। पाठक्रमश्च प्रयोगवचनाकाङ्क्षितक्रमनियममात्रं कर्तुं शक्नोति न क्रमविधानम्। तस्माद्भिन्नप्रयोगवचनगृहीतानां न पाठतो नियम इत्यभिप्राय:। एवं भिन्नप्रयोगवचनगृहीतविषये पाठक्रमस्य प्रामाण्यं नास्तीत्यभिप्रायेणोक्तम्। इदानीं तु सत्यपि प्रामाण्ये बाध्यत इत्याशयेनाह-कामनिमित्तोत्पत्त्य

नन्तरमिति। अयमाशयः- यद्येकप्रयोगवचनागृहीतत्वे ऽपिक्रतूनां युगपदनुष्ठानासम्भवात् क्रमो विवक्षितः। विवक्षितक्रमनियमे ह्यस्त्येव पाठक्रमस्य सामर्थ्यमिति पाठक्रमेणानुष्ठानमिति मन्यते तदा कामेन निमित्तेन पाठक्रमस्य बाधः इच्छाघटितसामग्रीप्रबल्यादिति काम्यमानफलसाधनत्वेन विहितं कर्म कामोत्पत्तौ सत्यां कर्तव्यं भवतीति क्रमस्य निमित्तत्वमुच्यते न तु भेदनादिव निमित्ततया वाक्येनान्वयादिति द्रष्टाव्यम्॥

## ॥ यज्ञानामग्निष्टोमपूर्वतधिकरणम्॥

## सू. य एतेनेत्यग्निष्टोमः प्रकरणात्॥

(मू) ज्योतिष्टोमे श्रूयते- "एव वाव प्रथमो यज्ञो यज्ञानां यज्ञयोतिष्टोमः य एतेनानिष्ट्वान्येन यजेत गर्त पतितमेव तज्जीर्यते प्रवा मीयत" इति। यथा गर्ते पतितमृदिष्ठ पत्रावल्यादिकं पुनः न क्वाप्युपयुज्यते केवलं जीर्यते तथा प्रथमतो ऽनुष्ठितं यज्ञान्तरं न फलाय प्रभवति यजमानश्च तेनापराधेन मृत्युभाग्भवतीत्यर्थः। तत्र संशयः किमेते नेत्येतच्छब्देन सर्वसंस्थो ज्योतिष्टोमो निर्दिश्यते किं वाग्निष्टोमसंस्थ एवेति। तत्राविशेषात् सर्वसंस्थ इति प्राप्ते-

ब्रूमः। नित्यस्याग्निष्टोमसंस्थस्य ज्योतिष्टोमस्यैव प्रकृतत्वात् प्रकृतपरामर्शिन एतच्छब्देन अग्निष्टोमसंस्थो ज्योतिष्टोम एव निर्दिश्यत इति॥

(टि) एवं भिन्नप्रयोगवचनगृहीतानां न क्रमनियम इत्युक्त्वाधुना "य एतेने"त्यस्यार्थे ऽवगते तदपेक्षवृत्तस्यान्यशब्दस्यार्थो निरूपयितुं शक्यत इति तदुपोद्घातोऽयमारभ्यते-नित्यस्येति। यदि सर्वसंस्थो ज्योतिष्टोमो ऽत्र प्रकृतः स्यात्तदा संस्थानां काम्यत्वेन कामोत्पत्तौ सत्यामेवानुष्ठानमिति ज्योतिष्टोमस्य नित्यत्वं भज्येतेति। अपि च एतेनेतिकरणनिर्देशात् ज्योतिष्टोमकरणिका भावनानिष्ट्वेत्यत्रेष्ट्वेत्यनेन कथ्यते। न च संस्थासु तस्य करणत्वं किं त्वाश्रयत्वमेव। नापि संस्थानां क्रतुभावनान्तर्भावः, फलार्थत्वात्। अग्निष्टोम संस्था तु क्रतुभावनान्तर्गतेति तत्संस्थस्यैव परामर्श इति।

॥ ज्योतिष्टोमविकाराणां अग्निष्टोमपूर्वताधिकरणम् ॥

सू. अथान्येनेति संस्थानां संनिधानात् ॥

(मू)ऋ उदाहृतवाक्य एव संशयः-किमन्येनेत्यन्य शब्देनाग्निष्टोमसंस्थावत् ज्योतिष्टोमादन्य उक्थ्यादिसंस्थो ज्योतिष्टोमो निर्दिश्यते किं वाग्निष्टोमसंस्थज्योतिष्टोमादन्यः सकलयज्ञ इति। तत्र सर्वनाम्नां प्रकृतपरामर्शित्वात् उक्थ्यादिसंस्थो निर्दिश्यत इति प्राप्ते-

ब्रूमः। यज्ञानामिति शब्देन सर्वयज्ञानां सन्निहितत्वात् सकलयज्ञो निर्दिश्यत इति। तस्मादुक्थ्यादिसंस्थानां ज्योतिष्टोमभिन्नैकाहानां अहीनानां सत्राणां चाग्निष्टोमसंस्थज्योतिष्टोमपश्चाद्भावोऽत्र वाक्येन विधीयत इति स्थितम् ॥

(टि) इदानीमथान्येनेत्यग्निष्टोमापेक्षया पश्चाद्भावः क्रमो विधीयते। स कस्येति विचार्यते-सर्वनाम्नामिति। अन्यशब्देन हि पूर्वप्रकृतादन्यद्यत् सन्निहितं तदाभिधीयते।

तिः प्रकृ ह्यत्राग्निष्टोमस्तस्य चोक्थ्यादयः संनिहिता इति तत्संस्थ एवान्यशब्देन परामृश्यत इति भावः। यज्ञानामिति। अग्निष्टोमान्यत्वं संनिहितत्वं च कृत्स्न यज्ञानामस्ति। तत्र उक्थ्यादिसंस्थो गृह्यते नान्य इत्यत्र प्रमाणं न पश्यामः। किञ्च यज्ञानामिति निर्धारणे षष्ठया सकलयज्ञपरत्वमन्य शब्दस्यावसीयत इति भावः।

एवमेतत्पदान्यपदयोरर्थो विचारितः। अत्राचार्येण वाक्यार्थो विचारितः- किमनेन वाक्येनाग्निष्टोमस्य यज्ञान्तरापेक्षया प्राथम्यमङ्गं विधीयते किं वा उत्तरेषां प्राथम्यप्रतिषेध उताग्निष्टोमपश्चाद्भावोऽङ्गमिति। तत्र प्रकरणाज्ज्योतिष्टोमस्याग्निष्टोमसंस्थस्य प्राथम्यमङ्गं विधीयत इति, तन्न। तथा सति ज्योतिष्टोमस्य (ग्निष्टोमसंस्थस्य) पाश्चात्ये प्रयोगे प्राथम्याभावादफलता स्यात्। नाप्यन्येषां प्राथम्यप्रतिषेधः, प्रतिषेध वाचकाभावात्। तस्मादन्येषां ज्योतिष्टोमपश्चाद्भावोऽङ्गमत्र विधीयते। तथा सति न कश्चिद्दोष इति। तदभिप्रेत्याह-अङ्गमत्र वाक्येनेति ॥

॥ सर्वेषामनेकस्तोमकानामग्निष्टोमपूर्वकताधिकरणम्

सू. एकस्तोमे वा क्रतुसंयोगात् ॥

(मू) "एतेनानिष्ट्वाथान्येन यजेते"ति श्रूयते। तत्रान्यशब्देन ज्योतिष्टोमविकाराणां निर्देश इति समधिगतम्। वाक्यशेषश्चात्रैवं श्रूयते। "यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति यः पञ्चदशः स तं यः सप्तदशः स तं य एकविंशः स तमिति। अस्यार्थः कथ्यते-त्रिवृदादयोऽग्निष्टोमे विद्यन्ते। तेषु यस्त्रिवृत्स्तोमः अन्यं विकृतिरूपं यज्ञक्रतुमापद्यते स त्रिवृत्स्तोमः तं विकृतियज्ञं दीपयति केवलत्रिवृत्स्तोमकं करोति। तथा च स एकस्तोमको भवतीत्यर्थः। एवं पञ्चदशादिष्वपि योजनीयमिति। एकस्तोमकाश्चाहीनेष्वाम्नाताः "त्रिवृदग्निष्टोमो भवति पञ्चदश उक्थ्यः एकविंशः षोडशि"त्यादयः। तत्र संशयः - किमन्यशब्देन एकस्तोमो निर्दिश्यते उत एकस्तोमः अनेकस्तोमश्चेति। तत्र वाक्यशेषे एकस्तोमानां कीर्तनात् एकस्तोमो निर्दिश्यत इति प्राप्ते-

ब्रूमः। वाक्यशेषे एकस्तोमानां कीर्तनाभावात् अन्यशब्देन एकस्तोमको ऽनेकस्तोमकश्च निर्दिश्यत इति तद्दीपयतीत्यस्य केवलत्रिवृत्स्तोमकं करोतीति नार्थः त्रिवृत्स्तोमः एकस्तोमानेकस्तोमक्रतुसाधारणं प्रकाशयतीत्त्यर्थ इति॥

॥ इति पञ्चमाध्यायस्य तृतीयः पादः ॥

(टि) इदानीमन्यशब्दार्थमाक्षिपति-वाक्याशेष इति। अक्ताः शर्करा घृतेनेतिवत् वाक्यशेषात् सामान्य प्रवृत्तस्य विशेषे ऽवस्थानम्। अन्येनैकस्तोमेनेति भावः। वाक्यशेषे एकस्तोमकस्य कार्तनाभावमेव प्रतिपादयति तं दीपयतीति। सत्तामात्रेणापि दीपकत्वं सम्भवति। तस्मान्न व्याप्तिकल्पने प्रमाणमिति भावः॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥

॥ पञ्चमस्याध्यायस्य तृतीयः पादः समाप्तः ॥

॥ पाठक्रमापेक्षया श्रुत्यर्थयोः बलवत्वाधिकरणम् ॥

सू. क्रमको योऽर्भशब्दाभ्यां श्रुतिविशेषादर्भपरत्वाच्च ॥

॥श्रीः ॥

॥ अथ पञ्चमाध्यायस्य चतुर्थः पादः ॥

(मू) ज्योतिष्टोमे ऐन्द्रवायवादिग्रहेषु तृतीयस्थाने आश्विनग्रहः पठ्यते। "आश्विनो दशमो गृह्यत" इति च श्रूयते। तथा"ग्निहोत्रे" यवाग्वा अग्निहोत्रं जुहोति यवागूं पचतीति श्रुयते। तत्र संशयः-किं श्रुत्यर्थभ्यां पाठस्य बलीयस्त्वात् आश्विनस्य तृतीयस्थाने ग्रहणं हुत्वा च पक्तव्यं, किं वा श्रुत्यर्थपाठानां तुल्यबलत्वात् अनियम उत पाठात् श्रुत्यर्थयोः बलीयस्त्वादाश्विनस्य दशमस्थाने ग्रहणं पक्त्वा च होतव्यमिति।

तत्र पाठस्य क्रमैकविषयत्वात् श्रुत्यर्थपाठाभ्यां पाठस्य बलवत्त्वात् तृतीयस्थाने ग्रहणं हुत्वा च पक्तव्यमिति चेदुच्यते। सर्वेषां क्रमप्रमाणत्वाविशेषात् तुल्यबलत्वादनियम इति। एवं प्राप्ते-

ब्रूमः। प्रथमोपस्थितिप्रयोजनविरोधयोः बलवत्त्व निमित्तयोः सत्वात् श्रुत्यर्थक्रमयोचरमोपस्थित प्रयोजनविरुद्धपाठक्रमात् बलीयस्त्वात् दशमे स्थाने ग्रहणं पत्तवा च होतव्यमिति ॥

॥ श्रीः ॥

(टि)

॥ अभ पञ्चमस्य चतुर्थः पादः ॥

अथ श्रुत्यर्थपाठानां बलाबलं चिन्त्यते। श्रुत्यर्थयोः विरोधश्च न क्वापि सम्भवतीति न तद्बलाबलचिन्तेति ॥

॥ मुख्यक्रमेणाग्नेयस्य पूर्वमवदानाद्यनुष्ठानाधिकरणम् ॥

सू. अवदानाभिधारणासादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात् ॥

(मू) दर्शपूर्णमासयोः वत्सापाकरणदोहनादयो दध्नः धर्माः पूर्वं प्रवृत्ताः। अवघातादय आग्नेयस्य धर्माः पश्चात् प्रवृत्ताः प्रदानं त्वाग्नेयस्य प्रथमं पश्चात् दध्न इति स्थितम्।

तत्र स्विष्टकृदवदानप्रयाजशेषाभिधारणवेद्यासादनेषु संशयः-किमेषां

प्रवृत्तिक्रमयोस्तुल्यबलनियमः प्रापत्तिकबलत्वात् अनियमः अथवा मुख्यक्रम बलीयस्त्वात् मुख्यात्तेनाग्नेयस्य तत्र प्रक्रान्तत्वात् प्रापत्तिकस्य बलवत्त्वात् प्रापत्तिकक्रमेण दध्नः पूर्वमिति चेदुच्यते। प्रमाणत्वा......कमेषां प्रवृत्तिमुख्यक्रमयोः तुल्यबलत्वादनियमेनानुष्ठानं किं प्रावर्तिकक्रमस्य बलवत्वात् दध्नः पूर्वं अथवा मुख्यक्रमस्य बलीयस्त्वादाग्नेयस्य प्रथममिति। तत्र प्रमाणत्वाविशेषात्तयोः तुल्यबलत्वेनानियमेनानुष्ठानमिति चेदुच्यते। तत्राङ्गानां परस्परप्रत्यासत्त्यनुग्रहात् प्रवृत्तिक्रमबलीयस्त्वात् प्रावर्तिकक्रमेण मुख्यक्रमं बाधित्वादध्नः पूर्वमासादनादीनामनुष्ठानमित्येवं प्राप्ते-

ब्रूमः। बह्वङ्गानां प्रधानप्रत्यासत्त्यनुग्राहित्वात् मुख्यक्रमस्य बलीयस्त्वादाग्नेयस्यासादनादीनां प्रथममनुष्ठानमिति॥

(टि) इदानीं प्रवृत्तिमुख्यक्रमयोर्बलाबलं चिन्त्यते-बह्वङ्गानामिति। मुख्यक्रम आश्रीयमाणे प्रथम एकः पदार्थः प्रधानाद्विप्रकृष्यते अन्ये सन्निकृष्टा भवन्ति। प्रवृत्तिक्रमे ह्याश्रीयमाणे बहूनां विप्रकर्ष इत्यभिप्रायः॥

## ॥ इष्टिसोमयोः पौर्वापर्यनियमाधिकरणम्॥

## सू. वचनादिष्टिपूर्वत्वम्॥

(मू) इष्टिपूर्वत्वं सोमस्याम्नातं "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते"ति। तत्र संशयः-किमिदमिष्टिपूर्वत्वं नियतमुत सोमपूर्वत्वमपीति विकल्पितमिति। तत्र" दर्शपूर्णमासाभ्यां इष्ट्वा सोमेन यजेते"ति वचनात् नियतमिति प्राप्ते-

ब्रूमः। "सोमेन यक्ष्यमाणोऽग्निनादधीते"ति वचनसामर्थ्यात् सोमपूर्वत्वमपीति विकल्पितमिष्टिपूर्वत्वमिति सोमपूर्वत्वेऽपि पवमानेष्ट्यग्निहोत्रप्रायश्चित्तपशून्कृत्वा सोमः कर्तव्य इति पवमानेष्टिप्रायश्चित्तपशुन्कृत्वा सोमः कर्तव्यः। अग्निहोत्रं तु सोमान् प्राणान्नास्तीति च पक्षद्वयमाकरे स्थितम्॥

(टि) इदानीं भिन्नप्रयोगपरिगृहीतानामपि वाचनिकः क्रमश्चिन्त्यते-वचनादितीति। सोमपूर्वत्वस्य तु न साक्षाद्वचनमस्ति। किन्तु "सोमेन

यक्षयमाण" इत्यत्र सर्वोह्यग्नीनादधानः सोमेन यक्ष्यमाण एव सोमस्य नित्यत्वात्। अतः सोमेनानन्तरं यक्ष्यमाण इत्यभिप्रायेण सोमेन यक्ष्यमाण इत्युक्त मित्यर्थापत्तिकल्पितमेव वचनमित्यभिप्रायः। न ह्यर्थापत्तिकल्पितं वचनं न प्रमाणमित्याशयेनाह-सोमेनेति। विकल्पितमिति। वचनद्वयप्रामाण्यात् व्रीहियववदिति भावः।

अत्राचार्यैः किञ्चिद्विचारितम्-किमाधानानन्तरं किञ्चिदकृत्वा सोम एव कर्तव्य उतान्तरापि किञ्चिद् भवत्येवेति। तत्र सोमाधानयोरानन्तर्यावगमान्नान्तरा किञ्चित्कर्तव्यमिति प्राप्ते-

ब्रूमः। असाधारण्यसिद्ध्यर्थं हि सोमेन यक्ष्यमाण इति विशेषणस्य सोमाधानानन्तर्यमिष्यते। तच्च दर्शपूर्णमासाविष्ट्वा सोमेन यजेतेति विहितदर्शपूर्णमासोत्तरकालत्वव्युदासेन ततः प्राक् सोमेन यक्षयमाण इत्येवमुपपन्नमेवेति पवमानेष्ट्यादिकं कृत्वा सोमः कर्तव्य इति। तदेतदाह-सोमपूर्वत्वे ऽपीत्यादिना पुनश्च भाष्यकाराभिप्रायो दर्शितः प्रायश्चित्तपशुसोमाङ्गत्वात् पवमानेष्टयस्त्वग्निसंस्कारत्वान्नान्तरा क्रियमाणेषु न व्यवायः न हि तदर्थं क्रियमाणं तव्द्यवधायकं भवतीति अग्निहोत्रं तु नैवमित्यन्तरा न कर्तव्यमितीति। तदाह पवमानेष्टिप्रायाश्चित्तेत्यादिना॥

### ॥ ब्राह्मणस्यापीष्टिसोमयोः पौर्वापर्यानियमाधिकरणम्॥

### सू. उत्कर्षात् ब्राह्मणस्य सोमः स्यात्॥

(मू) इष्टिपूर्वत्वं सोमपूर्वत्वं वेति विकल्पः स्थितः। तत्र संशयः- किमाग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वाग्नीषोमीयो भवति यदेवादः पौर्णमासं हविः तत्तर्ह्यनुनिर्वपेत् तर्हि स उभयदेवतो भवती"त्यनेन वचनेन ब्राह्मणस्य कृत्स्नयोर्दर्शपूर्णमासयोः सोमादुत्कर्षो यदि विधीयते तदा ब्राह्मणस्य सोमपूर्वत्वमेव, क्षत्रियवैश्ययोरेवेदं पक्षद्वयं, अथवा पौर्णमासीमात्रस्योत्कर्षः किं वा सोमादूर्ध्वं कर्मान्तरं विधीयते सर्वेषां पक्षद्वयमाहोस्वित् पौर्णमासस्थाने विधीयते फलवत्त्वाच्च कृत्स्नोत्कर्षः ब्राह्मणस्य सोमपूर्वत्वमिव इतरयोश्च कल्पद्वयं उत एकस्याग्नीषोमीयस्यैव

हविष उत्कर्षः सर्वथा वर्णानां त्रयाणामपि पक्षद्वयमिति। तत्र पौर्णमासशब्देन एकदेशवाचके नापि समस्तस्योत्कर्षः समस्तस्यैव फलवत्वात् ब्राह्मणस्य सोमपूर्वत्वमेव इतरयोः कल्पद्वयमिति। पौर्णमासशब्दमात्रश्रवणात् पौर्णमासीमात्रस्य उत्कर्षादिति चेदुच्यते धात्वर्थविधिसम्भवात् कर्मान्तरं विधीयते त्रयाणामपि वर्णानां कल्पद्वयमिति।

अत्र वदामः। प्रकरणात् पौर्णमास्या एव सोमोत्तरकालो विधीयते फलवत्त्वाच्च कृत्स्नोत्कर्षः ब्राह्मणस्य सोमपूर्वत्वमेव इतरयोः कल्पद्वयमिवि स्थितेऽन्तराचिन्ता॥

(टि) इदानीं प्रसङ्गात् कस्येदं कल्पद्वयमिति चिन्त्यते। अत्र किं ब्राह्मणस्य सोमपूर्वत्वमेव किं वा इतरवद्धावपि कल्पावित्येतावदेवाधिकरणशरीरम्। आग्नेयवाक्यविचारस्तु तदर्थविचारः। तत्र पञ्च पक्षाः कृत्स्नदर्शपूर्णमासोत्कर्षः, पौर्णमासीमात्रोत्कर्षः, कर्मान्तरविधिः कालविधिः एकहविरुत्कर्ष इति। अत्र पूर्वपक्षकोटिं दर्शयति ब्राह्मणस्य कृत्स्नयोरित्यादिना। सिध्दान्तैकदेशकोटिमाह अथवेत्यादिना। पूर्वपक्षैकदेशकोटिमाह- आहोस्विदित्यादिना। सिध्दान्तकोटिं दर्शयति उतैकस्येत्यादिना। तत्र पौर्णमासशब्देनेति। अत्र वचनेनैकदेशो त्कर्षः फलवत्वात् समस्तोत्कर्ष इत्यभिप्रायः। पौर्णमासीशब्दमात्रश्रवणादिति। यद्यपि समस्तस्यैव फलवत्त्वं तथापि दर्शपूर्णमासयोर्भिन्नकालत्वात् न समस्तात्कर्षे फलवत्त्वं प्रयोजकमित्यभिप्रायः। कर्मान्तरमिति। पौर्णमासीसंज्ञा धर्मातिदेशार्था कौण्डपायिनामयनाग्निहोत्रादिशब्दवदिति। तस्मान्न कस्याचिदप्युत्कर्ष इति भावः। दर्शपूर्णमासप्रकरणे श्रुतं पौर्णमासपदं न शक्नोति कर्मान्तरं कल्पयितुम्। तस्यैव प्रत्यभिज्ञानादित्याशयेनाह - प्रकरणादिति॥

**॥ "नर्तुं प्रतीक्षेत" इत्यादिना सोमकालबाधाधिकरणम्॥**

**सू. स्वकाले स्यादविप्रतिषेधात्॥**

(मू) इदमाम्नायते "सोमेन यक्ष्यमाणो ऽग्निनादधीत नर्तून् सूर्क्षेन्न नक्षत्रमि"ति। ॠतुं नक्षत्रं च न परीक्षेतेत्यर्थः। ॠतुनक्षत्रनियमो नास्तीति

यावत्। तत्रं संशय: किमाधानस्यायं ऋतुनक्षत्ररुपकालबाध: उत सोमयागस्येति। प्रकरणादाधानस्येति प्राप्ते-

ब्रूम: "यदहरेवैनं शुद्धोपनमेत् तदहरेवादधीते"ति वचनान्तरेणाधान कालानियमस्योक्तत्वात् सोमयागस्यैवायं कालबाध इति।

स्थितादुत्तरमुच्यते-प्रकृतपरामर्शिनादश्शब्देन अग्निषोमीयस्यैव परामर्शात् तस्यैव हविष उत्कर्ष: त्रयाणां सवनीयानां च कल्पद्वयमिति॥

(टि) इदानीं पूर्वोक्तोपजीवनेन पूर्वपक्षं वक्तुमन्तराचन्ता प्रस्तूयते-प्रकरणादिति। यथा प्रकरणा"दाग्नेयो वै ब्राह्मण" इति वाक्येन पौर्णमास्या: कालविधिस्तथा" नर्तून् सूर्क्षेदिति वाक्येनाप्याधानप्रकरणात्तस्यैव काल: प्रतिषिध्यते न सोमस्य अप्रकृतत्वादित्यभिप्राय:। कालबाध इति। "सोमेन यक्ष्यमाण" इत्यस्य वाक्यस्यायमर्थ:-सोमेन प्रागेव दर्शपूर्णमासाभ्यां यक्ष्यमाणोऽग्निमादधीत एवं कुर्वन् सोमस्य कालं वसन्तादिकमृतुं नक्षत्रं च ज्योतिश्शास्त्रसिद्धं सम्पत् क्षेमादिकं वेदे च तेषु कुर्वीत यत्कारी स्यात् इति विरहितं देवनक्षत्रं न सूर्क्षेत् आद्रियेतेति॥

## ॥आज्यस्य सोमादनुत्कर्षाधिकरणम्॥

## सू. पुरोडाशस्त्वनिर्देशे तद्युक्ते देवताभावात्॥

(मू) इदं श्रूयते "आग्नेयो ब्राह्मणो देवतया स सोमेनेष्ट्वा अग्नी षोमीयो भवति यदेवाद: पौर्णमासं हवि: तत्तर्हि अनुनिर्वपेत् तर्हि स उभयदेवतो भवती"ति। यत् अद: अग्नीषोमीयं पौर्णमासं हवि: तद्धवि: सोमेनेष्ट्वा ततो ब्राह्मण अग्निषोमीयो भवति न तु तत: प्रागिति चेत्तर्हि सोमस्य अनु पश्चादेव निर्वपेत् तर्हि तदा सोमयागान्तरकाले स ब्राह्मण: उभयदेवत: अग्नीषोमीयो भवतीति यत: तस्मादित्यर्थ:। तत्र अग्निषोमीयस्य उत्कर्ष इति स्थितम्। तत्र संशय:-किं पुरोडाशस्यैवोत्कर्ष: उताज्यस्यापीति। तत्राग्नीषोमीयसम्बन्धाविशेषात् उपांशुयाजार्थाज्यस्याप्युत्कर्ष इति प्राप्ते-

बूम:। विष्णुप्रजापत्यग्नीषोममिश्रदेवत्यस्वाज्यस्य अग्नीषोमीयत्वा भावान्नाज्यस्यापि उत्कर्ष: किन्तु पुरोडाशस्यैवेति॥

(टि) एकस्य हविष इत्युक्त्वा कस्यैकस्येति विशेषानभिधाने विशेषानवधारणात् पुनरपि पौर्णमास्यु त्कर्षः प्राप्त इत्याशङ्क्याधुना विशेषो ऽभिधीयते मिश्रदेवत्यस्येति। यद्यप्यग्नीषोमौ प्राक्सोमाद्यष्टुं नार्हति तथापि विष्णुप्रजापती यष्टुमर्हत्येवेति नोत्कर्ष इत्यभिप्रायः ॥

**॥ विकृतानामैन्द्राग्नाढीनां सद्यस्कालताधिकरणम् ॥**

**सू. विकृतेः प्रकृतिकालत्वात् सद्यस्कालोत्तरा विकृतिस्तयोः प्रत्यक्षशिष्टत्वात् ॥**

(मू) वैकृतानि कर्माण्यामनन्ति "ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः सौर्यं चरूं निर्वपेत् ब्रह्मवर्चसकामः" इत्येवमादीनि। तत्र संशयः- किमेता विकृतयो द्व्यहकाला उत सद्यस्काला इति। तत्र व्यहकालतायाश्चोदकप्राप्तत्वात् विकृतयो व्यहकाला इति प्राप्ते-

ब्रूमः। "य इष्टया पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेते"ति वचनात् चोदकाप्राप्त व्यहकालतां बाधित्वा सद्यस्काला विकृतय इति ॥

(टि) इदानीं विकृतिकालश्चिन्त्यते-चोदकप्राप्तत्वादिति। "य इष्ट्येति वचनं तु व्यवस्थानिवृत्त्यर्थम्। प्रकृतितो हि पौर्णमासीविकाराणां तत्कालत्वममावास्याविकाराणं च तत्कालत्वं व्यवस्थितं प्राप्नोति। तन्निवर्तनेन सर्वेष्टिपशुबन्धानां कालद्वयविध्यर्थमिति भावः वचनादिति। चोदकानुरोधेन श्रुतिसङ्कोचो न युक्त इत्याशयः ॥

**॥ सोमात् सांनाय्यविकारादीनां उत्कर्षाधिकरणम् ॥**

**सू. सांनाय्याग्नीषोमीयविकारा ऊर्ध्वं सोमात् प्रकृतिवत् ॥**

(मू) "वैश्वदेव्यामिक्षा" "अग्नीषोमीयं पशुमालभत" इत्यादय आम्नाताः। तत्र संशयः-किमेते सोमात् प्रागूर्ध्वं च प्रयोक्तव्या उत ऊर्ध्वमेवेति। तत्र विशेष वचनाभावात् प्रागूर्ध्वं च सोमात् प्रयोक्तव्या इति प्राप्ते।

ब्रूमः- "नासोमयाजी सन्नयेदाग्नेयो वै ब्राह्मण" इतिवचनाभ्यां सान्नाथ्याग्नीषोमयोः सोमोत्तरकालत्वावबोधनात् तद्विकारा अपि

सोमादूर्ध्वमेव प्रयोक्तव्या इति ॥

(टि) इदानीं विकृतिकालनिरूपणप्रसङ्गात् सान्नाय्यादिविकृतीनां कालः प्रतिपाद्यते। अतो नात्रपूर्वपक्षानुत्थानदोष इति। अथवा वचनं नास्तीति कृत्वा पूर्वपक्ष इति। ताद्विकारा अपीति। चोदकवशादिति भावः ॥

**॥ सोमविकाराणां दर्शपूर्णमासात्प्रागकर्तव्यताधिकरणम् ॥**

**सू. तथा सोमविकारा दर्शपूर्णमासाभ्याम् ॥**

(मू) गवादिष्वेकाहेषु सोमविकारेषु संशयः- किं सोमविकारा एकाहा दर्शपूर्णमासाभ्यां प्रागूर्ध्वं च प्रयोक्तव्या उतोर्ध्वमेवेति। तत्र चोदकप्राप्तत्वात् प्रागूर्ध्वं चेति प्राप्ते-

ब्रूमः । अर्थप्राप्तस्य सोमपूर्वत्वस्य चोदकेनाप्राप्तेः दर्शपूर्णमासाभ्यामूर्ध्वमेव सोमविकाराः प्रयोक्तव्याः न तु सोमपूर्वत्वपक्षेऽपि ज्योतिषामनन्तरं दर्शपूणमासाभ्यां प्रागपि प्रयोक्तव्या इति ॥

**॥ इति पञ्चमाध्यायस्य चतुर्थः पादः ॥**

**॥ समाप्तश्चाध्यायः ॥**

(टि) अस्यापवाद आरभ्यते। एवकारव्यावर्त्यं स्पष्टार्थमाह न त्वित्यादिना। एवं षट्प्रामाण्यः क्रमो निरुपितः ॥

**॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥**

**॥ पञ्चमाध्यायस्य चतुर्थः पादः ॥**

**॥ समाप्तश्चाध्यायः ॥**

## ।। अथ षष्ठाध्यायस्य प्रथमः पादः ।।

## ।। यागादिकर्मणां स्वर्गादिफलसाधनताधिकरणम् ।।

## (अधिकारन्यायः)

### सू. द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः ।।

(मू) "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि समाम्नातम्। तत्र यजेतेत्यत्र आख्यातप्रत्ययेनाख्यात त्वरूपेण पुरुषप्रवृत्तिरूपार्थभावनाख्या क्रियोच्यते। विधित्वेन रूपेण प्रवर्तनात्मिका शब्दभावनाख्या क्रियोच्यते, एकवचनत्वेन रूपेण चैकत्वं; क्रियाक्षेपाच्च कर्ता प्रतीयते। धातुना च याग उच्यते। स्वर्गकामपदं च पुरुषविशेषणवचनम्। तत्र स्वर्गशब्देन प्रीतिरुच्यते। सा च कामनाद्वारा पुरुषविशेषणम्। दर्शपूर्णमासादिशब्दैश्च यागविशेषः तृतीयया च करणत्वमिति। तत्र स्वर्गकाम इत्यत्र संशयः। किं स्वर्गशब्दस्य द्व्यष्ट वर्षस्त्रीचन्दनादिप्रीतिमद्द्रव्याभिधायकत्वात् यः क्रियां यत्किञ्चिद्द्रव्यं साधनतया कामयमानः कुर्यादिति यजेतेत्यत्र प्रत्येनानूद्यः सः स्वर्गकामः स्वर्गं साधनत्वेन कामयमानः कुर्यादिति यागसाधनत्वेन स्वर्गस्य विधानात् स्वर्गकामपदेन च स्वर्गं साधनतया कामयमानस्य पुरुषस्य यागं प्रति नियुज्यमानत्वात् स्वर्गस्य स्वर्गकामपुरुषस्य च यागं प्रति गुणत्वात् यागादिकर्मणश्च भाव्यत्वेन स्वर्गपुरुषौ प्रति साधनत्वं, तस्मात् फलाभावात् कर्तृत्वव्यतिरिक्तस्य कर्मफलभोक्तृतया कर्मस्वामित्वरूपस्याधिकारस्याभावात् कस्य पुरुषस्य कर्माधिकार इत्येवंरूपविचारभूतमिदं षष्ठमधिकारलक्षणाख्यमध्यायं नारम्भणीयम्।

अथवा स्वर्गशब्दस्य निरतिशयप्रीत्यर्थकत्वात् स्वर्गकामपदस्य स्वर्गं प्रति निरतिशयप्रीतिं पुरुषेणार्थ्यमानत्वात् पुरुषार्थं फलं साध्यतया, कामयमानपुरुषाभिधायकत्वात् यः क्रियायां यत्किञ्चित् फलं साध्यत्वेन कामयमानः कुर्यादिति प्रत्ययेनानूद्य सः स्वर्गकामः स्वर्गं साध्यत्वेन कामयमानः कुर्यादिति स्वर्गस्यैव साध्यत्वात् यः स्वर्गकामः स यजेतेति स्वर्गफलाभिलाषिणं पुरुषमुद्दिश्य तदभिलषित स्वर्गफलभावनाकरणत्वेन

यागविधानाच्च यागकर्मण: स्वर्गं प्रति साधनत्वेन गुणत्वात्-स्वर्गस्य स्वर्गकाम पुरुषस्य च कर्म प्रति प्राधान्येन फलत्वात्। ततश्च तस्य फलत्वात् फलवत्ताधीन स्वामित्वपर्यायाधिकारस्य स्वत्वात् उक्तरूपमिदमधिकार लक्षणमारम्भणीयमिति। तत्र लौकिकव्यवहारात् स्वर्गशब्दस्य प्रीतिमद्द्रव्याभिधातृत्वात् उक्तरीत्या अधिकारलक्षणं नारम्भणीयमिति प्राप्ते-

ब्रूम:। गवादिशब्दस्याकृत्यर्थकत्वन्यायात् स्वर्गशब्दस्य निरतिशय प्रीत्यर्थकत्वात् उक्तरीत्याधिकारलक्षणमिदमारम्भणीयमिति॥

अत्रेदमवधेयम्-पुरूषप्रवर्तनारूपो विधि: अपुरूषार्थे पुरूषं प्रवर्तयितुमशक्नुवन् पुरूषार्थथूतं स्वर्गादिकं भाव्यत्वेन स्वीकरोतीति विधिप्रत्ययश्रुत्या समानपदश्रुत्यवगतं धात्वर्थभूतयागभाव्यत्वं बाध्यते इति स्वर्गस्थ निरतिशयप्रीतित्वादेव च पुरूषार्थत्वं कामपदस-मभिव्याहाराच्च। तथाहि-य: स्वर्गं कामयते अर्थयते स: स्वर्गकाम:। कर्मण्यण्। ततश्चायं स्वर्गस्यार्थ्यमानत्वात् पुरुषार्थत्वम्। एवं च कामपदसमभिव्याहृतानां पश्वादीनामपि फलत्वं सिद्धमिति। अधिकार इत्यत्र अधिकारीत्यत्र च "अधिरीश्वरे विभाषाकृञि" इति कर्मप्रवचनीय:। तदुक्तम्-यत् यस्य स्वं तत्तं अधिकरोति स्वामिनं करोतीत्यर्थ:॥

**॥श्री:॥**

## ॥अथ षष्टस्य प्रथम: पाद:॥

(टि) एवं भेदशेषप्रयुक्तिक्रमलक्षणैश्चतुर्भिरनुष्ठेये निरूपितेऽधुना कोऽयमनेनानुष्ठेयेनाधिक्रियत इति विचार्यते। तत्रोपाद्घातत्वेनेदमारभ्यते। किञ्चात्र कर्मणां सफलत्वं साध्यते। तस्मात् सकलशास्त्रोपयोग्ययं विचार:। अस्मिन् ह्यसति सकलमेव शास्त्रं शिथिलं भवति निष्फलत्वात्। अधिकार निरूपणे चाधिकार सद्भावप्रसाधनेन फलवत्त्वसाधनं साक्षादुपयुज्यत इत्यस्यैवाध्यायस्यादाविदमधिकरणमारभ्यते-इत्यादीति। "चित्रया यजेत पशुकाम:" "सौर्यं चरूं निर्वपेद्ब्रह्मवर्चसकाम" इत्यादिसकलफल पदसङ्ग्रहार्थमादिशब्द:। वाक्यार्थोपयोगात् पदार्थानाह

तत्रेत्यादिना करणत्वमित्यन्तेन।

अत्र द्वेधा पूर्वपक्ष: स्वर्गादिकं यागसाधनमित्येक:; स्वर्गादिकामना समुद्रध्यानादिवत् गुणभूतकर्तृविशेषणं सद्यागाङ्गमिति द्वितीय:। तत्र दृष्टार्थत्वाल्लाघवाच्च प्रथम: पूर्वपक्ष: श्रेयानिति स एवात्राभिधीयते। तत्रापि स्वर्गशब्दार्थविचार: स्वर्गकामोदाहरण मात्रोपयोगीत्यत आह तत्र स्वर्गकाम इत्यत्रेति। अत्राधिकारो नास्त्युतास्तीत्येतदाधिकरणशरीरम्। भाष्ये तु किं स्वर्गो गुणत: कर्मप्रधान उत कर्म गुणत: स्वर्ग: प्रधानत इति संशयो दर्शित:। तत्र (दृष्टार्थत्वाल्लाघवाच्च) स्वर्गयागयोर्गुणप्रधानभावविचारो-यागपुरुषयोर्गुणप्रधानभावविचारद्वारेत्युत्तरभाष्यतात्पर्य त्वेनाचार्यैर्व्यख्यात:। तदनुसारेणात्राप्युक्तमिति। द्रव्याभिधातृत्वादिति। द्रव्यस्य सिद्धरूपत्वात् कर्म प्रत्युपादातुं शक्यत्वाच्च साधनत्वमेव न साध्यत्वम्। अत आह-साधनत्वेनेति। यागसाधनत्वेनेति। अयमाशय:-यजेतेत्याख्यात प्रत्ययोपात्त भावनाया: किमिति भाव्याकाङ्क्षायां समानपदोपादानश्रुत्या साध्यरूपत्वेन योग्यत्वाच्च धात्वर्थो याग: सम्बध्यते। तत: केनेति करणाकाङ्क्षायां कर्तृकामविषयत्वेनोपस्थितं स्वर्गद्रव्यं योग्यत्वाद्वाक्येन सम्बध्यते। ततश्चायं वाक्यार्थ: स्वर्गेण यागं भावयेदितीति। यागसाधनत्वेन स्वर्गस्य विधानात् स्वर्गस्य यागं प्रति गुणत्वं पुरुषस्य यागं प्रति नियुज्यमानत्वात् स्वर्गकामपुरुषस्य यागं प्रति गुणत्वमित्यन्वय:। स्वामित्वरूपस्येति। कर्मजन्यफलभोक्तृत्वमत्र कर्मस्वामित्वम्। स एवाधिकार: तदेव साम्यमित्युच्यते। यागविधानादिति। अयमत्र वाक्यार्थ: यागेन स्वर्गं कुर्यादिति भाव:। स्वर्गस्येति। स्वर्गस्य फलत्वात् पुरुषस्य चोद्देश्यत्वात् प्राधान्यं नारम्भणीयमिति। नन्वेवं सकलमेव शास्त्रं निष्फलं स्यादिति चेदस्तु सकलशास्त्राक्षेपेणास्यारम्भाददोष इति। आकृत्याधिकरणन्यायादिति। अव्यभिचारात् प्रथमप्रतीतेश्चेत्यर्थ:।

ननु यागस्य भावनासम्बन्ध: श्रौत:, स्वर्गस्य वाक्यीय: वाक्याच्च श्रुतिर्बलीयसीत्याशङ्कायामाह अत्रेदमित्यादिना। अयमाशय:-लिङादयो हि विधिं भावनां चाभिदधाति। ततश्चैकपदोपादानश्रुतित:

एकप्रत्ययोपादानश्रुतेः शीघ्रप्रवृत्तया बलीयस्त्वात् प्रकृत्युपात्तयागसम्बन्धात् पूर्वमेव भावनाया विधिसम्बन्धः प्रतीयते। प्रवर्तना हि विधिः। प्रवृत्तिहेतुर्व्यापारश्च प्रवर्तना। प्रवृत्तिहेतुत्वं च स्वविषयभूतायाः प्रवृत्तेः पुरुषार्थभाव्यत्वं विना न सम्भवतीति पुरूषार्थस्यैव भाव्यत्वं विधिबलादवसीयत इति। स्वर्गस्य पुरुषार्थत्वमेव कथमित्यत्राह स्वर्गस्येत्यादिना। पश्वादिसाधारण्येन पुरूषार्थत्वसिद्ध्यर्थमाह- कामपदसमभिव्याहाराच्चेति। ननु लिङादयो विधिं प्रवर्तनामभि दधतीत्युक्तं, कस्य पुनरसौ प्रवर्तनारूपो व्यापार इति चेत् शब्दस्येति गृहाण। तस्य सन्निहितत्वादन्यस्य चाप्रतीतेः। ननु शब्दस्याचेतनत्वान्न व्यापार इति चेत् योऽस्य व्यापारः सम्भवति अंशत्रयविशिष्ट भावनाप्रत्ययरूपः तस्यैव प्रवर्तनारूपत्वं यथा भवति तथा यतितव्यम्। यथा च तद् भवति यदि भाव्यांशः पुरूषार्थस्तदा भवतीति। ततश्च लिङादिप्रत्ययैरेव पुरुषार्थभावत्वावगतिस्तद्विशेषावगतिरेवोपपदैरिति। अत एव विधिबलादवसीयत इत्युक्तमिति। अधिकारशब्दं व्युत्पादयति- अधिकार इत्यत्रेति॥

## ॥ अशक्तानामधिकारनिराकरणाधिकरणम्॥

## सू. फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात्॥

(मू) इदमामनन्ति "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" "ज्योतिष्टोमेन स्वर्गकामो यजेते"ति। तत्र संशयः- किं सचेतनानां सर्वेषामधिकारः उत अन्धपङ्गुबधिरदेवर्षितिर्यग्वर्जितानां मनुष्याणामेवाधिकार इति। तत्र स्वर्गकामो ऽधिकारी, सर्वेषां निरतिशय प्रीतिरूपस्वर्गकामनासम्भवात् सर्वेषामधिकार इति प्राप्ते-अन्धानां क्रत्वङ्गत्वेन विहितानामाज्यावे- क्षणविष्णुक्रमणक्लृप्त्यादिवाचन देवतोद्देश- त्यागार्षेयवरणशास्त्रार्थ ज्ञानानां असम्भवादन्धादिव्यतिरिक्त कृत्स्नाङ्गानामनुष्ठानसमर्थ विद्वन्मनुष्याणामे वाधिकार इति। अत्र देवाना मृषीणामप्यधिकारो ऽस्तीति पक्षान्तरमपि आकरे स्थितमिति ध्येयम्॥

(टि) एवं तावदस्त्यधिकारः लक्षणं चारम्भणीयमित्युक्तम्

तदिदानीमारभ्यते - स्वर्गकामोऽधिकारीति। अयमाशयः - यथाधिकारमेवाङ्गविनियोगः न तु यथाविनियोगमधिकारः। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति प्रधानवाक्येन हि सर्वेषामाधिकारो ऽवगम्यते तद्वशेनैवाङ्गवाक्यानामुपवर्णनं युक्तम्। न तु प्रधानवाक्यगतस्याङ्ग वाक्यानुसारेण सङ्कोचो युक्तः। तस्मात् सर्वेषां फलार्थिनामशक्यानुष्ठानाङ्गरहितकर्मानुष्ठान विधानादस्त्यधिकार इति। क्रत्वङ्गत्वेनेति। यथाविनियोगमेवाधिकारः नतु यथाधिकारं विनियोगः। नहिपुरुषं प्रत्यङ्गानां विधिः येन यथाधिकारं विनियोगादसमर्थं प्रत्यविहित त्वादनङ्गत्वेन तद्रहितं कर्माविगुणं सत् फलं साधयेत्। क्रतुं प्रत्येव त्वङ्गानां विधिः ततश्चाङ्गवाक्यानां प्रधान वाक्यशेषत्वात्तैर्युक्तेन प्रधानवाक्येन कृत्स्नाङ्गयुक्तः क्रतुः पुरुषैः सम्वध्यमानो ऽसमर्थान् विहाय विधीयत इत्यन्धादीनां क्रतुरेवाविहित इति तस्य फलसाधनत्वाभावात् कुतस्तज्जन्यफलभोक्तृत्वरूपो ऽधिकारः कुतस्तरां प्रधानवाक्यविरोध इत्यभिप्रायः॥

## ॥ स्त्रिया अनधिकारनिराकरणाधिकरणम्॥

## सू. लिङ्गविशेषनिर्देशात् पुंयुक्तमैतिशायनः॥

(मू) इदं श्रूयते "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" ज्योतिष्टोमेन स्वर्गकामो यजेतेति। तत्र संशयः किं पुंस एवाधिकारः उत स्त्रीपुंसयोरिति। तत्र स्वर्गकाम इति पुंलिङ्गस्य विवक्षितत्वात् पुंस एवधिकार इति प्राप्ते-

ब्रूमः। उद्देश्यगतलिङ्गस्य ग्रहैकत्ववदविवक्षितत्वात् स्त्रीपुंसयोरधिकार इति। यथा ग्रहमित्यत्र प्रातिपदिकार्थस्य विवक्षा एवं प्रातिपदिकार्थत्वविशेषाल्लिङ्गस्यापि विपक्षे अस्त्याशङ्का। लिङ्गस्य प्रातिपदिकार्थत्वेऽप्युद्देश्यविशेषणत्वात् अविवक्षा।

वस्तुतस्तु टाबादिप्रत्ययार्थ एव लिङ्गंन प्रातिपदिकार्थः तस्मान्नात्र पक्षे ऽप्युत्तरमिति॥

(टि) एवं समर्थानामधिकारमुक्त्वाधुना स्त्रीणामधिकारश्चिन्त्यते- विवक्षितत्वादिति। यथा प्रातिपदिकार्थत्वात् ग्रहस्य विवक्षा तथा

लिङ्गस्यापि प्रातिपदिकार्थत्वाच्चमसाधिकरणे विवक्षोक्ता किं तूद्देश्यत्वादित्यभिप्रायेणाह-उद्देश्येति। लिङ्गं नोद्देश्यं किं तूद्देश्यविशेषणम्। अतो न ग्रहवद्विवक्षेति भाव:। पौनरूक्त्यमाशङ्क्याह यथेत्यादिना॥

**॥यागे दम्पत्यो: सहाधिकाराधिकरणम्॥**

**सू. स्ववतोस्तु वचनादैककर्म्यं स्यात्॥**

**(मू) स्त्रीपुंसयोरधिकार इति स्थितम्। तत्र संशय:**

किं दम्पत्यो: पृथगधिकार: उत सहाधिकार इति। तत्र यजेतेत्याख्यातोपात्तैकत्वसङ्ख्याया गुणभूतोपादेय कर्तृपरिच्छेदिकाया विवक्षितत्वात् तदविरोधाय पृथगेवधिकारोऽभ्युपेय इति प्राप्ते-

ब्रूम:। "सह धर्मश्चरितव्य" इत्यादिवचनात् दम्पत्यो: सहाधिकार इति। एकवचनं च मिथुनाभिप्रायमिति बोध्यम्। इदमधिकरणं पूर्वाधिकरणमध्ये स्थितमिति॥

(टि) इदानीं दम्पत्यो: सहाधिकारश्चिन्त्यते। सहाधिकार एव स्त्रीणामधिकार: न पृथगधिकारे (रो) विद्याद्यभावादित्यभिप्रेत्यान्तराचिन्तेयमिति।

यद्यपि स्वर्गकामपदे लिङ्गवद्वचनमप्यविवक्षितं तथाप्याख्यातोपात्ता सङ्ख्या गुणभूतोपादेयकर्तृपरिच्छेदकत्वेन विवक्षितेत्यभिप्रेत्याह-यजेतेत्याख्यात इति। सहधर्म इति। किञ्चाङ्गसाकल्यालोचनयापि सहाधिकार:। तथाहि-यदि पृथगधिकारस्तदा यजमानप्रयोगे प्रत्यवेक्षान्वारम्भादिलोप: पत्नीप्रयोगे यजमानावेक्षणादिलोप इति। मिथुनाभिप्रायमिति। परस्परापेक्षयोरेवाग्नीषोमयोर्देवतात्वमिव दम्पत्यो: कर्तृत्वं कर्तृरूपैक्याच्चाख्यातोपात्तैकत्व सङ्ग्याग्नीषोमौ देवतेति वदित्यभिप्राय:। पूर्वाधिकरणमध्य इति। तत्र ह्याकरे अद्रव्यत्वाच्च स्त्रीणां नाधिकार इत्युक्तं पूर्वपक्षे, तत्समाधानमकृत्वेदमधिकरणमारब्धम्। पुनश्च गतेऽस्मिन् स्मृत्या ह्यद्रव्यत्वमवगतम्। श्रुत्या चाधिकार: स्मृतेश्च श्रुतिर्बलीयसीति समाहितमिति भाव:। शास्त्रदीपिकायां तु पूर्वाधिकरणं समाप्यैवेदमारब्धमिति॥

## ॥ आधाने पुरुषद्वयकर्तृकत्वनिराकरणाधिकरणम् ॥

### सू. व्याधानं च द्वियज्ञवत् ॥

(मू) अस्त्याधानान् "य एवं विद्वानग्निमाधत्त" इति। तत्र श्रूयते "क्षौमे वसानावग्निमादधीयातामि"ति। तत्र संशयः किं वसानावित्याधाने पुंद्वयविधानादाधाने द्वयोः पुंसोरधिकार उत स्त्रीपुंसयोः प्राप्तयोः वसानावित्यनूद्य क्षौम विधानादेकस्यैव पुंसोऽधिकार इति। तत्र धात्वर्थे विधान सम्भवादाधाने औकारविभक्त्यर्थपुंद्वयविधानात् द्वयोः पुंसोरधिकार इति प्राप्ते-

ब्रूमः। अप्राप्तत्वात् क्षौमस्य विधानात् एकस्यैव पुंसो ऽधिकार इति। इदन्त्ववधेयम्-न त्वौकारविभक्तेः पुंद्वित्वमभिधेयं किन्तु सद्वितीयः पुमानिति ॥

(टि) एवं तावद्यजेतेत्याख्यात सङ्ख्या मिथुनाभिप्रायेत्युक्तम्। तत्र मिथुनग्रहणं कारकशक्त्युपलक्षणार्थमितीदानीं तन्यायेन वसानाविति मिथुनद्वयं प्राप्तं निवार्यते। धात्वर्थ इति। श्रुत्यवगतं पुंद्वयं धात्वर्थे श्रुत्यैव विधीयत इति श्रुत्यनुग्रहः। क्षौमविधानपक्षे तु न धात्वर्थे किञ्चिद्विधीयते, नापि धात्वर्थो ऽन्यत्र। नापि धात्वर्थविधिरिति धात्वर्थस्य अत्यन्तपारार्थ्ये क्षौमवसनसम्बन्धश्च विधेयः, स च वाक्यगम्यः। विधिरपि वाक्येनेत्यत्यन्त वाक्यार्थवि धानं च स्यात् तदत्यन्तमन्याय्यमिति। औकारेति। यद्यप्यौकारस्य न पुंद्वयमर्थः, कुकुटश्च कुक्कुटी च कुक्कुटावित्यादिप्रयोगात् "पुमांस्त्रिये"ति स्मरणाच्च। तथाप्यव्यभिचारात् पुंस्त्वं द्वित्वं चार्थः ततश्चेह द्वित्वपुंस्त्वयोरितरेतरनियमात् द्वौ पुमांसाविति गम्यत इत्यभिप्रायः। विधानादिति। "यदादधीयाता"मिति प्रकृतमाधानमनूद्य तद्वसानावित्यौकारान्तवाच्यं पुंद्वयं विधीयते। वसनमप्यर्थप्राप्तमनूद्यते। क्षौमशब्दश्च टुक्षु शब्द इत्यस्मादुत्पन्नः शब्दवत्वं प्रतिपादयन्ननुवादः।

अथवा अमलिनतासादृश्येन गौण्या वृत्त्या वसनस्यार्थप्राप्तममलिनतां प्रतिपादयन्ननुवाद इत्यभिप्रायः। अप्राप्तत्वादिति। अयमभिप्रायः-

सम्भवति मुख्यार्थे न गौणत्वं युक्तम्। नापि यौगिकत्वादनुवादः रूढ्या योगस्य बाधात्। तस्माद्यदि न तद्विधीयेत तदानर्थकमेव स्यादिति तदेव विधीयते। आनर्थक्याद्वाक्यार्थविधानं वरमिति। इदानीमौकारविभक्तेरर्थमाह-इदं त्वित्यादिना। "पुमान् स्त्रियेति। भगवतः पाणिनेः स्मरणं चात्र प्रमाणमिति॥

## ॥ पुंस एवोपस्थानाद्यधिकाराधिकरणम्॥

## सू. तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात्॥

(मू) इदं श्रूयते। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत"

"ज्योतिष्टोमेन स्वर्गकामो यजेतेति। तत्र दम्पत्योः सहाधिकार इति समधिगतम्॥ तत्र संशयः-किं सर्वं याजमानमुभाभ्यां कर्तव्यं उताज्यावेक्षणादिकं वाचनिकं आञ्जनाभ्यञ्जनादिसंस्कारकादिकं च उभाभ्यां कर्तव्यं अन्यत् सर्वं याजमानं यजमानेनैव कर्तव्यमिति। तत्र यजमानत्वाविशेषात् सर्वं याजमानमुभाभ्यां कर्तव्यमिति प्राप्ते ब्रूमः। स्त्रिया अध्ययनाभावान्न सर्वं कर्तव्यं, किन्तु आज्यावेक्षणादिकमेवेति। याजमानसमाख्या तु एकवचनान्तात् तद्धिते स्यात्। असति प्रतिबन्धके द्विवचनबहुवचनान्तानां वृत्त्यभावादिति न समाख्यया पत्न्या सर्वप्राप्तिरिति ध्येयम्॥

(टि) एवं दम्पत्योः सहप्रयोगे स्थितेऽधुना तद्विशेषश्चिन्त्यते। तत्रर्त्विजेषु द्वयोरपि दक्षिणादानद्वारं कर्तृत्वमिति तेषु न चिन्ता, किन्तु याजमानेष्वेवेत्याशयेनाह-याजमानमिति। अयमाशयः- "पत्न्यवेक्षत" इत्यादिषु पत्न्येव कर्त्री, "शुक्रं यजमानोऽन्वारभत" उपादेयस्य यजमानस्य विवक्षितलिङ्गत्वात् पुमानेव कर्ता, येतु फलिसंस्कारा वचनेनाव्यवस्थया विहिता अञ्जनाभ्यञ्जनादयस्ते द्वयोरपि फलित्वाविशेषादावर्तन्ते। तस्मान्न तेष्वपि चिन्ता। यानि तु परार्थान्युपस्थानानुमन्त्रणादीनि मन्त्रोच्चारणात्मकानि यजमानसमाख्यया यजमानकर्तृकाणि तेष्वेव चिन्ता। तदेतदभिप्रेत्याह-आज्यावेक्षणादिकमिति। उभाभ्यां कर्तव्यमिति, अतो नात्र चिन्तेत्यभिप्रायः। यजमानत्वाविशेषादिति। अयमाशयः-

याजमानसमाख्यया हि तेषु कर्तृत्वावगतिः। सा च यजमानशब्दाद्यजमानाशब्दाच्च निष्पद्यमानैकरूपैवेति न कोऽपि विशेष इति। स्त्रिया अध्ययनाभावादिति। यद्यप्यष्टवर्षं ब्राह्मणमुपनयी"तेति अष्टवर्षस्योपनयनसंस्कार्यत्वेनाविवक्षितलिङ्गत्वात् स्त्रियोऽपि भवति। अत एव" स्वाध्यायोऽध्येतव्य इत्यनिर्दिष्टकर्तृकमध्ययनं प्रकृतमुपनीतं कर्तारमाश्रयत् स्त्रिया अपि भवति, तथापि स्त्रीणामध्ययनं धर्मशास्त्रकारैः प्रतिषिद्धमित्यभिप्रायः। यत्तु समाख्याविशिष्टेति तत्राह-याजमानसमाख्या त्विति। यदि द्विवचनान्तादियं तद्धितः स्यात्तदा समाख्याबलात्तन्मात्रा ध्ययनकल्पना स्यात्। न तु स सम्भवति। तस्मान्न समाख्याबलादद्ध ध्ययनसिद्धिरिति॥

**॥ शूद्रस्यानधिकाराधिकरणम्॥**

**सू. चातुर्वर्ण्यमविशेषात्॥**

(मू) अग्निहोत्रादिषु सर्वकर्मसु संशयः-किं चतुर्णां वर्णानामधिकारः उतापशुद्राणां त्रयाणामिति। तत्राविशेषात् चतुर्णां वर्णानामेवाधिकार इति प्राप्ते-

ब्रूमः। शूद्रस्य विद्याभावात् विद्यावतामपशूद्राणां त्रयाणामेव वर्णानामधिकार इति।

एतेन केचित् केरलीया वेदानधिकारिणः तन्तुधारिणः देवालयवार्याख्याश्च केचित् शुद्राः ज्योतिश्शास्त्रं व्याकरणं च पठन्ति, पाठयन्ति च ज्योतिश्शास्त्रं तु अन्ये शूद्राः। केचिच्चण्डालाश्च पठन्ति। केचिब्द्राह्मणाश्च तेषां सकाशात् पठन्ति, ते सर्वे निषिद्धाचरणात् पापिन इति धर्मज्ञैः सद्भिः बहिष्करणीयाः राज्ञा च दण्ड्या इति सिद्धमिति बोध्यम्।

अत्र केचित् केरलीया ब्राह्मणाः पण्डितंमन्या मूर्खमूर्धाभिषिक्ताः अश्रुतमीमांसाशब्दा धर्माधर्मानभिज्ञाः लोकैकशरणाः ज्योतिर्व्याकरणा ध्यायिवेदानधिकारिभिर्मिलित्वैवं प्रत्यवतिष्ठन्ते। केरलीया हि वयम्। अतोऽस्माकमाचार एव धर्मे प्रमाणं न शास्त्रं, आचारविषयश्च वेदानधिकारिणां अङ्गपठनपाठनादिः, अतो नाधर्मः। नहि केरलीयानां

त्वच्छास्त्रवशेन कस्यापि अधर्मत्वं स्यादिति। तदेतदन्यवै....ताननतिमूर्खान् प्रति अवचनमेव वरमिति विरम्यत इति सन्तः प्रसीदन्तु ॥

(टि) एवं दम्पत्योः सहाधिकारं प्रसाध्याधुना विद्याभावादपशूद्रमधिकार इत्युच्यते-अविशेषादिति। अयमाशयः-अत्रायं तदर्थसंशयः-किं "स्वर्गकामो यजेते" त्यादि कामश्रुतिप्रयुक्तं विद्यार्जनमुत स्वाध्यायविधिप्रयुक्त विद्योपजीविन्यः कामश्रुतय इति। तत्र द्वेधा पूर्व पक्षः। एकस्तावत् क्रत्वनुष्ठानौपायिक ज्ञानोपयोगित्वेन विहितमध्ययनं क्रत्वङ्गं क्रतुविधिभिरेव प्रयुज्यते प्रयाजादिवत् क्रतवश्चाविशेषेण चातुर्वर्ण्यमधिकुर्वाणाश्चतुर्णामप्यध्ययनं प्रयुञ्जते। तत्र त्रयाणामुपनयनसंस्कारोऽध्ययनाङ्गत्वेन विहित इति ते उपनीता विद्यां लभन्ते चतुर्थस्तु विध्यभावादनुपनीत एव विद्यां लभत इति। द्वितीयस्तु न क्रत्वङ्गमध्ययनं श्रुत्याद्यभावात् किन्तु अक्षरग्रहणादिदृष्टार्थपरम्परया वाक्यार्थज्ञानं यावद्गतं तज्ज्ञानस्यानुष्ठानौपयिकत्वेन क्रतुफलेष्व-ध्ययनविधिरेव अध्ययनं विनियुज्यते न फलद्वारेण क्रतौ। तेनाध्ययनमर्थज्ञानाङ्गम्। अतोऽध्ययनेन विनापि क्रतुवैगुण्याभावादनधीतवेदवेदाङ्गोऽपि शुद्रः पुस्तकनिरीक्षणादिना विद्यां लब्ध्वाधिक्रियते। तत्र क्रतवोऽविशेषेण चतुरोऽप्यधिकुर्वन्तस्त्रयाणामध्ययन विधिसिद्ध विद्यत्वाद्विद्यार्जनं न प्रयुञ्जते। चतुर्थस्यन्यतः सिद्धविद्यत्वाभावाद्विद्यार्जनमपि प्रयुञ्जत इति। पक्षद्वये ऽपि कामसंयुक्तक्रतु विधिप्रयुक्तं शूद्रस्य विद्यार्जनमिति तस्याप्यधिकार इति।

विद्याभावादिति। अयमभिप्रायः- यत्त्वध्ययनविधिना शुद्रस्य विद्या न लभ्यत इति, यदप्यध्ययनं न क्रत्वङ्गमिति तदुभयं तथैव। यत्त्वध्ययनेन विनापि क्रतोरवैगुण्यमिति, तन्न। अध्ययनस्य क्रत्वङ्गत्वाभावेऽपि अध्ययनकृतार्थज्ञानस्य क्रत्वङ्गत्वेन तदभावे क्रतुवैगुण्यसम्भवात्। यदापि क्रतुविधिभिरेव शुद्रस्य विद्यार्जनं प्रयुज्यत इति तदपि न। क्रतुविधयो ह्यन्यथानुपपत्त्या विद्यार्जनमाक्षिपन्तीति तु वक्तव्यं, तथा वक्तुं न शक्यते

अध्ययनविधिविहिताध्ययनोपात्तविद्यात् द्विजन्मनो लब्ध्वा निराकाङ्क्षत्वेन क्षीणान्यथानुपपत्तित्वात्। तस्मात् क्रतुविधयोऽध्ययनविधिप्रयुक्तविद्यार्जनोपजीविन्य इति न शूद्रस्य विद्येति न तस्याधिकार इति। अत्र यद्यप्याधानोपनयनयोरग्नि विद्याद्वारेणापि न क्रतुविधिभिराक्षेप इति तद्वाक्यानां प्राप्त्यर्थत्वमिति द्वितीय उक्तम्। तेनैव शूद्रस्यानाधिकारोऽपि सिद्ध एव। तथापि प्रकारान्तरेणापि न शूद्रस्य विद्या लभ्यत इति तस्य विद्यानधिकारित्वं प्रतिपादयितुमेवेदमधिकरणमारब्ध मिति बोध्यम्।

इदानीं प्रसङ्गात् किञ्चिदाह-एतेनेत्यादिना। एतेन शुद्रस्य विद्यानधिकारित्वेनेत्यर्थ:। विद्या नाम चतुर्दशविद्यास्थानानामर्थ ज्ञानमिति सकलसम्मतमिति भाव:। निषिद्धाचरणादिति। मनुना पाङ्क्तदूषकमध्ये "शूद्रशिष्यो गुरुश्चैवेत्युक्तम्। शुद्रशिष्य: शूद्रगुरूश्चं पक्ति दूषक इत्यर्थ:। स्वपङ्क्त्यामुपविश्य भुञ्जानान् दूषयति स हि पङ्क्तिदूषक:। "वेदाक्षरविचारेण शूद्रश्चण्डालतां व्रजेत्" इति पराशर:। अस्यार्थ:- वेदाक्षरसम्बन्धी यो विचार: शब्दापशब्दविचारोऽर्थविचारश्च वेदवेदाङ्गादिचतुर्दशविद्यास्थानविचार इत्यर्थ:। एवम्भूतं वेदाक्षरविचारं कुर्वन् शूद्र: त्रैवर्णिकातिरिक्तश्चण्डालतां व्रजेत् निषिद्धाचरणात् पापभाग्भवेत्। अतोऽत्रैवर्णिकश्चतुर्दश विद्या नाधीयेतेति। एवं निषिद्धस्यांचरणादित्यर्थ:। किञ्चैतान्यङ्गानि वेदस्य नित्यं ज्ञेयानि वै द्विजैरिति व्यासवचने द्विजग्रहणं "मासान् विप्रोऽर्धपञ्चमानित्यङ्गा ध्ययनकालविधि परे मनुवचने विप्रग्रहणम्। तस्माद् ब्राह्मणेन निष्कारण: षडङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यध्ययनविधिश्रुतौ ब्राह्मणग्रहणं च शुद्रस्याप्यङ्गाध्ययनाधिकारे सति विरुध्येतेति "राज्ञा च दण्ड्या" इति। तथा च नारद:-

**"धर्मोपदेशं दर्पेण द्विजानामस्य कुर्वत:।**

**तप्तमासेचयेत्तैलं श्रोत्रे वक्त्रे च पार्थिव:॥**

"इति॥ अस्य मस्करीयं धर्मोपदेशमिति। शास्त्रार्थोपदेशमित्यर्थ:।

चतुर्दशविद्यास्थानार्थोपदेश इति यावत्। अस्य शूद्रस्य त्रैवर्णिकातिरिक्तस्येत्यर्थ:। तप्तमिति। अग्निवर्णमित्यर्थ:। निषिद्धाचरणेन दण्डार्थत्वादिति। अत्र केचित् किञ्चिज्ज्ञा धर्मप्रतिपन्न:-

युगे युगे च ये धर्मास्तत्र तत्र च ये द्विजा:।

तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजा:॥

इति पराशरवचनं दृष्ट्वा कलियुगे अधर्मं चरतां निन्दा न कर्तव्येति भ्राम्येयु: तं भ्रमं वारयितुमुक्ताधर्मं चरतां निन्दति अत्रेत्यादिना। अयमाशय:- उदाहृतपराशरश्लोकस्य युगान्तरोक्तप्रायश्चित्तादीनामशक्याकरणेन निन्दा न कर्तव्येत्यर्थ:, न तु निषिद्धमाचरतां स्वधर्मत्यागिनां निन्दा न कर्तव्येति। तथा सति सकलविधिनिषेधशास्त्र वैयर्थ्यप्रसङ्गादिति। अत एव भगवता पराशरेणैवास्य श्लोकस्यायमेवार्थ उत्तरश्लोकेनोक्त: विवृतश्च माध्वाचार्यैरिति। तस्मान्निषिद्धमाचरतां स्वधर्ममननुतिष्ठतां च सम्यङ्निन्दा कर्तव्यैव। अन्यथानिन्द्या निन्दनेन निन्द्यत्वापत्तेरिति अलं प्रसक्तानुप्रसक्तेन। प्रकृतमनुसराम:॥

## ॥ निर्धनाधिकाराधिकरणम्॥

### सू. त्रयाणां द्रव्यसम्पन्न: कर्मणो द्रव्यसिद्धत्वात्॥

(मू) अग्निहोत्रदिष्वेव सन्देह:-किमद्रव्यस्य नास्त्यधिकार: उतास्तीति। अद्रव्यस्य द्रव्यसाध्यकर्मानुष्ठानाशक्तित्वान्नधिकार इति प्राप्ते-

ब्रूम:। द्रव्यार्जनं कृत्वाप्यनुष्ठातुं शक्यत्वात् अस्ति दरिद्रस्याप्यधिकार इति॥

(टि) एवं तावत्त्रयाणामेवाग्निविद्याक्रतुष्वधिकार इत्युक्तम्। अधुना तेष्वेवाद्रव्यस्य क्रत्वधिकारश्चिन्त्यते अस्तीति। अद्रव्यो ऽपि द्रव्यमर्जयित्वानुतिष्ठन्नधिक्रियत इति भाव:। अद्रव्यस्येति। पुरूषार्थोपात्तद्रव्यवतां लाभान्न द्रव्यस्य द्रव्यार्जनं क्रतुविधिभिराक्षिप्यते। तस्मादविदुष इवाद्रव्यस्यापि नाधिकार इत्यभिप्राय:। द्रव्यार्जनं कृत्वेति। अयमाशय:-नहि द्रव्यार्जनं विद्यार्जनेन तुल्यम्। विद्या हि

प्रत्यक्षविधिसिद्धा। त्रयाणामिति। तैरेवोपपन्ना: क्रतवो न शूद्रस्य तदाक्षिपन्तीति युक्तम्। द्रव्यार्जनं तु सर्वेषां द्रव्यकार्यैरेवाक्षेप्तव्यम्। तत्राविशेषात् पुरुषार्थभोजनादिवत् क्रतूनामपि तदाक्षेपकत्वं न विहन्यत इति॥

### ॥अङ्गहीनाधिकाराधिकरणम्॥

### सू. अङ्गहीनश्च तद्धर्मा॥

(मू) अग्निहोत्रादिष्वेव संशय:-किं रोगेणाङ्गविकलस्याधिकारो ऽस्ति वा न वेति। तत्राज्यवेक्षणाद्यङ्गानुष्ठानाशक्तत्वान्नास्त्यधिकार इति प्राप्ते-

ब्रूम:। औषधादिनाङ्गवैकल्यं समाधायानुष्ठातुं शक्यत्वात् अस्त्यधिकार इति॥

(टि) इदानीमङ्गहीनस्याधिकार: कथ्यते। यद्यप्यद्रव्यवदङ्गहीनोऽपि अधिक्रियते, तथापि द्रव्यहानिर्बहिरङ्गम्। अतो नाधिकारं निरुणद्धीति युक्तम्। अङ्गहानिस्त्वन्तरङ्गत्वाद्विरूणद्धयेवेति शङ्कां वारयितुमिदमधिकरणं यत् प्रतिसमाधातुं शक्यते तन्नाधिकारं विरूणद्धीति॥

### ॥ अचिकित्स्याङ्गवैकल्यस्यानधिकाराधिकरणम्॥

### सू. उत्पत्तौ नित्यसंयोगात्॥

(मू) अग्नि होत्रादिष्वेव संशय:-किं अप्रतिसमाधेयाङ्गवैकल्यस्य जात्यन्धादेरधिकारोऽस्ति नेति। तत्राङ्गविकलस्याधिकारोऽस्तीत्युक्तत्वात् अस्त्यधिकार इति प्राप्ते ब्रूम:। अप्रतिसमाधेयाङ्गवैकल्यस्य केनाप्युपायेनाज्यावेक्षणादिशक्ति सम्पादनायोगान्नाधिकार इति॥

(टि) इदानीमपवाद: क्रियते-नास्त्यधिकार इति। काम्येष्वेवायमनधिकार: नित्येषु तु यथाशक्यमनुतिष्ठन्न प्रतिसमाधेयाङ्गवैकल्योऽपि अधिक्रियत एवेति बोध्यम्॥

### ॥ दर्शपूर्णमासयो: त्र्यार्षेयस्यैवाधिकाराधिकरणम्॥

### सू. अत्र्यार्षेयस्य हानं स्यात्॥

(मू) दर्शपूर्णमासयोः श्रूयते- "आर्षेयं वृणीत" इति। तत इदं श्रूयते- "एकं वृणीते द्वौ वृणीते त्रीन् वृणीते न चतुरोवृणीते न पञ्चातिवृणीत" इति। ऋषिः गोत्रप्रवर्तकः कश्यपभारद्वाजादिः तस्य सम्बन्धः आर्षेयः तं वृणीते उच्चारयति वासिष्ठेत्याद्युच्चारणमित्यर्थः। एकं आर्षेयं वृणीते उच्चारयति वासिष्ठेत्युच्चारयेदित्यर्थः। एवं वासिष्ठोपमन्यवेत्युच्चारयति आङ्गिरसवैरूपराथितरेत्युच्चारयेत् आर्षेयान्नोच्चारयति पञ्चार्षेयानतिक्रम्य षडादीनेवोच्चारयतीत्यर्थः। तत्र संशयः-किं दर्शपूर्णमासयोः तद्विकारेषु च अत्र्यार्षेयस्याधिकारः उत त्र्यार्षेयस्यैवेति। तत्रार्षेयं वृणीत इति सामान्येन विधानादत्र्यार्षेयस्याप्यधिकार इति प्राप्ते-

ब्रूमः। वाक्यभेदवारणाय त्र्यार्षेयस्यैव "त्रीन्वृणीत" इति विधानाभ्युपगमात् त्र्यार्षेयस्यैवाधिकार इति॥

(टि) "अथ त्र्यार्षेयाधिकारः प्रतिपाद्यते। अत्र द्वेधा पूर्वपक्षः एकस्तावदार्षेयं वृणीत" इति वरणमात्रे विहिते चतुर्णां षडादीनां च प्रतिषेधादेकद्वित्रिपञ्चानां प्राप्तं वरणमित्येकं वृणीत इत्यादिरनुवाद इति। द्वितीयस्तु यथा सिद्धान्ते त्रित्वेन सामान्यं विशेष्यते तथैकत्वद्वित्वाभ्यामपि विशेषाभावान्न चतुर इत्यादिस्तु नित्यानुवाद इति। अत्र्यार्षेयस्येति। प्रथमे पक्षे एवं द्वौ पञ्च वा वृणानस्येत्यर्थः। द्वितीये तु एकं द्वौ वा वृणानस्येत्यर्थः। "पञ्च वृणीत" इत्यश्रवणात् पञ्चत्वेन सामान्यवचनं विशेष्टुमशक्यत्वादिति। वाक्यभेदेति। अयमाशयः-"आर्षेयं वृणीत" इति सामान्यं विशेषं प्रति साकाङ्क्षं वाक्यम्। तत्र "त्रीन् वृणीत" इति त्रित्वेन विशेष्यते, वर्तमानापदेशाच्च विधिः कल्प्यते। तथा चार्षेयमित्याद्यति वृणीत इत्यन्तमेकं वाक्यं स्यात् त्रित्वविधाने नैव द्वित्वैकत्वयोः प्राप्तत्वात्। वैश्वानरद्वादशकपालेषु त्वादिश्रवणवदवयुत्यानुवादत्वेन "न चतुर" इत्यादेश्च नित्यानुवादत्वेनार्थवादत्वोपपत्तेरिति। प्रथमपूर्वपक्षे हि सामान्येन विधानं प्रतिषेधश्चेति द्वे वाक्ये। द्वितीये तु एकत्वाद्वित्वत्रित्वैर्विशेषणात्त्रीणि वाक्यानीति नैकवाक्यत्वसिद्धिरिति। अर्थवादकल्पितं वचनं दर्शयति-

त्रीन् वृणीतेति ॥

## ॥रथकाराधिकाराधिकरणम् ॥

### सू. वचनाद्रथकारस्य आधाने ऽस्य सर्वशेषत्वात् ॥

(मू) आधाने श्रुयते-"वर्षासु रथकार आदधी"तेति। तत्र रथकार इत्यत्र संशयः-किं यो रथं करोति स रथकार इत्यवयवव्युत्पत्त्या त्रैवर्णिकानामन्यतमो रथकार उत ऋभुसौधन्वन सान्त्वनाद्यपर नामधेयोऽ त्रैवर्णिको रथकार इति। तत्रात्रैवार्णीकस्य विद्याभावनिमित्तानधिकारात् त्रैवर्णीकानामेकतम एव रथकार इति प्राप्ते-

ब्रूमः। रूढेर्बलीयस्त्वात् त्रैवर्णिकापशूद्र सौधन्वनोरथकार इति। यस्तु "व्रात्यां तु जायते वैश्यात् सुधन्वे"ति तस्यात्राधाने ऽधिकारः। यस्तु "माहिष्येण करण्यां तु रथकार" इति तस्यानधिकार छागन्यायादिति तन्त्ररत्ने स्थितम्। भाष्ये ऽपि सौधन्वनानामेवाधिकार इति स्थितम्। न्यायमालायां तु माहिष्यात् करण्यां जातस्य रथकारस्यात्राधाने अधिकार इति स्थितम्। अत्र न्यायं पश्यामः ॥

(टि) अत्राप्यधिकारविचार एव अत्रैवर्णिको विद्वानपि कश्चिदधिक्रियते न वेति। रथकारशब्दार्थचिन्ता तु तदर्थचिन्तेति। रूढ्बिलीयस्त्वादिति। ततश्च वचनबलादविदुषाऽप्यधिकार इति। छागन्यायादिति। यथा "पशुनेति सामान्यविहितो ऽपि "छागस्य वपाया" इति मन्त्रवर्णाच्छाग इति विशेषोऽवसीयते तथेहापि रथकारमिति सामान्येनाभिहितोऽपि "सौधन्वना ऋभव" इति सामानाधिकरण्यात्तन्नेमिमृभवो यथा नमस्वेति नेमिनमनस्य रथकारधर्मस्य ऋभुषु दर्शनात् "ऋभूणां त्वा देवानां व्रतपते व्रतेनादधामीति रथकारस्येति वाचनिकाधानममन्त्रवर्णाच्च विशेषावगतिरस्ति। इदं त्ववधेयम्-आधानविधिनैव तन्मात्रौपयिकं विद्यार्जनमुपनयेन विनाक्षिप्यते। न चास्याधानसत्वेऽपि क्रत्वधिकारः विद्याभावात्। आधानविधिस्तु तन्मात्रोपक्षीणत्वान्न क्रत्वधिकारं कल्पयितुमर्हति। तेन प्रधानकर्मेदमाधानं विश्वजिदादिवत् कल्प्यफलम्। अत एवास्यार्थ कर्मत्वेन अग्निसंस्कारार्थत्वाभावान्नाहवनीयाद्युत्पादकत्वमपीति ॥

॥ निषादस्थपत्यधिकरणम् ॥

सू. स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात् ॥

(मू) "वास्तुमयं चरूं निर्वपेत् यस्य रुद्रः प्रजा पशुनशमयेदिति प्रकृत्य श्रूयते "एतया निषादस्थपतिं याजयेदिति। तत्र निषादस्थपतिं प्रति सन्देहः- किं कर्मधारय षष्ठीतत्पुरुषयोः तुल्यबलत्वात् त्रैवर्णिकानामग्निविद्ययोः सत्वाच्च निषादानां स्थपतिरधिपतिः निषादस्थपतिरिति षष्ठीतत्पुरुषश्रवणेन त्रैवर्णिकानामन्यतमो निषादस्थपतिरथवा षष्ठीतत्पुरुषात् कर्मधारयस्य बलीयस्त्वात् निषादश्चासौ स्थपतिश्चेति कर्मधारयमेवाश्रित्य निषाद एव निषादस्थपतिरिति तत्र यौगिकत्वाविशेषात् कर्मधारयषष्ठीतत्पुरुषयो स्तुल्यबलत्वात् अग्निविद्ययोस्सत्वाच्च षष्ठीतत्पुरुषाश्रयणे त्रैवर्णिकानामन्यतमो निषादस्थपतिरिति प्राप्ते-

ब्रूमः। षष्ठीतत्पुरुषे पूर्वपदे सम्बन्धिनिलक्षणाप्रसङ्गात् षष्ठीसमासादुभयपदं मुख्यवृत्तस्य कर्मधारयस्य बलीयस्त्वात् तमाश्रित्य निषाद एव स्थपतिः स्थपतीष्टावधिक्रियतेति ॥

अत्रेदमवधेयम्-लक्षणायां गौरवमेव दुर्बलत्वे कारणम्। गौरवं कर्मधारयपक्षेऽप्यग्निविद्याकल्पनमस्ति यद्यपि, तथापि तस्य फलमुखत्वात् न कर्मधारय प्राबल्यहानिनिमित्तत्वमिति। अत एव "फलमुखगौरवं न दोषाये"ति कथ्यते पूर्वविषये प्राबल्यबाधयोग्यत्वादिति ॥

॥ इति षष्ठाध्यायस्य प्रथमः पादः ॥

(टि) पूर्वाक्षेपेणास्यारम्भः अत्र संशयकोट्योरन्ते तस्याधिकार इति शेषो द्रष्टव्यः। तुल्यबलत्वे कुतः षष्ठीतत्पुरुषाश्रयणीमित्यत्राह- अग्निविद्ययोः सत्वादिति। सिद्धान्ते त्वग्निविद्ययोः कल्प्यत्वात् गौरवमिति भावः। तदेवानूद्य दूषयति अत्रेदमित्यादिना ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे

॥ अथ षष्ठाध्यायस्य द्वितीयः पादः ॥

॥ सत्रे प्रत्येकस्य सत्रिणः फलसम्बन्धाधिकरणम् ॥

सू. पुरुषार्थैकसिद्धित्वात्तस्य तस्याधिकारः स्यात् ॥

(मू) द्वादशाहेन प्रजाकामं याजयेत् इति, तथा तत्र तत्र "एवंकामा एतावद्रात्रमुपेयुरिति, तथा" ऋद्धिकामाः सत्रमासीरन्निति तथा "सप्तदशावराः सत्रमासीरन्निति च। तत्र संशयः किं सत्रे समुदायस्य कर्तृत्वात् कृत्स्नस्य फलस्य समुदायगामित्वात् फलावयवानामेव प्रत्येकं प्रत्येकं प्राप्तेः फलावयवकामानां समुदायस्याधिकारः उत सप्तदशानां प्रत्येकं कर्तृत्वात् ऋद्धिकामा इत्युद्देश्यगत साहित्यस्याविवक्षितत्वात् कृत्स्नस्य फलस्य प्रत्येकं प्राप्तेः कृत्स्नफलकामानां प्रत्येकमधिकारः एकस्मिन्नेव प्रयोग इति।

तत्र ऋद्धिकामा इत्युद्दिश्यमानानां ऋद्धिकामानामेकशेषावगतेतरेतरयोग रुपसाहित्याविवक्षायान्याय्यत्वेऽपि आसीरन्निति बहुवचनेन सहप्रयोगावगमात् समुदायस्य कर्तृत्वावधारणात् कृत्स्नफलस्य समुदाय गामित्वात् फलावयवानामेव प्रत्येकं प्राप्तेः फलावयवकामानां समुदायस्याधिकार इति प्राप्ते-

ब्रूमः। "सत्रमासीरन्नित्येकस्मिन्नेव प्रयोगे बहूनां कर्तृत्वेन विधानात् प्रत्येकमेव कर्तृत्वात् उद्देश्यगतैकशेषावगतेतरेतरयोगसाहित्यस्याविवक्षित्वात् च कृत्स्नफलस्य प्रत्येकं प्राप्तेः कृत्स्नफलकामानामेकस्मिन्नेव प्रयोगे प्रत्येकमधिकार इति ॥

॥श्रीः ॥

॥ अथ षष्ठस्य द्वितीयः पादः ॥

(टि) इदानीमनेककर्तृकेषु अधिकारविशेषचिन्ता प्रस्तूयते। तत्र द्वादशाहेनेति। प्रकृतिदर्शनार्थं सप्तदशावरा इति। कर्तृसङ्ख्याप्रदर्शनार्थं संशय इति। संशयकोटिगतपञ्चम्यन्तानां तदर्थचिन्तापरत्वमित्युक्तं न स्मर्तव्यम्। बहुवचनेनेति। आख्यातोपात्तस्य बहुत्वस्य उपरितनाधिकरणन्यायेन विवक्षितत्वादिति भावः। समुदायस्येति। न

ह्येकस्मिन् कर्मणि बहूनां प्रत्येकं कर्तृत्वं सम्भवति। एकेन कृते परस्य कर्तुमशक्यत्वात्। अतः समुदितानां व्यासज्यैव कर्तृत्वमित्यभिप्रायः। बहूनां कर्तृत्वेनेति। यदि समुदायस्य कर्तृत्वं तदा समुदायस्यैकत्वादेक एव कर्ता स्यात्। ततश्चासीरन्निति बहुवचनं नोपपद्येत। अतः प्रत्येकमे व, कर्तृत्वम्। व्यासज्यवृत्तिकर्तृत्वे तु न कर्तृणां बहुत्वं, किन्तु द्रव्यमात्रस्य तत्र कर्तृबहुत्वाभिधानमसमञ्जसं स्यादित्यभिप्रायः। यत्त्वेकस्मिन् कर्मणि प्रत्येकं कर्तृत्वासम्भव इति तत् पर्यायेण कर्तृत्वे स्यान्न युगपत्कर्तृत्व इति॥

**॥ दर्शादौ कर्त्रैक्यनियमाधिकरणम्॥**

**सू. प्रयोगे पुरूषश्रुतेर्यथाकामी प्रयोगे स्यात्॥**

(मू) "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" "ज्योतिष्टोमेन स्वर्गकामो यजेतेति श्रूयते। तत्र संशयः-किमत्रैकस्य वा द्वयोर्बहूनां सह वा अधिकार इत्यनियम उत एकस्यैवेति नियम इति। तत्र उद्देश्यस्वर्गकामगतैकत्व सङ्ख्यायां अविवक्षितत्वादनियम इति प्राप्ते-

ब्रूमः। स्वर्गकाम इत्यत्र सङ्ख्या विवक्षितत्वेऽपि यजेतेत्याख्यातेन यागानुरक्तक्रियां विदधता क्रियागुणभूतत्वेनाक्षिप्तकर्तृपरिच्छेदिकायाः सङ्ख्याया आख्यातोपात्ताया विवक्षितत्वादेकस्यैवैकस्मिन् प्रयोगे अधिकार इति। अत्र स्वर्गकामपदगतं लिङ्गसङ्ख्यं अविवक्षितं, आख्यातोपात्ता सङ्ख्या तु विवाक्षिता। तदयं वाक्यार्थः "यः स्वर्गकामः स एकाकी सन्नात्मार्थं खर्गरूपफलं दर्शपूर्णमासयागेन कुर्यादिति॥

(टि) इदानीं प्रयोगाधिकारश्चिन्त्यते-अविवक्षितत्वादिति। अयमभिप्रायः-"स्वर्गकामो यजेतेत्यत्र स्वर्गकामोयागेन स्वर्गं प्राप्नुयादिति स्वर्गप्राप्तिरेवोच्यते नानुष्ठानम् तस्यार्थप्राप्तत्वेनाविधेयत्वात्। "यो हि यदिच्छति स तत् करोतीति फलविषया क्रिया प्राप्तैवेति स्वर्गप्राप्तौ च पुरुषस्थ प्रधानत्वात् ग्रहैकत्ववदविवक्षिता सङ्ख्या किञ्च स्वर्गकामः यागेन स्वर्गं कुर्यादिति क्रियाविधाने ऽन्योऽपि स्वर्गमाप्नुयात्; न कर्तेत्युक्तैव वचनव्यक्तिराश्रयणीया। तत्र च पुंसः प्रधानत्वादविवक्षिता सङ्ख्येति। संख्या। स्वर्गकाम इत्यत्रेति। नहि स्वर्गं प्राप्नुयादित्येतावत्युच्यमाने

अनुष्ठानं सिद्ध्यति प्रवृत्तस्याप्रवृत्तस्य वा मम स्वर्गप्राप्तिरिति सन्दिह्योदास्त एवेति। तस्मात् क्रियैव विधातव्या। तत्र च पुरुषस्य गुणत्वात् संख्या विवक्षितैवेत्यभिप्रायः। प्रसङ्गादाहात्रेत्यादि। आत्मनेपदलब्धमर्थमाह आत्मार्थमिति। एतेनान्योऽपि स्वर्गं प्राप्नुयान्न कर्तैवेत्येतत् प्रत्युक्तमिति द्रष्टव्यम्॥

**॥आरब्धकाम्यकर्मणोऽपि समाप्तिनियमाधिकरणम्॥**

**सू. प्रक्रमात्तु नियम्येत आरम्भस्य क्रियानिमित्तत्वात्॥**

(मू) "ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः" चित्रया यजेत पशुकामः" "कारीर्या यजेत वृष्टिकामः" इत्येवमादि समाम्नायते। तत्र संशयः- किं समाप्तेः शास्त्रार्थत्वात् कार्यकर्ममध्ये दैवात् फलावाप्त्यान्येन वा येनकेनचिन्निमित्तेन वीतायामपि फलेच्छायां प्रक्रान्तं काम्यं कर्म समर्थनीयं उत यागस्य फलोपायत्वे समाप्तेः शास्त्रार्थत्वाभावात् ऐच्छिकात् समापनीयं वा न वेति अनियमः; अथवारम्भस्य समाप्तिनिमित्तत्वात्; समापनीयमेवेति। तत्र समाप्तौ विधीयमानायां आरम्भमध्ययोराक्षेपलभ्यत्वात् समाप्तेः शास्त्रार्थत्वात् समापनीयमिति चेत्। उच्यते। यागस्य फलोपायत्वेन विधानात् समाप्तेः शास्त्रार्थत्वादानियम इति प्राप्ते-

ब्रूमः। निगर्हणरूपशिष्टाचारादारम्भस्य समाप्तिनिमित्तत्वात् प्रक्रान्तं कर्म अवश्यं समापनीयमिति। शिष्टा हि य आरब्धं न समापयन्ति तमेव विगर्हन्ते प्राक्रमिकोऽयं असंव्यवहार्य इति॥

(टि) इदानीं काम्यानामनुष्ठानमध्ये वीतरागस्याधिकारश्चिन्त्यते। आचार्यैरिदमधिकरणं सिद्धान्तेनोपक्रान्तम्। भाष्ये तु सिद्धान्तैकदेशिमतेनोपक्रान्तमित्यत्रापि तथैवोपक्रमते। श्रुत्या हि कर्मणो भाव्यतावगम्यते, वाक्याच्च कामस्य, तच्च दुर्बलम्। अतो न फलार्थं कर्म, किन्तु फलकामनायां निमित्ते कर्म कर्तव्यमित्येतावदुच्यते। यथा नित्येषु फलकामनया निमित्तत्वे नित्यानित्यसंयोगविरोधात् काम्यस्य भाव्यत्वं तथेह न भवति, काम्यानामनित्यत्वेन संयोगविरोधाभावात्। तस्मादत्र

कर्मैव भाव्यं कामो निमित्तमिति कामे निष्पन्ने निवृत्तेऽपि कर्तव्यमित्याशयेनाह-तत्र समाप्ताविति। एकदेशिमतं तावत् पूर्वपक्षी निराकरोति उच्यत इत्यादिना। न ह्यपुरूषार्थं कर्म भाव्यं भवतीत्युक्तम्। अत: कामो न निमित्तं किन्तु भाव्यमेवेति भाव:। विधानादिति। फलस्य पुरुषेण कर्तव्यतया विदितया उपायतामात्रं शास्त्रार्थ: न तु समाप्ति: इति ; अत एव शिष्टाचारो भ्रान्तिमूल इति भाव:। शिष्टरचारादिति। अयं भाव:- न भ्रान्तिमूल: शिष्टाचार:, किन्तु श्रुतिमूल एव। तथा च तैत्तिरीया: समामनन्ति "देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत न देवताभ्य आवृश्च्यत" इति। अत्र हि प्रक्रम्यासमापयन्तं निन्दित्वा प्रायश्चित्तं विधीयत इत्येषा श्रुतिरूक्तशिष्टाचारे मूलमिति। किञ्चावाप्तेऽपि फले न समाप्ति: कार्येत्यपि श्रूयेते "यदि वर्षेत्तावत्येव होतव्य"मिति। यद्यपि शिष्टाचारस्य प्रामाण्यं प्रथमेऽध्याय उक्तम्, तथाप्युक्तभ्रान्तिमूलत्व निराकरणार्थमिदमधिकरणम्॥

**॥ लौकिककर्मणि समाप्त्यनियमाधिकरणम्॥**

**सू. लोके कर्माणि वेदवत् ततोऽधिपुरुषज्ञानम्॥**

(मू) किं ग्रहं शकटं रथो वोपक्रान्तं विना यामपि फलेच्छायामवश्यसमापनीयमुतेच्छयोत्सृष्टव्यं वा समापयितव्यं वेत्यनियम इति संशय:। तत्र तक्षशास्त्रीयत्वात् समापनीयमिति प्राप्ते-

ब्रूम:। वेदकल्पक तक्षशास्त्रप्रमितस्याशास्त्रीयत्वादनियम इति तणां शास्त्रस्य वेदमूलत्वाभावात् तत्प्रमितेषु ग्र (गृ) हादिषु सामीकृतेषु त्यक्तेषु शिष्ट गर्हणाभावान्न तेषामारम्भस्य समाप्तिनिमित्तत्वमिति नावश्यं समापनीयमिति॥

(टि) पूर्वस्यापवाद: क्रियते-वेदमूलत्वाभावादिति। दृष्टार्थ त्वाद्वेदमूलत्वाभाव इति॥

**॥ प्रतिषिद्धकर्मणामनुष्ठानेऽनिष्टापाताधिकरणम्॥**

**(कलञ्जन्याय:)**

सू. प्रतिषेधेत्वर्थकर्मत्वात् क्रिया स्यात् प्रतिषिद्धानां विभक्तत्वादकर्मणाम् ॥

(मू) अनारभ्य श्रूयते-"न कलञ्जं भक्षयेत् न लशुनं न गृञ्जनमि"ति। तत्र संशयः-किमत्र.....भक्षणसङ्कल्पो विधीयते, तस्य विश्वजिन्न्यायेन स्वर्गफलं। ततश्च फलकामेन न भक्षयितव्यं, अन्येन भक्षयितव्यं; वर्जयितव्यं वा, अथवा प्रतिषेधः ततश्च कलञ्जादिभक्षणं निषिध्यते अतश्च भक्षणे प्रत्यवाय इति नियोगतो वर्जयितव्यमिति।

तत्र नञः प्रत्यक्ष...भावनासम्बन्धे प्रसक्तस्य पुरुषप्रवृत्तिरूपभावनाविरोधस्य परिहाराय धातुसम्बन्धाभ्युपगमात् पर्युदासः, ततश्चोक्तरीत्या फलकामेन न भक्षयितव्यं, अन्येन तु भक्षयितव्यं वा न वेति प्राप्ते-

ब्रूमः। पर्युदासे सङ्कल्पलक्षणाप्रसङ्गात् प्रतिषेधः। ततश्चोक्तरीत्या नियोगतो वर्जयितव्यमिति ॥

इदं त्ववधेयं क्रियासम्बन्धो (द्धो) नञ् प्रतिषेधः अन्येन सम्बद्धः पर्युदास इति ॥

(टि) इदानीं प्रतिषेधोधिकारश्चिन्त्यते-भावनाविरोधस्येति। भावनया हि प्रवृत्तिः नञा तु निवृत्तिः प्रतिपाद्यत इति विरोधः धातुसम्बन्धाभ्युपगमादिति। अयमाशयः-नञ् न कलञ्जभक्षयतिभ्यां व्यवहितत्वात् प्रत्ययेन सम्बध्यते। किञ्च भक्षणस्य श्रुत्या विधिसम्बन्धः, नञर्थस्य तु वाक्येन। श्रुतेश्च वाक्यं दुर्बलम्। अपि च प्रत्ययेन नञः सम्बन्धे विरोध इत्युक्तम्। तस्मात् प्रत्ययेन न सम्बध्यते। नापि कलञ्जेन, तस्याव्यवहितत्वेऽपि सुबन्तत्वात्। नञो हि सुबन्तेन सम्बन्धे नित्यसमासस्मरणात् समासेन भवितव्यम्। अतो धातुना सम्बन्धः। तस्य सुबन्तत्वाभावाच्च न समास इति पर्युदास इति।

अयं भावः-नञ्विशिष्टस्य धातोरर्थो भक्षणमत्र विधीयते। तच्चाभावरूपमित्यनुष्ठानाशक्यत्वान्नञिवयुक्तः तत्सदृश इति

भक्षणसादृश्यात् क्रियासामान्यं लक्ष्यते। ततो विशेषापेक्षायां सकलप्रवृत्तिनिवृत्तीनां सङ्कल्पपूर्वकत्वात् स एव प्रथमं प्रतीयत इति मुख्यत्वात् गृह्यत इत्यभक्षण सङ्कल्पविधिः। यथा प्रजापतिव्रतेषु "नोद्यन्तमादित्यमीक्षेते" त्यत्रानीक्षण सङ्कल्पविधिःतद्वदिति। फलकामेनेति। फलकामाधिकारमेवञ्जातीयकमनीक्षणसङ्कल्पो नित्यः आदित्योदयनिमित्तकत्वात् वाक्यशेषे पापनिबर्हण फलश्रवणाच्च विशेष इति। सङ्कल्पलक्षणप्रसङ्गादिति। अयमाशयः-नञः पर्युदासत्वे श्रुतेर्बाधः, व्यवहितान्वये तु वाक्यस्य। श्रुतिबाधाच्च वाक्यबाधोन्याय्यः, बाधविषये बलाबलवैपरीत्यात् श्रुतिबलीयस्त्वाद्वेति। यत्तु प्रत्ययार्थेन सम्बन्धे विरोध इति तत्तु धात्वर्थसम्बन्धेऽपि तुल्यम्। स्वभावः खल्वसौ नञः यदसौ येनैव केनचित् सम्बध्यते तदर्थस्यैव प्रत्यनीकं प्रतिपादयतीति। यत्त्वनीक्षणवदिति तन्न, "तस्य व्रतमित्युपक्रमविरोधात् पर्युदासः। इह तु स नास्तीति वैषम्यमिति। वर्जयितव्यमिति। यद्भक्षयेदिति रागप्राप्तक्रिया कर्तव्यतानुवादेन नेति निषिध्यते, भक्षणस्य कर्तव्यता या भावनावगता सा नास्ति। सन्निहितसुखलवदर्शनात्तु मोहात्तस्य कर्तव्यता भावनावगतेति वाक्यार्थः। यत् कुर्यात्तन्नेति निषेधवाक्यानां वचनव्यक्तिरिति। एवं च विध्यर्थप्रवर्तनया सम्बध्यमानो नञ् स्वभावान्निवर्तनां, प्रतिपादयति। प्रवृत्तिफलो व्यापारः प्रवर्तना निवृत्तिफलश्च निवर्तना। ततश्च यथा विधेः प्रवर्तनान्यथानुपपत्या यागादेः समाहितसाधनत्वं कल्प्य तथा निषेधस्या निवर्तनान्यथानुपपत्त्या तद्विषयीभुतधात्वर्थस्य प्रत्यवायसाधनता कल्पयितव्येति तत्परिहारः फलमिति। इष्टसाधनतैव विध्यर्थ इति पक्षे अनिष्टसाधनता निषेधार्थ इति, सर्वथा प्रत्यवायपरिहार एव निवृत्तेः फलमिति। पर्युदासप्रतिषेधौ विवेचयति-इदं त्वित्यदिना॥

**॥ गुर्वनुगमनादीनामुपनयनोत्तरकालकर्तव्यताधिकरणम्॥**

**सू. तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेरन्॥**

(मू) इह स्मार्ताः पदार्थ उदाहरणं "प्र (प्राङ्) मुखो ऽन्नानि भुञ्जीत" "गुरुरनुगन्तव्यः अभिवादयितव्यः" "वृद्धवयाः प्रत्युत्थेयः स मन्तव्य"

इत्यादय: नियमाः "न (ना) नृतं वदेत्" न कलञ्जं भक्षयेत्" इत्यादयो यमाश्च।

तत्र संशय:-किं जातमात्राणां समर्थमात्राणामेते पदार्था: उतोपनीतानामिति। तत्रोपनयनाधिकारि विशेषणतयानुपादाय पुरुषमात्रे विधीयमानत्वात् समर्थमात्राणामेते पदार्था इति प्राप्ते-

ब्रूम: "उपनयनादिनियम" इति पृथगुपनयात् कामचारवादभक्ष" इति च स्मरणादुपनीतानामेते पदार्था इति॥

अत्रेदमवधेयम् "सुरा न पेया" "ब्राह्मणो न हन्तव्य" इत्यादय: जातमात्रेण न कर्तव्या:, तथैव शिष्टै: स्मरणात्। अन्यांस्तु प्रतिषिध्दानपि "कामचारवादभक्ष" इति प्रतिप्रसूतत्वात् अनुपनीती करिष्यतीति॥

(टि) इदानीं यमनियमाधिकारविशेषचिन्ता। जातमात्राणामित्यस्यार्थमाह-समर्थमात्राणामिति। विधीयमानत्वादिति। अनग्निसाध्यत्वेनामन्त्रसाध्यत्वेन चाग्निविद्ययोरपेक्षाभावाच्चेति द्रष्टव्यम्। समर्थमात्राणामिति। शक्तमात्राधिकारा एवंजातीयका इत्यर्थ:। प्रतिप्रसूतत्वादिति। येषां प्रतिप्रसवो नास्ति न कर्तव्या इति यावत्॥

**॥ अग्निहोत्रादि यावज्जीवकर्मणां स्वकालमात्रकर्तव्यताधिकरणम्॥**

**(अग्निहोत्रन्याय:)**

**सू. अभ्यासोऽकर्मशेषत्वात् पुरुषार्थो विधीयते॥**

इदमामनन्ति "यावज्जीवमग्निहोत्रं जुहोति" यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति। तत्र काम्यादन्यत्राङ्गत्यागेनापि प्रयोग: स्थास्यति। द्विविधानि चाङ्गानि क्रतुविधिप्रयुक्तानि अङ्गानीति। तत्र काल: श्रूयते "प्रदोषे अग्निहोत्रं होतव्यं व्युष्टायां प्रातरिति। अथ "तावन्न पौर्णमास्यां पौर्णमास्या यजेत अमावास्यायाममावास्यया यजेतेति आधानस्वाध्यायविधिं चाग्निविद्येऽप्यङ्गत्वेन लभ्यते। तत्र संशय:- किमङ्गान्तरवत्-कालाद्यपि परित्यज्यानुष्ठातव्यं तत: सांतत्येन अग्निहोत्रादि कर्तव्यमुत कालाद्यनुरोधेनैवानुष्ठातव्यं तत: सांतत्येन

नानुष्ठातव्यमिति। तत्राङ्गत्वाविशेषात् कालाद्यपीत्युक्तरीत्यार्था विरुद्धसर्वकाम्येषु सांतत्येनानुष्ठातव्यमिति प्राप्ते-

ब्रूमः। कालाग्निविद्यावन्तमधिकृत्य कर्मानुष्ठानविधानात् कालाद्यनुरोधेनेत्याद्युक्तरीत्या सांतत्येनानुष्ठातव्यमिति। तस्मादनग्नेरविद्यस्य चाकाले च नास्त्यधिकार इति सिद्धम्॥

(टि) इदानीं नित्यनैमित्तिकाधिकारश्चिन्त्यते। काम्यादन्यत्रेति। नित्यनैमित्तिकेष्वित्यर्थः। क्रतुविध्यप्रयुक्तानीति।

तत्र कालस्य पुरुषेण सम्पादयितुमशक्यत्वात् क्रतुविध्यप्रयुक्तिः, अग्निविद्ययोश्च विध्यन्तरसिद्ध त्वात् संपादनस्येति विशेषः। अङ्गत्वाविशेषादिति। अग्निहोत्रस्य दर्शपूर्णमासयोश्च जीवने निमित्ते विधानेन नैमित्तिकत्वात् कालार्थत्वेन कालाग्निविद्याविधि सार्थक्याच्चेत्यपि द्रष्टव्यम्। कर्मानुष्ठानविधानादिति। यत् प्रयोगविधिना कर्तव्यतया चोद्यते तदेव यथाशक्तीत्युपबध्यते यथाशक्तीत्यस्य कर्तव्यविशेषणत्वान्न तु कालः कर्तव्यतया चोद्यते अशक्यत्वात् कर्तुम्। नाप्यग्निविद्ये विध्यन्तरसिद्धत्वादिति। किञ्च कालस्यानुपादेयत्वात् तस्मिन् कर्म विधीयते, अस्मिन् काले प्राप्ते कर्म कर्तव्यमिति च वचनव्यक्तिः। ततश्च तत्कालमेव जीवनं निमित्तं न कालान्तर इति न तत्रानुष्ठानमिति अग्निविद्ययोश्चैषा वचनव्यक्तिः अग्निमान् विद्वांश्चाधिक्रियेतेति। "य एवं विद्वानग्निहोत्रमि"त्यादि प्रत्यक्षमेव सर्वत्र विद्यावतो ऽधिकारः श्रूयत इति। तदेतत् सकलमभिप्रेत्योपसंहरति तस्मादित्यादिना॥

**॥ अग्निहोत्रादीनां स्वकालावृत्त्यावृत्त्यधिकरणम्॥**

**सू. तेषामौत्पत्तिकत्वादागमेन प्रवर्तेत॥**

(मू) "प्रदोषे अग्निहोत्रं होतव्यं व्युष्टायां प्रातरिति, तथा" "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेतेति श्रूयते। तत्र संशयः-किं सकृत् प्रदोषादौ अग्निहोत्रादीनि कर्तव्यानि उतागते आगते

प्रदोषा दिकाले कर्तव्यानीति। तत्र सकृत् कृतेष्वपि कालशास्त्रस्य कृतार्थत्वात् सकृत् कर्तव्यानीति प्राप्ते-

ब्रूमः। प्रदोषादिकाले विशिष्टजीवनस्य निमित्तत्वात् आगते प्रदोषादिकाले कर्तव्यानीति निमित्तावृत्तौ नैमित्तिकावृत्तिरिति बोध्यम्॥

(टि) एवं प्रदोषादिकाले जीवनं निमित्तमिति कालवशेन जीवननिमित्तस्य सङ्कोच उक्तः। अधुना तस्यापवादः क्रियते- कृतार्थत्वादिति। कालशास्त्रानुरोधेन निमित्तसङ्कोचस्योक्तत्वाच्चेति द्रष्टव्यम्। प्रदोषादीति। अयमाशयः-सत्यं; कालवशेन निमित्तसङ्कोचः। तेन्न चैतावद्भवति; तत्कालं जीवनं निमित्तमिति। नहि कालशास्त्रस्य तत्काले कर्तव्यतामात्रपरत्वं येन सकृत् कृते कृतार्थत्वं स्यादिति। निमित्तावृत्ताविति। अधिकारावृत्तावित्यर्थः।

## ॥ दर्शादौ भेदाद्यावृत्त्या होमावृत्त्यधिकरणम्॥

## सू. तथा अन्तः क्रतुप्रयुक्तानि॥

(मू) दर्शपूर्णमासयोः श्रूयते-"भिन्ने जुहोति" "स्कन्ने जुहोतीति"। तत्र संशयः-किं सकृद्भिन्ने स्कन्ने च होमः कर्तव्यः उत यावद्भिन्नस्कन्नमावर्तनीय इति। तत्र सकृत्कृते शास्त्रस्य कृतार्थत्वात् सकृत् कर्तव्य इति प्राप्ते-

ब्रूमः। भेदनादीनां निमित्तत्वात् तदावृत्तौ आवर्तनीयमिति। अत्र भेदनहोमादिषु क्रतूपकारव्यतिरेकेण फलाभावात् तस्य सकृत्कृतेन कृतत्वात् नास्त्यावृत्तिशङ्का। आवृत्तिषु भेदनादिषु आवृत्तेनैव होमेनोपकारसम्पत्तिरित्युत्तरमिति॥

(टि) एवं पुरुषार्थं नैमित्तिकं निमित्तावृत्तावावर्तत इत्युक्त्वा क्रत्वर्थे कथमिति विचार्यते। कृतार्थत्वादिति। क्रतूपकारस्य सिद्धत्वादित्यर्थः। अयमभिप्रायः-पुरुषार्थेषु तावत् प्रतिप्रयोगं फलभेदादैश्वर्यलक्षणस्याधिकारस्यावृत्तिरिति युक्तं नैमित्तिकावृत्तिः। इह तु फलस्यैकत्वादधिकारावृत्त्यभावान्नाधिकारावृत्तियुक्तेति। निमित्तत्वादिति। सत्यं न फलभेदः किं त्वेकमेव फलं भिन्नादिष्वावृत्तेष्वावृत्तेनैव होमेन

सम्पद्यते, यथा असति भेदने भेदनहोमेन विना क्रतूपकार इतरैरङ्गैर्जन्यते, सति भेदने तु स एव भेदनहोमेन सहेति तथावृत्ते भेदने सत्यावृत्तेन होमेन सहेति भावः। पौनरुक्त्येयमाशङ्क्याह अत्रेत्यादिना॥

॥ गुर्वनुगमनादीनां प्रतिनिमित्तमावृत्यधिकरणम्॥

**सू. आचाराद् गृह्यमाणेषु तथा स्यात् पुरुषार्थत्वात्॥**

(मू) "गुरुरनुगन्तव्योऽभिवादयितव्यः" "वृद्धवयाः प्रत्युत्थेयः" "स मन्तव्य" इति स्मर्यन्ते। तत्र संशयः-किं गुर्वनुगमनादीनि सकृत् कर्तव्यानि उत निमित्तावृत्तौ आवर्तनीयमिति। तत्र सकृत् कृते शास्त्रार्थस्य कृतत्वात् सकृत् कर्तव्यानीति प्राप्ते,

ब्रूमः। गुरुगमनादीनां निमित्तत्वात् निमित्तावृत्तौ आवर्तनीयानीति। अत्रानुगमनादीनां दृष्टार्थत्वात् नावृत्तिरिति शङ्का। दृष्टार्थेष्वपि यथाशास्त्रमेवानुष्ठानमित्युत्तरम्॥

(टि) एवं पुरुषार्थानां क्रत्वर्थानां च निमित्तावृत्तावावृत्तिमुक्त्वा दृष्टार्थानां निमित्तावृत्तावावृत्तिरुच्यते। दृष्टार्थत्वान्नावृत्तिरिति। अयमाशयः- अनुगमनाभ्युत्थानाभिवादनादिभिः प्रीतो गुरुः सम्यग्विद्यां ददातीति यथाऽनुष्ठिते स प्रीतो भवति तथा कर्तव्यम्। सकृद्वासकृद्वा नावश्यमावर्तनीयमिति। यथा शास्त्रमिति। दृष्टार्थेष्वपि नियमादृष्टत्वात्तस्य च शास्त्राधीनत्वाद्यथाशास्त्रमनुष्ठेयमिति भावः॥

॥ ऋणत्रयापाकरणस्य ब्राह्मणक्षत्रियवैश्यानां नित्यताधिकरणम्॥

**सू. ब्राह्मणस्य तु सोमविद्याप्रजामृणवाक्येन संगोगात्॥**

(मू) इदं श्रुयते-"सोमेन यजेत" "गर्भाष्टमे ब्राह्मणमुपनयीत" "स्वाध्यायमधीयात्" "प्रजामुत्पादयेत्" इति। तत्र संशयः, किं सोमविद्याप्रजं नियतमुतानियतमिति। तत्र श्रुतस्य विश्वजित्कल्पितस्य वा स्वर्गब्रह्मवर्चसफलस्य संयोगादनियतं काम्यमिति प्राप्ते-

ब्रूमः। वीत्सायुक्तकालनिमित्तत्वस्यावश्यापेक्षितसाधनत्वस्य अकरणे प्रत्यवायस्मरणस्य सोम विद्याप्रजं नियतं नित्यमिति। तत्र सोमवत् "वसन्ते

वसन्ते ज्योतिषा यजेत" इति वीप्सायुक्तकालस्य निमित्तत्वात् नित्यत्वं, अध्ययने चावश्यकजपयज्ञप्रायश्चित्तपारयणाद्युपयोगिग्रन्थावधारणफलत्वेन अवश्यापेक्षितसाधनत्वान्नित्यत्वं, प्रजोत्पादने च "अनुत्पाद्य सुतान् मोक्षमिच्छन् व्रजत्यध" इति अकरणे प्रत्यवायस्मरणात् नित्यत्वमिति विवेक:।

अथवा किं सोमादयो ब्राह्मणस्य नियता: राजन्यवैश्ययोस्त्वनियता उत सर्वेषां नियता इति संशय:। तत्र "जायमानो वै ब्राह्मण: त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्य: प्रजया पितृभ्य: एष वा अनृणो य:पुत्री यज्वा ब्रह्मचारिवासी" त्यस्मिन् ऋणवाक्ये ब्राह्मणसङ्कीर्तनात् ब्राह्मणस्य नियता इतरयोस्त्वनियता इति प्राप्ते-

ब्रूम:। "वसन्ते वसन्ते" इत्यादिचोदनासु विशेषाश्रवणात् सर्वेषां नियता इति। ऋणवाक्ये ब्राह्मणग्रहणं तु प्रदर्शनार्थमिति स्थितम्॥

## ॥ इति षष्ठाध्यायस्य द्वितीय: पाद:॥

(टि) इदानीमावश्यककर्मविषयविचाराधिकारात् सोमादीनामप्यावश्यकत्वमस्ति नास्तीति चिन्त्यते। लक्षणसङ्गतिस्तु स्पष्टैव। तत्र श्रुतस्येति। सोमे तावत् "ज्योतिष्टोमेन स्वर्गकामो यजेतेति कामसंयोग: श्रूयते, विद्यायामपि सप्तमे ब्रह्मवर्चसकाम उपनयीतेति श्रूयते, प्रजायां तु कल्प्यत इति। यद्यप्युपनयने कामसम्बन्ध: श्रुतस्तथापि तस्याध्ययनाङ्गत्वान्न स्वातन्त्र्यमिति प्रधानद्वारेण फलसम्बन्ध इति भाव:। आग्निहोत्रादिवद्यावज्जीवचोदनाभावाच्चेत्यपि द्रष्टव्यम्। काम्यमिति। सोमादय: फलकामाधिकारा न जीवाधिकारा इत्यर्थ:। वीप्सायुक्तकालस्येति। वीप्सायुक्त: कालो निमित्तत्वेनैवान्वेतुमर्हति नाङ्गत्वेन। तथा सति वीप्सार्थानुपपत्ते:। स हि द्वेधैवोपपद्यते अनूद्यते विधीयते वेति। तत्र न तावदनुवाद:, प्राप्त्यभावात्। न हि वीप्सायुक्त एव वसन्ते ऽङ्गत्वेन विहिते यावद्वसन्तमनुष्ठानं प्राप्नोति, न ह्यङ्गमस्तीति कृत्वा प्रधानमनुष्ठातव्यं भवति, तन्न तावदनुवाद:, नापि विधि:, अशक्यत्वात्। नहि सर्ववसन्तव्यापी ज्योतिष्टोमो ऽनुष्ठातुं शक्यते,

पञ्चाहादिसमाप्यत्वात्तस्य। नापि यावद्वसन्तमभ्यस्येदिति विधिः, यजेतेत्यस्याभ्यासे लक्षणापत्तेः तस्मान्निमित्तमेव वसन्तः सप्तम्या प्रतिपाद्यत इत्यभिप्रायः अध्ययन इति। अत्र यदुक्तं ब्रह्मवर्चसादिफलमिति तन्न। अध्ययनाङ्गभूतोपनयनाश्रित-सप्तमवर्षादिगुणफलत्वात् ब्रह्मवर्चसादेरिति द्रष्टव्यम्।

अत्र भाष्यकारेण वर्णकान्तरं कृतं, तद्दर्शयति अथवेत्यादिना॥

**॥इति केरलीये षोडशाध्यायीटिप्पणे**

**षष्ठस्याध्यायस्य द्वितीयः पादः**

**॥ समाप्तः ॥**

**॥श्रीः ॥**

## ॥ अथ षष्ठाध्यायस्य तृतीयः पादः ॥

## ॥ नित्ये यथाशक्त्यनुष्ठानाधिकरणम्॥

**सू. सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशात्॥**

(मू) बह्वृचब्राह्मणे श्रूयते-"यावज्जीवमग्निहोत्रं जुहोति; यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति; नित्यमग्निहोत्रं नित्यौ च दर्शपूर्णमासौ। तत्र संशयः-किं सर्वाङ्गोपसंहारसमर्थो यः पुरुषः तस्यैव नित्ये कर्मण्यधिकारः उत एकदेशाङ्गोपसंहारसमर्थः तस्याप्यधिकार इति। तत्र काम्यवन्नित्यानामपि सर्वाङ्गोपेततया फलाय विधानात् सर्वाङ्गोपसंहारसमर्थस्यैव नित्यकर्मस्वधिकार इति प्राप्ते-

ब्रूमः। सर्वाङ्गोपेतं यावज्जीवं न शक्नोति कश्चिदपि कर्तुमिति कृत्वा यावच्छक्नुयात् तावत् कर्तव्यमिति। एवं कल्पनान्नित्यकर्मसु एकदेशाङ्गोपसंहारसमर्थस्याप्यधिकार इति।

अत्र नित्यकर्मणां फलमङ्गानि च न सन्तीत्येकः पक्षः। अप्रत्यवायः फलमित्यन्यः पक्षः। प्रत्यवायानुत्पत्तिः फलमिति इतरः। पापक्षयः फलं अकरणे च प्रत्यवाय इति सिद्धान्तः। ततश्चान्ततः प्रधानमात्रमपि कर्तुं

शक्नोति चेत्, तन्मात्रमपि कर्तव्यमिति स्थितम्।

इदं त्ववधेयम्-अत्राकरे सर्वेषु विधिवाक्येषु धात्वर्थ: करणमिति स्थितम्। द्वितीये तु क्वचिद्धात्वर्थ: करणं क्वचित्तु कर्मेति स्थितम् तत् पक्षान्तरपरतया समाधेयमिति॥

॥श्री: ॥

## ॥अथ षष्ठस्य तृतीय: पाद: ॥

(टि) इदानीं नित्येषु कतिपयाङ्गयुक्तस्याधिकार: प्रतिपाद्यते। अस्मिन् पादे यथाशक्तिप्रयोगश्चिन्त्यते। काम्यवदिति। यथा स्वर्गकामवाक्येन सर्वाङ्गोपेतमग्निहोत्रादि फलाय विहितं तथा यावज्जीववाक्येनापि विशेषाभावात्। ततश्च हीनाङ्गं न फलसाधनं फलाभावे च नाधिकार इति। इदानीं विस्तरभयाद्विरम्यत इति।

### (मू) ॥ अङ्गवैकल्ये काम्यस्य निष्फलत्वाधिकरणम्॥

### सू. काम्येषु चैवमर्थित्वात्

"ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम:" "सौम्यं चरुं निर्वपेत् ब्रह्मवर्चसकामो" "वैश्वदेवीं निर्वपेत् ग्रामकाम" इत्यादिष्वैकान्तिककाम्येषु विकृतिषु प्रकृतिषु च दर्शपूर्णमासादिषु पाक्षिककाम्येषु च संशय: किं काम्येष्वपि एकदेशाङ्गोपसंहारसमर्थस्याप्यधिकार उत सर्वाङ्गोपसंहारसमर्थस्यैवेति। तत्र स्वर्गकामादिमात्रस्याधिकारात् एकदेशाङ्गोपसंहारमात्रस्याप्यधिकार: काम्येष्विति प्राप्ते-

ब्रूम:। सर्वाङ्गसहितप्रधानस्यैव फलाय विधानात् सर्वाङ्गोपसंहारसमर्थस्यैव काम्येष्वधिकार इति। तस्मान्नित्येऽकरणे प्रत्यवायश्रवणात् यावज्जीवं सर्वाङ्गोपसंहारसामर्थ्यासम्भवाच्च यावच्छक्नुयात् इत्युपबध्यते। काम्येषु नाकरणप्रत्यवायाभावात् तथोपबन्धकल्पने प्रमाणाभावात् सर्वाङ्गोपसंहारसमर्थ एवाधिकारीति वैषम्यमिति। ततश्च काम्यानां यदा सर्वाङ्गो ऽनुष्ठातुं शक्नुयात् तदैवानुष्ठानं, अन्यथा नित्यानां त्वशक्तस्य यावन्त्याङ्गानि सम्पादयितुं पारयति

तावद्भिरुपेतस्य प्रधानस्यानुष्ठानं, शक्तस्य तु सर्वाङ्गोपेतस्येति स्थितम् ॥

(टि) इदानीं काम्येषु सर्वाङ्गयुक्तस्याधिकारः प्रतिपाद्यते। यथा पूर्वाधिकरणे निमित्तमूलादङ्गत्याग उक्तः तथा स्वर्गकामादिमात्राधिकारबलादप्यङ्गत्यागः स्यादिति पूर्वाधिकरणसिद्धान्तजनितशङ्कानिवारणार्थं चेदमधिकरणम्। काम्यनित्ययोर्विशेषमेव दर्शयति-तस्मान्नित्येष्वित्यादिना। नच काम्येषु कामना निमित्तं, तेन नावश्यकत्वं शाब्दम्। अङ्गानि तु शाब्दानि न बाधितुं शक्यन्ते। नैमित्तिकेषुशाब्दमावश्यकत्वं प्रधानस्येति तदविरोधायाङ्गानि यथाशक्ति गृह्यन्त इति च विशेष इति ॥

## ॥ द्रव्यभेदेऽपि कर्माभेदाधिकारणम् ॥

### सू. क्रियाणामाश्रितत्वात् द्रव्यान्तरे विभागः स्यात् ॥

(मू) दर्शपूर्णमासयोः व्रीहिमयेन पुरोडाशेन याग उक्तः। तत्र यदा व्रीह्यसम्भवे नीवारान् प्रतिनिधाय तन्मयेन पुरोडाशेन यागः क्रियते तदा संशयः-किं द्रव्यान्तरे कर्मभेदो ऽस्ति वा न वेति। तत्र क्रियाश्रयस्य द्रव्यस्य भेदात् द्रव्यान्तरे कर्मभेद इति प्राप्ते-

ब्रूमः। आश्रयात् भिन्नस्याश्रितस्याश्रयभेदप्रयुक्तभेदासम्भवात् न द्रव्यान्तरे कर्मभेद इति यथा भूतव्यक्तिभेदे जातेः न भेदः तथा द्रव्यभेदे ऽपि भेदसहिष्णुरभेद एव तादात्म्यात् नान्ताभेद इति सर्वं स्मरणीयमिति। तस्मात् व्रीह्याद्यभावे प्रतिनिध्युपादानं युक्तमिति ॥

(टि) इतः प्रभृत्यापादपरिसमाप्तिर्यथाशक्ति प्रयोगगतविशेषचिन्ता। तत्र प्रतिनिधिविचोरोपोद्घाततया इदमारभ्यते। द्रव्याश्रयसयेति। द्रव्यस्यैव स्वरूपं स्वभावो वा क्रिया नार्थान्तरमिति भावः। कर्मभेद इति। तस्मान्न प्रतिनिध्युपादानमिति। आश्रयाद्भिन्नस्येति। अयमपि चलत्ययमपि चलतीति भिन्नेषु द्रव्येष्वेकाकारप्रत्यक्षदर्शनादाश्रयाद्भिन्नत्वं क्रिया इति भावः। एतेन क्रियायाः प्रत्यक्षत्वमपि स्फुटीकृतम्। क्रियानुमेया न प्रत्यक्षेति केचित्। तन्नेत्यवगमयितुं अत्र पार्थसारथिमिश्रैर्बहुपराक्रमेण क्रियायाः प्रत्यक्षत्वं प्रसाध्य पुनरुक्तम्। पराक्रान्तमेवात्र

भगवन्मण्डनप्रभृतिभिरुक्तं; अतो बालव्युत्पादनाय प्रवृत्तेन मयापि विस्तरभयादुपरम्यते। ननु क्रियाक्रियावतोरभेद एवेति तव मतमित्यत्राह यथेत्यादिना ॥

**॥ द्रव्यापचारे प्रतिनिधिना समापनाधिकरणम् ॥**

**सू. श्रुतिप्रमाणत्वात् शिष्टाभावे नागमोऽन्यस्याशिष्टत्वात् ॥**

(मू) अग्निहोत्रादीनि कर्माणि उदाहरणम्। तत्र संशयः-श्रुतद्रव्याभावे कर्मणां न प्रयोगः कर्तव्यः उत प्रतिनिधिमुपादाय प्रयोगः कर्तव्य इति। तत्र नीवारादीनां प्रतिनिधित्वेनाविधानात् न प्रतिनिधिमुपादाय प्रयोगः। किन्तु श्रुतद्रव्याभावे प्रयोग एव न कर्तव्य इति प्राप्ते-

ब्रूमः। अवश्यकर्तव्यत्वान्नित्येषु प्रारब्धेषु च काम्येषु श्रुतद्रव्याभावे प्रतिनिधिमुपादाय प्रयोगः कर्तव्यः। प्रारब्धं च कार्य समापयितव्यं; न तु तदन्तमेवोत्सृष्टव्यमिति ॥

(टि) अतः परमतिप्रसङ्गनिराकरणेन नैमित्तिके स्थापितस्य यथाशक्तिप्रयोगस्य शेषत्वेन प्रतिनिधिविचारः प्रस्तूयते अविधानादिति। अयमाशयः-नीवाराणां विधिस्तावन्नास्तीत्यविवादम्। नापि कर्मचोदना द्रव्यान्तरोपादानं विधत्ते, कर्मविधिमात्रपर्यवसानात्तस्याः। व्रीहिचोदना तु व्रीहिविधिमात्रपर्यवसानान्न द्रव्यान्तरं विधत्त इति। अवश्यकर्तव्यत्वादिति। अयं भावः-कर्मचोदनाक्षिप्तं द्रव्यं व्रीहिशास्त्रेण नियम्यते न विधीयते। ततश्च यदा व्रीह्यभावात् व्रीहिचोदनोदास्ते तदा कर्मशास्त्रमन्यद्रव्यमाक्षिपत्यवश्य कर्तव्यतावगमकत्वादिति। नित्येष्विति। नित्येष्वनारब्धेषु प्रारब्धेषु च, काम्येषु तु प्रारब्धेष्वेव नानारब्धेषु प्रतिनिधिः, तत्रावश्यककर्तव्यत्वाभावादित्यर्थः। काम्यानां नावश्यकत्वमित्याशंक्याह-प्रारब्धमिति। सत्यं काम्यानां नावश्यकत्वं, तथापि प्रारब्धं समापयितव्यमेव, अन्यथा शिष्टाचारविरोधः स्यादिति पूर्वमेवेदमुक्तमिति ॥

**॥ देवतामन्त्रक्रियापचारे प्रतिनिध्यभावाधिकरणम् ॥**

**सू. न देवताग्निशब्द क्रियमन्यार्थसंयोगात् ॥**

(मू) देवतानामाहवनीयाद्यग्नीनां मन्त्राणां प्रयाजादिक्रियाणां च प्रतिनिधिरुपादातव्य उत नेति संशयः। तत्र पूर्वन्यायात् उपादातव्य इति प्राप्ते-

ब्रूमः। मुख्यकार्यसम्पत्तिरूप प्रतिनिधिन्यायाभावात् न प्रतिनिधिरुपादातव्य इति। देवतासु मन्त्रेषु च शब्दनियमान्नियमादृष्टस्य अग्निषु क्रियासु च तत्तज्जन्यादृष्टस्य च प्रतिनिधिभिन्न सम्पत्तिरिति प्रतिनिधिन्यायाभाव इति॥

(टि) एवं स्थिते प्रतिनिध्युपादाने अधुनापवाद आरभ्यते त्रिभिरधिकरणैः। देवतानामिति। देवतामन्त्रक्रियाणां विस्मरणमेवापचार इति बोध्यम्। अवघावादीनां दृष्टार्थानां क्रियाणां नखनिर्लुञ्छनादिप्रतिनिधिः सम्भवतीत्याशयेनाह-प्रयाजादीति। शब्दनियमादिति। किञ्च देवता विधिलक्षणा तस्मादन्या नीयमाना न देवता भवतीत्यतो ऽपि तत्र प्रतिनिध्यभाव इति॥

**॥ प्रतिषिद्धद्रव्यस्य प्रतिनिधित्वाभावाधिकरणम्॥**

**सू. प्रतिषिद्धं चाविशेषेण हि तछ्रुतिः॥**

(मा) माषादयः प्रतिनिधातव्या उत नेति। "मौद्गं चरुं निर्वपेत् श्रीकामः" इत्यादिषु संशयः-किंमुद्गाभावे माषादयः प्रतिनिधातव्या उत नेति। तत्र प्रतिनिधित्वेनाप्रतिषिद्धत्वात् प्रतिनिधातव्या इति प्राप्ते-

ब्रूमः। "अयज्ञिया वै माषा वराकाः कोद्रवा" इत्यनेनाङ्गत्वेन प्रतिनिधित्वेन वा प्राप्तानां माषादीनां प्रतिषेधात् न माषादयः प्रतिनिधातव्या इति॥

(टि) अत्रा"यज्ञिया वै माषा" इत्येतदुदाहरणम्। माषादयः प्रतिनिधातव्या न वेत्येवाधिकरणशरीरम्। सदृशमेवद्रव्यं प्रतिनिधेयमिति। मौद्ग एव माषस्य प्रतिनिधित्वमित्यभिप्रायेण माधवाचार्यैर्मौद्गवाक्यमुपन्यस्तमिति तदनुरोधेनात्राप्युपन्यस्तमिति। प्रतिनिधित्वेनेति। यज्ञाङ्गत्वेनैव निषेधः। नहि प्रतिनिधिर्यज्ञाङ्गं, किन्तु तद्गतो मुख्यावयव

इति भाव: ।।

## ।। स्वामिन: प्रतिनिध्यभावाधिकरणम् ।।

### सू.स्वामिन: फलसमवायात् फलस्य कर्मयोगित्वात् ।।

(मू) अग्निहोत्रादीनि कर्माण्युदाहरणम्। तत्र संशय:-किं प्रोषिते कार्यान्तव्यापृते मृते वा यजमाने याजमानपदार्थानुष्ठानार्थं पुरुषान्तरं प्रतिनिधेयमुत नेति। तत्र चोदनार्थाविशेषात् यथा व्रीह्याद्यपचारे नीवारादय: प्रतिनिधीयन्ते तथा पुरुषान्तरं प्रतिनिधेयमिति प्राप्ते-

ब्रूम:-दक्षिणादानहविस्त्यागादि कुर्वत: फलवत एव यजमानत्वान्न पुरुषान्तरं प्रतिनिधेयमिति।

(टि) दक्षिणादानेति। दक्षिणादानहविस्त्यागयोरन्येन कर्तुमशक्यत्वादाज्यावेक्षणादीनां क्रत्वर्थानां तावद्यथासमाख्यमध्वर्य्वादीनां कर्तृत्वात् फलसंस्कारास्त्वन्येन क्रियमाणा वा यजमाने फलानुभवयोग्यतां जनयन्तीति व्यर्थ: प्रतिनिधिरित्यभिप्राय: ।।

## ।। सत्रेकस्यचित् स्वामिनो ऽपचारे प्रतिनिध्यादानधिकरणम् ।।

## (सत्रन्याय:)

### सू. बहूनां तु प्रयुक्तेऽन्यमागमयेदवैगुण्यात् ।।

(मू) सत्राण्युदाहरणम्- "सप्तदशावरा: सत्रमासीरन्नि"ति। तत्र कस्मिंश्चित् स्वामिन्यपचरति संशय:-किमन्य: प्रतिनिधातव्यो नेति। तत्र पूर्वाधिकरणन्यायेनान्यो यजमान: प्रतिनिधातव्य इति प्राप्ते-

ब्रूम:। स्वामित्वेनांशेन प्रतिनिधेयत्वेऽपि ऋत्विग्रूपकर्तृत्वांशेन प्रतिनिधेयत्वात् सत्रेषु च यजमान: प्रतिनिधातव्य एवेति ।।

(टि) स्वामिनो न प्रतिनिधिरित्युक्तम्। तस्यापवाद आरभ्यते-यजमान

इति। "ये यजमानास्त ऋत्विज" इति आर्त्विज्यमुद्दिश्य स्वामिवाचकेन यजमानशब्देन स्वामित्वं विधीयते। स्वामित्वं च प्रतिनिहितस्य न सम्भवतीति व्यर्थ: प्रतिनिधिरिति। स्वामित्वांशेनेति। अयमाशय:-

काम्यमपि कर्म यदा प्रवृत्तं तदावश्यं समापनीयमित्युक्तम्। आवश्यकानां च यथाशक्ति प्रयोग इत्युक्तम्। अतो यद्यपि यजमानशब्दस्य स्वामिभूतकर्तृवाचकत्वादेकपदोपात्तयोः स्वामित्वकर्तृत्वयोः विनापि वाक्यभेदमार्त्विज्योद्देशेन विधिः सम्भवतीति स्वामी कर्ता च तत्र उत्तराधिकरणन्यायेन च प्रतिनिहितस्वामी न भवति, तथापि तन्मात्रं हित्वा कर्त्रंशे सप्तदशावरा इति विहितसाप्तदश्यं सम्पादयितुं प्रतिनिधेयमेव पुरुषान्तरमिति॥

## ॥ प्रतिनिहितस्यास्वामित्वाधिकरणम्॥

## सू. स स्वामी स्यात्तत्संयोगात्॥

(मू) सत्रेषु कस्मिंश्चित् यजमाने मृते अन्यः प्रतिनिधेय इत्युक्तम्। तत्र संशयः-किमसौ प्रतिनिहितस्वामी उत कर्मकरः कर्ता ऋत्विगिति। तत्र स्वामिस्थाने निपतितस्य स्वामित्वात् फलसम्बन्धात् प्रतिनिहितोऽपि स्वामीति प्राप्ते-

ब्रूमः। शिष्टैः स्वामिभिः प्रयुक्तस्य कर्मैकदेशकर्तुः फलसम्बन्धाभावात् कर्मकरः स इति पूर्वाधिकरणसिद्ध एवात्र विवृत इति बोध्यम्॥

(टि) कर्मैकदेशकर्तुरिति। कृत्स्नकर्तुरेव फलसम्बन्धः न चायं विधिवशात् प्रवृत्तः। तेन न तद्बलेनापि फलसम्बन्ध इति॥

## ॥ सत्रे प्रतिनिहितस्य यजमान धर्मग्राहिताधिकरणम्॥

## सू. स तद्धर्मा स्यात् कर्मसंयोगात्॥

(मू) तत्रैव संशयः-किमसौ प्रतिनिहित ऋत्विग्धर्मा स्यात् उत स्वामिधर्मेति। तत्र फलप्रतिग्रहाभावात् ऋत्विग्धर्मा न ब्रह्मचर्यपयोव्रतादि स्वामिधर्मान्नि कुर्यादिति प्राप्ते-

फलसम्बन्धाभावेऽपि स्वामि स्थानापन्नस्य स्वामिधर्मसम्बन्धात् स्वामिधर्मा प्रतिनिहितो ब्रह्मचर्यपयोव्रतादीन् कुर्यादिति भावः॥

(टि) स्वामिस्थानापन्नस्येति। यद्यप्यस्य न फलं तथापि इतरेषां सप्तदशकर्तृकैः संस्कारैः फलयोग्यता जन्यते, सर्वत्र कर्त्रंशे

साप्तदश्यनिवेशात्। अतः प्रतिनिहितोऽपि संस्कारान् कुर्यादित्यभिप्रायः।

**॥ श्रुतद्रव्यापचारे तत्सदृशस्यैव प्रतिनिधित्वाधिकरणम्॥**

**सू. सामान्यं तच्चिकीर्षा हि॥**

(मू) श्रुतद्रव्याभावे प्रतिनिधिमुपादाय प्रयोग कर्तव्य इत्येतत् समधिगतम्। तत्र संशयः- किं यत्किञ्चिद्द्रव्यं प्रतिनिधाय प्रयोगः कर्तव्य उत श्रुतद्रव्यसदृशं द्रव्यमिति। तत्र येन केनचिदपि द्रव्येण प्रधानचोदनानिवृत्तेः यत्किञ्चिद्द्रव्यं प्रतिनिधाय प्रयोगः कर्तव्य इति प्राप्ते-

ब्रूमः। श्रुतद्रव्यगतानां विशेषणां अङ्गभूतानां भूयसां ग्रहसम्भवात् सदृशं प्रतिनिधाय प्रयोगः कर्तव्य इति। तथा "व्रीहिभिर्यजेते"त्यादिभिः यथा कृतेरर्थ प्राप्ताङ्गभावस्य क्रियासाधनसमर्थस्य द्रव्यस्य परिच्छेदकतयाङ्गत्वं विधीयते तथा तद्गतत्वाविशेषात् दीर्घशूकत्वादिविशेषाणामपि द्रव्यपरिच्छेदकतयाङ्गत्वं, तत्र यदि व्रीह्यपचारे नीवाराः प्रतिनिधीयन्ते तदा नीवाराकृतेः व्यक्तेश्चाङ्गत्वेन व्रीह्याकृतिव्यक्त्यनुग्रहाभावे ऽपि अन्येषां दीर्घशूकत्वादीनामनुग्रहः सम्भवति। प्रियङ्ग्वादिप्रतिविधाने तु तेषामपि नानुग्रह इति। तस्मात् सदृशस्य प्रतिविधानमिति व्रीह्यपचारे नीवारा एव प्रतिनिधातव्या इति॥

(टि) इदानीं प्रतिनिधिविशेषचिन्ता-प्रधानचोदनेति। प्रधानचोदना तावत् यत्किञ्चिद्द्रव्यं प्रयुङ्क्ते न व्रीहिसदृशं, व्रीहिशास्त्रं च व्रीहिविषयं नान्यगोचरमिति न सदृशोपादाने प्रमाणमिति। व्रीहिचोदनैव प्रमाणमित्याशयेनाह श्रुतद्रव्यगतानामिति। विशेषाणामिति। दीर्घशूकाद्यवयवानामित्यर्थः। व्रीहिशास्त्रस्योक्तार्थे प्रामाण्यमेव प्रतिपाद दयति तथाहीत्यादिना। द्रव्यपरिच्छेदकतयेति। किञ्च जातिर्द्रव्यं परिच्छिन्दन्ती अवयवानपि परिच्छिनत्ति अवयवावयविनोरत्यन्तभेदाभावात्। अत एवावयवा अपि साधनमित्यतोऽपि भूयसामवयवानां सङ्ग्रहार्थं सदृशं प्रतिनिधेयमिति। एवं च सुसदृशलाभे मन्दसदृशं नोपादेयं सुसदृशे बह्ववयवानुग्रहादिति सिद्धम्॥

**॥ द्रव्यापचारे वैकल्पिकद्रव्यान्तरानुपादानाधिकरणम्॥**

सू. निर्देशात्तु विकल्पे यत्प्रवृत्तम् ॥

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ श्रूयते-"खादिरे बध्नाति, पालाशे बध्नाति, रोहितके बध्नाती"ति। तथा दर्शपूर्णमासयोः श्रूयते-"व्रीहिभिर्यजेत, यवैर्यजेते"ति। तत्र संशयः किमेवञ्जातीयकानां वैकल्पिकानामन्यतमेन खादिरव्रीह्यादिना प्रयोगे प्रारब्धे तदपचारवैकल्पिकान्तरं पलाशयवादिकमुपादेयमुतापचरत खदिरव्रीह्यादिसदृशमति। तत्र मुख्ये सतिप्रतिनिधेरशास्त्रीयत्वात् वैकल्पकान्तरं मुख्यमेवोपादेयमिति प्राप्ते -

ब्रूमः। पक्षान्तरे वैकल्पिकान्तरस्याविहितत्वादसति मुख्ये विहितमपचरित सदृशमेवोपादेयं प्रारब्धद्रव्यापचार इति। तस्माद्वैकल्पिकानां यवादीनं व्रीह्याद्यपचारे नोपादानमिति ॥

(टि) अविहितत्वादिति। वैकल्पिकेषु हि यावदेकमनुपक्रान्तं तावदन्येषां प्राप्तिः, अपक्रान्ते तु तस्मिन् प्रयोगे तदेवाङ्गमितरदनङ्गमेव। किं च व्रीहिभिः सङ्कल्प्य यवैः क्रियमाणो "नानृतं वदेदि"ति क्रत्वङ्गभूतं प्रतिषेधमतिक्रामेत्। अत्रोपचरितसदृशमेवोपादेयमिति ॥

## ॥ पूतिकस्य सोमप्रतिनिधित्वाधिकरणम् ॥

सू. वचनाच्चान्याय्यमभावे तत्सामान्येन प्रतिनिधिरभावादितरस्य ॥

(मू) इदमाम्नायते-"यदि सोमं न विन्देत् पूतीकानभिषुणुयात्" इति। तत्र संशयः-किमयं सोमाभावे निमित्ते विधिरूत प्रतिनिधि नियमविधिरिति। तत्र सत्युत्पत्तिशिष्टे सोमे तदपचारे च सुसदृशेषु द्रव्येषु सत्सु पूतीकानामप्राप्तत्वात् सोमाभावे विधिरिति प्राप्ते-

ब्रूमः। न्यायप्राप्त्यां सुसदृशेष्वप्राप्तेष्वेव न्यायात् बलीयसा वचनेन नियमसम्भवात् प्रतिनिधिनियमविधिरेवेति। तस्मात् पूतीकविनाशे मुख्यसदृशस्योपादानमिति ॥

(टि) सोमाभावे विधिरिति। सोमाभावे पूतीकैर्यागं साधयेदिति सोमजातिवत् पूतीकजातिर्यागसाधनपरिच्छेदकत्वेन विधीयत इत्यर्थः।

न्यायप्राप्त्यां त्विति। सौसादृश्यं न प्रतिनिधिप्रापकं, किन्तर्हि, नियामकम्। मुख्याभावादेव प्रतिनिधे: प्राप्ति:। तस्यां चावस्थायां यावन्यायेन सुसदृशं नियम्यते तावद्वचनेन मन्दसदृशा: पूतीका नियम्यन्त इति। तेनायं वाक्यार्थ:-य: सोमजातिपरिच्छिन्नान्सकलानुपादातुमशक्तो विकलानवयवान् यत्र क्वचन स्थितानुपादित्सते स पूतीकगतानिति। तस्मात् पूतीकत्वं सोमावयवोपलक्षणं न साधनोपलक्षणमिति। प्रतिनिधिनियम इति। एवं च प्राप्तानां नियममात्रं विधीयत इति लाघवम्। अन्यथा पूतीकानामत्यन्तमप्राप्तं यागसाधनत्वं विधातव्यमिति गौरवं चेति भाव:। प्रयोजनमाह-तस्मादिति। पूर्वपक्षे तु पूतीकसदृशस्योपादानमिति।

## ॥ प्रतिनिध्यपचारे-उपात्तद्रव्यसदृशस्य पुन: प्रतिनिधित्वाधिकरणम् ॥

## सू. न प्रतिनिधौ समत्वात् ॥

(मू) किं प्रतिनिधिनाशे प्रतिनिधिसदृशमुपादेयमुत मुख्यसदृशमिति। तत्र प्रक्रान्तापचारे प्रक्रान्तसदृशस्यैवोपादेयत्वात् प्रतिनिधिप्रक्रान्ते तन्नाशे प्रतिनिधिसदृशमेवोपादेयमिति प्राप्ते-

ब्रूम:। प्रतिनिधेरनङ्गत्वात् अङ्गभूतमुख्यसदृशमेवोपादेयमिति। नीवारगतव्रीह्यवयवानामुपादित्सया हि नीवारोपादानं तन्नीवारावयवोपादित्सया, तस्मान्नीवारनाशेऽपि व्रीह्यवयवोपादित्सैवेति व्रीहिसदृशमेवोपादेयं, यदि तु नीवारावयवोपादित्सा तदा नीवारसदृशस्योपादानं स्यात्। न तु सास्ति, नीवाराणामविहितत्वात्। तस्मान्नीवारसदृशोपशममुपादेयमिति ॥

(टि) इदानीं प्रतिनिध्यपचारे कथमिति चिन्त्यते। वैकल्पिकन्यायेन प्रक्रान्तस्यैवाङ्गत्वमित्यभिप्रेत्याह-प्रक्रान्तापचार इति। एतेनास्य वैकल्पिकन्यायापवादत्वमपि सूचितमिति। अनङ्गत्वादिति। श्रुतिलिङ्गादि प्रमाणाभावादनङ्गत्वमिति। नहि प्रक्रान्तत्वमुपादानप्रयोजकं, किं तर्ह्यङ्गत्वमिति भाव:। तदेव प्रतिपादयति नीवारगतेत्यादिना। नीवारोपादानमिति। नान्तरीयकनीवारोपादानमित्यर्थ: ॥

## ॥ श्रुतस्यापि प्रतिनिधेरपचार उपात्तसदृशस्य पुनः प्रतिनिधित्वाधिकरणम् ॥

### सू. स्याच्छ्रुतिलक्षणे नियतत्वात् ॥

(मू.)"यदि सोमं न विन्देत् पूतीकानभिषुणुयादि"ति श्रूयते। श्रुतलक्षणप्रतिनिध्यु(ध्य) पचारे संशयः-किं पूतीकसदृशमुपादेयमुत सोमसदृशमिति। तत्र पूतीकानां श्रुतत्वात्पूतीकसदृशमुपादेयमिति प्राप्ते-

ब्रूमः। पूतीकसदृशस्य प्रतिनिधिनियमार्थत्वात् सोमसदृशमेवोपादेयमिति।

इदं त्ववधेयम् -अत्र सोमावयवा एव क्रियाङ्गं पूतीकावयवसाहित्यं तेषामङ्गम्। तस्मात् पूतीकापचारे द्वयसम्पादनार्थं उभयसदृशमुपादेयमु दृभयसदृशालाभे तु सोमसदृशमिति॥

(टि) इदानीं नियमबलात् तदवस्थायामङ्गत्वमाशङ्क्य निराक्रियते। अत्र पार्थसारथिमिश्रैस्तन्त्ररत्ने प्रदर्शितं निष्कर्षमाह-इदं त्वित्यादिना॥

## ॥ मुख्यापचारे तत्प्राप्तौ तस्यैवोपादानाधिकरणम् ॥

### सू. मुख्याधिगमे मुख्यमागमो हि तदभावात् ॥

(मू) यत्र विनष्टे श्रुते प्रतिनिधिमुपादातुं प्रस्थितेन मुख्यं लब्धं तत्र संशयः-किं प्रतिनिधिरूपादेयः उत मुख्यमुपादेयमिति। तत्र मिथ्यासङ्कल्पदोषपरिजिहीर्षाया: प्रतिनिधिरूपादातव्य इति प्राप्ते-

ब्रूमः। मुख्ये सम्भवति तदभावे न्यायप्राप्तस्य प्रतिनिधेरूपादानस्यानुचितत्वात् मुख्यमेवोपादेयमिति॥

(टि) अथ प्रतिनिध्युपादान एव विशेषश्चिन्त्यते-मिथ्यासङ्कल्पेति। "नानृतं वदेदि"ति प्रतिषेधानतिक्रमायेत्यर्थः। अनुचितत्वादिति। अयमाशयः-"यथाशक्ति शास्त्रार्थं सम्पादयामीत्येव न सङ्कल्पयितव्यं न तु प्रतिनिधिस्वरूपं झटिति सङ्कल्पयितव्यमिति न निषेधातिक्रमः स्यादिति॥

## ॥ प्रतिनिधिना प्रारब्धे कर्मणि श्रुतद्रव्यलाभे श्रुतद्रव्येणैव

समापनाधिकरणम् ॥

सू. प्रवृत्तेऽपीति चेत् ॥

(मू) प्रतिनिधिमुपादाय तस्मिन् केषुचित् संस्कारेषु कृतेषु मुख्यं लब्धम्। तत्र संशयः-किं तेनैव प्रतिनिहितेन समापयितव्यमुत मुख्यमेवोपादेयमिति। तत्र शास्त्रकार्ये उपादाने कृते शास्त्रस्य पुनः मुख्योपादानप्रयोजकत्वाभावात् प्रतिनिहितेनैव समापनीयमिति प्राप्ते-

ब्रूमः। सति सम्भवे प्रधानावैगुण्याय मुख्यस्यैवोपादातव्यत्वात् मुख्यमेवोपादेयमिति। इदमधिकरणं नेति पक्षान्तरम् ॥

(टि) मुख्यमेवोपादेयमिति। नहि शास्त्रकार्यमुपादानमात्रं येन प्रतिनिध्युपादाने कृते मुख्योपादानाप्रयोजकत्वं स्यात्। प्रधानानुष्ठानमेव हि शास्त्रकार्यं, अतोऽकृते तस्मिन् प्रयोजकत्वमप्याह तमेव, संस्काराश्चावर्तनीयाः। प्रधानानुरोधेन गुणावृत्तेन्याय्यत्वादिति भावः। आचार्यैस्तु अस्योत्तरस्यचैकाधिकरण्यमुक्तम्। तदृर्शयति इदमधिकरणं नेतीति ॥

॥प्रतिनिधौ पशौ नियुक्ते श्रुतद्रव्यलाभे ऽपि प्रतिनिधिनैव समापनाधिकरणम् ॥

सू. नानर्थकत्वात् ॥

(मू) प्रधाने नियोजनादौ खदिरे प्रतिनिधौ कृते पुनः मुख्यखादिरादौ लब्धे संशयः-किं मुख्यं खादिरादिकमादाय नियोजनादिकमावर्तयितव्यमुत नेति। तत्र साद्गुण्यसम्भवात् मुख्यमुपादाय प्रधानमावर्तयितव्यमिति प्राप्ते-

ब्रूमः। गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात् प्रतिनिधौ कृते प्रधाने पुनः मुख्यमुपादाय प्रधानमावर्तयितव्यमिति ॥

(टि) एवं प्रधानानुष्ठानात् प्राक् मुख्ये लब्धे तदुपादेयमित्युक्तम्। इदानीं तु कृते प्रधाने कथमिति चिन्त्यते-प्रधान इत्यादिना ॥

॥ संस्कारायोग्यस्यापि मुख्यस्यैवोपादानाधिकरणम् ॥

DEPARTMENT OF ... LIBRARY ... MADRAS

## सू. द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात् ॥

(मू) प्रवृत्ते पशुकर्मणि यूपकाले महत् कदरद्रव्यं तक्षणादि संस्कारयोग्य अनेवञ्जातीयकं च मुख्यं खदिरद्रव्यं चास्ति। तत्र संशय:-किं कदर उपादेय उत खदिर इति। तत्र खादिरोपादाने संस्कारविधीनामत्यन्तपीडाप्रसङ्गात् प्रतिनिधि: कदर एवोपादेय इति प्राप्ते-

ब्रूम: । गुणानुरोधेन प्रधानपीडाया अन्याय्यत्वात् मुख्यं खदिरमेवोपादाय पशुं नियुञ्जीतेति ॥

(टि) यत्र तु प्रतिनिध्युपादानेन कस्यापि विधेर्नात्यन्तपीडा प्रधानविधिवैकल्यमात्रं, मुख्योपादाने तु संस्कारविधीनामत्यन्तपीडा तत्र कथमिति चिन्त्यते-प्रवृत्त इति। प्रक्रान्त इत्यर्थ:। अन्याय्यत्वादिति। द्रव्यार्था: संस्कारास्तत् कथं तद्वशेन द्रव्यत्याग इति भाव: ॥

## ॥ मुख्यस्य कार्यसाधकत्वे प्रतिनिधेरेवोपदेयताधिकरणम् ॥

## सू. अर्थद्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तेर्द्रव्याणामर्थशेषत्वात् ॥

(मू) यूपकाले पशुनियोजनासमर्थ: खदिर: तत्समर्थ: कदिरश्चास्ति। तत्र संशय:-किं मुख्यमुपादेयमुत प्रतिनिधिरिति। तत्र श्रुतत्वान्मुख्यमुपादेयमिति प्राप्ते-

ब्रूम: । यूपादिद्रव्यस्य पशुनियोजनादि प्रयोजनार्थत्वात् प्रयोजनसमर्थ: प्रतिनिधिरुपादेय इति ॥

(टि) संस्कारप्रत्युदाहरणमेतदधिकरणम्। प्रयोजनसमर्थ इति। प्रयोजनविरोधे तु श्रुतं नादरणीयं प्रयोजनार्थत्वाद्द्रव्यस्येत्यभिप्राय: ॥

## ॥ प्रधाननिर्वाहकत्वेऽङ्गनिर्वाहापर्याप्तस्यापि मुख्यस्योपादानताधिकरणम् ॥

## सू. विधिरप्येकदेशे स्यात् ॥

(मू) प्रधानमात्रपर्याप्ता व्रीहय: शेषकार्याणां स्विष्टकृदिडाप्राशित्रादीनामपि पर्याप्ता नीवाराश्च सन्ति। तत्र संशय: किं प्रतिनिधिरूपादेय उत मुख्यमिति। तत्र मुख्योपादाने शेषकार्याणामत्यन्तलो

पप्रसङ्गात् प्रतिनिधिर्नीवारा उपादातव्या इति प्राप्ते-

ब्रूमः। श्रुत्या व्रीहीणां यागत्वमात्राङ्गत्वावगमात् प्रधानाङ्गभूतपुरोडाशजात्यभिव्यक्तिसमर्थेषु व्रीहिषु सत्सु व्रीहय एव उपादातव्या न नीवाराः, शेषकार्याणि तु कामं लुप्यन्तामिति ॥

॥ इति षष्ठाध्यायस्य तृतीयः पादः ॥

(टि) इदानीं पुरोडाशप्रकृतित्वेन विहितानां व्रीहीणां स्विष्टकृदिडाप्राशित्रचतुर्धाकरणशंयुवाककालभक्षरूपाणां शेषकार्याणामश्वशफपरिमाणस्य च सर्वेषां पुरोडाशाङ्गत्वान्नाङ्ग प्रधानगुणत्वकृतो विशेष इत्याशङ्क्य परिहरति-यागमात्राङ्गत्वावगमादिति। यद्यपि पुरोडाशप्रकृतिद्रव्यत्वं व्रीहीणां, तथापि तदवयवा एव पुरोडाशताभापन्ना यागद्रव्यं भवन्तीति यागाङ्गत्वमेव व्रीहीणां न पुरोडाशाङ्गत्वं, शेषकार्यपरिमाणानां च पुरोडाशाङ्गत्वमित्यस्त्येवाङ्ग प्रधानगुणत्वकृतो विशेष इत्यभिप्रायः ॥

॥इति केरलीये षोडशाध्यायीटिप्पणे ॥

षष्ठस्याध्यायस्य तृतीयः पादः ॥

॥ श्रीः ॥

॥ अथ षष्ठाध्यायस्य चतुर्थः पादः ॥

॥ अवत्तनाशे पुनरवदानार्थं प्रतिनिध्यादानाधिकरणम् ॥

सू. शेषाद् द्व्यवदाननाशे स्यात्तदर्थत्वात् ॥

(मू) दर्शपूर्णमासयोः श्रूयते- "यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवती"त्यादि, तथा-"मध्यादवद्यति पूर्वार्धादवद्यती"ति, तथा" व्यवदानं जुहोति चतुरवत्तं जुहोती"ति। तत्र कृत्स्नस्य पुरोडाशस्य यत् मध्यपूर्वार्धात्मकावयवद्वयसहितमवदान द्वयरूपमवयवि तस्यैव यागार्थत्वं, शिष्टं तु तदुपलक्षणार्थमित्येकः पक्षः।

सकलस्यैव पुरोडाशस्य यागार्थत्वं व्यवदानस्य तु "चतुरवत्तं जुहोती"त्यनेन प्रक्षेपाधिक्यमात्रं गुणो विधीयते इत्यन्य: पक्ष:। एवं पक्षद्वये स्थिते संशय:- किं द्व्यवदाननाशे शिष्टादवदेयमुत नेति।

तत्र शिष्टे ऽपि मध्यपूर्वार्धयो: द्व्यवदानावयवभूतोपादानसमर्थयो: विद्यमानत्वात् शिष्टादवदेयमिति प्राप्ते-

ब्रम:। शास्त्रवैरूप्यपरिहाराय कृत्स्नपुरोडाशमध्यपूर्वार्ध लक्षितावदानद्वयस्य यागार्थत्वान्न शिष्टादवदेयमिति। यदि कृत्स्नपुरोडाशमध्य पूर्वार्धलक्षितमवदानद्वयं शास्त्रार्थ इति न गृह्येत तदावदाननाशे यदुपलक्षणं तदेवावदाननाश उपलक्ष्यं स्यादिति शास्त्रवैरूप्यमिति।

द्वितीयपक्षे तु सकलपुरोडाशसाध्यस्य यागस्य द्व्यवदानमात्रनाशेऽपि वैगुण्यप्रसङ्गात् न शिष्टादवदेयमिति बोध्यम्। शिष्टाभावे प्रतिनिधि: अवदानदोषे पुन: आयतनादवदानमित्याश्वलायनसूत्रं एतदधिकरणसिद्धान्तविरूद्धमित्यन्यथा ज्ञेयम्॥

यत्तु "यस्य सर्वाणि हवींषि नश्येयुर्वा दुष्येयुर्वा अपहरेयुर्वा आज्येन ता देवता: परिसङ्ख्याय यजेरन्निति श्रूयते। तत्र सर्वशब्दो नावयवकात्स्न्र्यपर:, किंतु हवि: कात्स्न्र्यपर इति। तस्मात् व्यवदाननाशे ऽपि आज्यं प्रतिनिधेयमिति स्थितम्॥

॥ श्री: ॥

## ॥ अथ षष्ठस्य चतुर्थ: पाद: ॥

(टि) पूर्वस्मिन् पादे यथाशक्त्यनुष्ठानगतो विचारो वृत्त:। अत: परं पादद्वयेन प्रायश्चित्ताख्याधिकारश्चिन्त्यते। कीदृशेन निमित्तेन कस्मिन्नैमित्तिके प्रायश्चित्तेऽधिक्रियत इति। तत्रात्र हविर्नाशनिमित्तचोदितेनाज्ययागेन कीदृशोऽधिक्रियत इति चिन्ता। तत्सिद्ध्यर्थमेव शिष्टादवदानचिन्ता यदि शिष्टादवदेयं तदा नान्ययागेनाधिक्रियते। यदि न शिष्टादवदेयं तदाज्यभागेनाधिक्रियत इति

फलफलिभाव:। अत्र शिष्टावदानचिन्तासिद्ध्यर्थमिदं चिन्त्यम्। "यदाग्नेय" इत्याग्नेयचोदना किं सकलपुरोडाशनिष्ठा उत व्यवदानमात्रनिष्ठेति केचित्।

अन्ये तु सर्वप्रदानाधिकरणे मध्यपूर्वार्धयोर्वचनेन यागार्थायां स्थितायामेवेह चिन्तेति। तदनुरोधेन स्थितं दर्शयति-तत्र कृत्स्नस्येत्यादिना। वार्तिककारीयं दर्शनं दर्शयति-सकलस्यैवेत्यादिना। अत्र पक्षे तद्धितनिर्देश उपपन्नतर:। पूर्वत्र तु ततो गृह्यत इति कृत्स्नस्याग्नेयत्वोपपत्तिरिति विशेष:। तत्र शिष्टेऽपीति। अङ्गुष्ठपर्वमात्राव्द्यवदानावयवी भवितुमवदानापादानीभवितुं च समर्थयोर्मध्यपूर्वार्धयो: शिष्टेऽपि सत्वादित्यर्थ:। शिष्टादप्यङ्गुष्ठपर्वमात्रावदानद्वयमवदातुं शक्यत एवेति यावत्। आज्यस्य प्रतिनिधित्वं तु कृत्स्नस्य हविषो नाश इति भाव:। अवदेयमिति। व्यवदाननाशे हविश्शेषेणाधिकार इत्यर्थ:। न शिष्टादिति। शिष्टादवदाने कृत्स्नमध्यपूर्वार्धत्वं शास्त्रार्थ:। तन्न सम्पादितमिति वैगुण्यं स्यादित्यभिप्राय:। वैरूप्यमेव प्रतिपादयति यदीत्यादिना। अस्याधिकरणस्याश्वलायन कविमतिप्रदर्शनायोपन्यस्यति-शिष्टाभाव इति। यत्तु प्रतिनिधिविधि: कृत्स्नहविषो नाश इति तत्राह यत्त्वित्यादिना। एकवचनान्त एव सर्वशब्दोऽवयवकात्स्न्र्यपर: स्यादित्याशयेनाह-सर्वशब्दो नेति स्थितमिति। तस्मात् व्यवदान नाशे हविरन्तरेण आज्येनैवाधिकार इति॥

**॥ स्विष्टकृदर्थावत्तनाशे पुनरवदाननिराकरणाधिकरणम्॥**

**सू. अपि वा शेषभाजां स्याव्दिशिष्टकारणात्॥**

(मू) "उत्तरार्धात् स्विष्टकृतेऽवद्यति, इडामवद्यति, प्राशित्रमवद्यति" इति श्रूयते। तत्र संशय:-किं शेषभाजां स्विष्टकृदादीनां अवत्तनाशे शिष्टावदानं कर्तव्यमुत नेति। तत्र शेषभाजां द्रव्यान्तरप्रयोजकत्वाभावात् शिष्टादेवावदानं कर्तव्यमिति प्राप्ते-

ब्रूम:। शिष्टस्य प्रतिपत्त्यन्तरगृहीतत्वात् प्रतिपत्तिकर्मणां

स्विष्टकृतादीनामवत्तनाशे न शिष्टावदानं कर्तव्यं किन्तु लोप एवेति।

इदं त्ववधेयम्-स्विष्टकृतो वचनादाज्येन समापनमिष्टमेव, इडादिप्राशित्रचतुर्धाकरणशंयुवाककालभक्षरूपशेषकार्याणां तु लोप एवेति ॥

(टि) इदानीं शेषभाजामवदाननाशे चिन्त्यते। शेषादेवेति। यागशिष्टद्रव्यं हि संस्कार्यं, तस्याः सत्वात्। सति च संस्कार्ये संस्काराकरणे प्रमाणभावाच्चेति भावः। प्रतिपत्त्यन्तरगृहीतत्वादिति। यदर्थं यदवत्तं तस्यैव तत्संस्कार्यत्वं न कृत्स्नस्य सकलसंस्कार्यत्वम्। अतः संस्कार्याभावाल्लोप इति भावः। अत्र विशेषमाह-इदं त्वित्यादिना। वचनादिति। "यस्य सर्वाणि हवींषीति वचनादित्यर्थः ॥

## ॥ ऋत्विजामेव शेषभक्षणधिकरणम् ॥

## सू. निर्देशाच्छेषभक्षोऽन्यैः प्रधानवत् ॥

(मू) दर्शपूर्णमासयोः सन्ति भक्षाः इडाप्राशित्रचतुर्धाकरणशंयुवाककालाः। तत्र संशयः-किमेतेषामन्ये भक्षयितार उत ऋत्विज एवेति। तत्र "यजमानपञ्चमा इडां भक्षयन्तीति परिसङ्ख्यानात् प्राशित्रादिभक्षाणां शंयुवाककालभक्षाणां वान्ये भक्षयितार इति प्राप्ते-

ब्रूमः। "यजमानपञ्चमा" इत्यस्याप्राप्तयजमानविधानार्थत्वात् प्राकृतऋत्विज एव सर्वेषां भक्षयितार इति। तत्र इडायामुदाहृतवचनात् चतुर्धाकरणे च "इदं ब्रह्मण" इत्यादिव्यपदेशसामर्थ्यात् प्राशित्रे ऽपि "ब्रह्मणे परिहरती"ति वचनान्निर्ज्ञातकर्तृकत्वात् अनिर्ज्ञातकर्तृकेषु शंयुवाककपाल भक्षेष्वेव पूर्वपक्षोत्थानमिति स्थितम्। केचित्तु कृत्वाचिन्तेयमित्याहुरिति ॥

(टि) शेषकार्यप्रसङ्गादिदमधिकरणमारभ्यते। परिसङ्ख्यानादिति। यथासमाख्यमध्वर्वादिषु प्राप्तेष्विति शेषः। अप्राप्तांशसत्वान्न परिसङ्ख्यार्थत्वं युज्यत इत्याशेयेनाह-अप्राप्तयजमानेति। अत्राचार्यैः कृतं निष्कर्षं दर्शयति-तत्रेडायामित्यादिना ॥

## ॥ कृत्स्नैकदेशभेदे प्रायश्चित्तानुष्ठानाधिकरणम् ॥

## सू. अर्थसमवायात् प्रायश्चित्तमेकदेशे ऽपि ॥

(मू) दर्शपूर्णमासयोः कपालं प्रकृत्य श्रूयते "भिन्नेजुहोती"ति। तत्र संशयः-किं कृत्स्नभिन्ने चूर्णीकृते प्रयोजनायोग्य एव प्रायश्चित्तं होम उत एकदेशभिन्न एवाथवा उभयत्रापीति। तत्रावश्यम्भाविनः सङ्घर्षजन्यैकदेशभेदस्य होमनिमित्तत्वासम्भवात् कृत्स्नभिन्ने होम इति चेदुच्यते। कृत्स्नभिन्ने नष्टसंस्कारार्थस्य होमस्य संस्कार्याभावात् एकदेशभिन्ने होम इति प्राप्ते।

ब्रूमः। भिन्नमिति बुद्धेर्होमनिमित्तत्वात् उभयत्रापि होम इति। सङ्घर्षजन्यैकदेशभेदस्य भिन्नबुध्यजनकत्वात् न होमनिमित्तत्वमिति। एवं "स्कन्ने जुहोतीत्यादावपीति बोध्यम्॥

(टि) न नित्यं निमित्तं भवतीत्याशयेनाह-अवश्यम्भाविनइति। भिन्नद्रव्यसंस्कारार्थो होमः। तथा सति सन्निपत्योपकारित्वं स्यात्। वाक्यं च विनियोजकं क्रत्वर्थत्वे होमस्य आरादुपकारित्वं प्रकरणं च विनियोजकं, तदुभयं दुर्बलमित्याशयेनाह-कृत्स्नभिन्न इत्यादिना। यदि भिन्नशब्देन संस्कार्यं प्रतिपाद्यते तदा निमित्तत्वं न प्रतिपाद्येत, सकृदुच्चरितस्योभयप्रतिपादनासामर्थ्यात्। ततश्च यदि संस्कार्यं प्रतिपाद्यते तदा निमित्ताभावाद्धोमो नित्याङ्गं स्यात्। तथा चैवमापद्यते दर्शपूर्णमासयोर्नित्यं होमे नोपकुर्यात् भिन्नकपालसंस्कारद्वारेणेति। न चैतत् सम्भवति, भेदस्यानित्यत्वात्। सोऽयं नित्यानित्य संयोगविरोधः। तस्माद्भेदने निमित्ते होमो विधीयत इत्यभिप्रेत्याह-होमनिमित्तत्वादिति। भिन्नबुद्धेर्निमित्तत्वोक्तेः प्रयोजनमाह-सङ्घर्षेति॥

## ॥क्षामे सर्वदाहे प्रायश्चित्तानुष्ठानाधिकरणम्॥

## (क्षामेष्टिन्यायः)

### सू. क्षामे तु सर्वदाहे स्यादेकदेशस्यावर्जनीयत्वात्॥

(मू) दर्शपूर्णमासयोः श्रूयते- "अथ यस्य पुरोडाशौ क्षायतः तं यज्ञं वरूणो गृह्णाति यथा तद्धविः सन्तिष्ठते, अथ तदेव हविर्निर्वपेत् यज्ञो यज्ञस्य प्रायश्चित्तिरिति। क्षायतः दहतः तं यज्ञं वरूणो गृह्णाति न यजमानाय फलं प्रयच्छतीत्यर्थः। सन्तिष्ठते अनुष्ठीयते। अथ पुनः प्रत्यवायपरिहाराय तदेव

हविर्निर्वपेत् स यज्ञोऽत्र पूर्वयज्ञस्य प्रायश्चित्तिरित्यर्थः तत्र संशयः-किं कृत्स्नक्षामे एकदेशक्षामेऽपि प्रायश्चित्तं स्यादुत कृत्स्नक्षाम एवेति। तत्र पूर्वन्यायादुभयत्र प्रायश्चित्तमिति प्राप्ते-

एकदेशदाहस्यावर्जनीयस्य निमित्तत्वासम्भवात् कृत्स्नक्षामे प्रायश्चित्तमिति ॥

(टि) इदानीं पूर्वस्यापवादः क्रियते। अवर्जनीयस्येति हेतुविशेषणम्। अवर्जनीयत्वान्नित्यत्वादित्यर्थः।

## ॥ एकहविरार्तावपि पञ्चशरावनिर्वापाधिकरणम् ॥

## सू. यथाश्रुतीति चेत् ॥

(मू) दर्शपूर्णमासयोर्दोहौ प्रकृत्य श्रुयते - "यस्योभयं हविरार्तिमार्च्छेत् ऐन्द्रं पञ्चशरावमोदनं विर्वपेदिति। आर्तिर्नाशः। तत्र संशयः- किमुभयहविरार्तिः पञ्चशरावस्य निमित्तं उत हविर्मात्रार्तिरिति।

तत्रोभयं हविरिति श्रवणात् उभयहविरार्तिर्निमित्तमिति प्राप्ते ब्रूमः। उभयत्वस्य हविर्विशेषणत्वेन विवक्षायां वाक्यभेदप्रसङ्गात् हविर्मात्रार्तिर्निमित्तमिति।

इदं त्ववधेयम्-आर्तिमात्रस्य साकाङ्क्षत्वेन निमित्तत्वायोगात् हविरार्तेर्विशेषणं तावतैव निमित्ततापर्यवसानात् निराकाङ्क्षत्वाच्च उभयत्वं विवक्षितम्। नच वैपरीत्यं शक्यं तथाप्याकाङ्क्षापूरणाभावादिति ॥

(टि) उभयं हविरिति श्रवणादिति। ग्रहाधिकरणे तावदुद्देश्यस्य विशेषणमविवक्षितमित्येव स्थितम्। न तु स्वरूपमपीति। अत्र च निमित्तमुद्देश्यं नार्तिमात्रं, न च हविर्मात्रं, किन्तु मिलितम्। तथा च उभयशब्दाम्नानात्त्रयमपि मिलितं निमित्तमस्त्वित्यभिप्रायः।

हविर्मात्रार्तिरिति। अयमभिप्रायः-यच्छब्दोपक्रमात्तावत् यावन्निमित्तं पर्यवस्यति तावद् ग्राह्यम्। न चार्तिमात्रं निमित्तम्। नित्यत्वात्, अन्ततो निमिषितादेरार्तिसम्भवात्। न तु हविर्मात्रमुभयविशिष्टहविर्वा नित्यत्वादेव,

न तूभयविशिष्टार्ति कस्येति साकाङ्क्षत्वेन निमित्तत्वाभावात्। अतो हविरार्तिशब्दौ विवक्षितौ। तावता च निमित्तपर्यवसानादुभयशब्दो न विवक्षितः। नच सन्निधानादुभयपदं हविषा सम्बध्यतामिति वाच्यम्। असमस्तानां नामपदानां परस्परासम्बद्धानामेवाख्यातेन सम्बन्धात्। अथ हविरार्तमुभयमार्तमिति निमित्तं तथा सति वाक्यभेदः स्यात्। न ह्यरूणादीनामिव क्रियावशीकरणात् परस्परापच्छेदः स्यात्। निमित्तानां क्रियया वशीकरणासम्भवात्। किञ्चैवं हविरार्तिरन्यतरार्तावप्य विशिष्टेति सिद्धं नस्समीहितम्। उभयार्तिश्च साकाङ्क्षत्वादनिमित्तमिति। तदेतत् सकलमभिप्रेत्याह-इदं त्वित्यादिना। उभयपदं त्वेवं योजनीयं "न सायन्दोहार्तिमात्रं निमित्तं, नापि प्रातर्दोहमात्रं, किन्तूभयमिति॥

**॥ होमाभिषवोभयकर्तुरेव भक्षणाधिकरणम्॥**

**सू. होमाभिषवभक्षणं च तद्वत्॥**

(मू) ज्योतिष्टोमे श्रूयते- "हविर्धाने ग्रावभिरभिषुत्याहवनीयेहुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्ती"ति। अभिषवहोमे च कृते तत्कर्तृभिः भक्षणं कर्तव्यमिति होमाभिषवैककर्तृकं भक्षणमत्र विधीयते। तत्र संशयः-किं होमाभिषवयोरन्यतरस्य भक्षणं निमित्तत्वात् योऽन्यतरत् कुर्यात् स भक्षयेदुत होमभिषवयोस्सहितयोर्निमित्तत्वात् य उभयं कुर्यात् स भक्षयेदिति। तत्र पूर्ववन्निमितगतसाहित्यस्साविवक्षितत्वादन्यतरस्य निमित्तत्वाद्योऽन्यतरत्-कुर्यात् स भक्षयेदिति पाप्ते-

ब्रूमः। भक्षानिति द्वितीया निर्दिष्ट प्रधानापेक्षितप्रतिपत्तिक.... सोमद्रव्यसंस्कारत्वेन भक्षविधौ गुणभूतोपादेयकर्तृगतोभयक्रिया संयुक्तताया विवक्षितत्वात् तयोः सहितयोरेव निमित्तत्वाद्य उभयं कुर्यात् स भक्षयेत् इति। अत्रार्थिकनिमित्तत्वमदोष इति बोध्यम्॥

(टि) इदानीं तृतीये साधितमेवोपोद्धातत्वेन स्मारयति। तत्र पञ्चशरावन्यायाद्वैषम्यं दर्शयति-अत्रार्थिकमिति। अतो नोद्देश्यत्वमिति भावः।

॥ पुनराधानं प्रति वह्न्यनुगमद्वयस्य निमित्ततािधकरणम्॥

सू. पुनराधेयमोदनवत्॥

(मू) अग्निहोत्रे श्रूयते- "यस्योभावग्नी अनुगतावभिनिम्रोचेत् यस्य वाभ्युदियात् पुनराधेयं तस्य प्रायश्चित्तिरिति। अभिनिम्रोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिरिति पाठः। उभौ गार्हपत्याहवनीयौ अनुगतौ नष्टौ यदा भवतः तदा सूर्योऽभिनिम्रोचेत् अस्तमियात् अभ्युदियाद्वा तर्हि पुनराधेयं प्रायश्चित्तिः कर्तव्येत्यर्थः। तत्र सन्देहः-

किं गार्हपत्याहवनीययोरन्यतरस्यागमने पुनराधेयं प्रायश्चित्तिः कर्तव्या उत उभयोरनुगम इति। तत्र निमित्तागतद्वित्वस्य पञ्चशरावनवदविवक्षितत्वात् अन्यतरस्यानुगमने पुनराधेयमिति प्राप्ते-

ब्रूमः। गार्हपत्याहवनीयाग्निद्वयजननसामर्थ्यस्याधानस्यात्र प्रायश्चित्तितया विधानादुभयोरनुगमने पुनराधेयमिति।

इदं त्ववधेयम्-विभक्त्ययुपात्ता पादान्तरोपात्ता वा सङ्ख्या निमित्तगता न विवीक्ष्यते। इह तु वस्तुसामर्थ्याद्वित्वं विवक्षितमिति॥

(टि) पञ्चशरावन्यायापवादार्थमिदमधिकरणम्। वैषम्यं दर्शयति इदं त्वित्यादिना। निमित्तवेला[illegible]मुभावित्यविवक्षितमेव। वस्तुसामर्थ्यात्तूभयानुगमो निमित्तमित्यभिप्रायः। एतावतैवास्यापवादत्वमिति बोध्यम्॥

॥ पञ्चशरावनिर्वापस्य कर्मान्तरताधिकरणम्॥

सू. पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यात्॥

(मू) दर्शपूर्णमासयोः श्रुयते।"यस्योभयं हविरार्तिमाच्र्छेत् ऐन्द्रं पशुं पञ्चशरावमोदनं निर्वपेदिति। तत्रैवं संशयः-किं पञ्चशरावं निर्वपेदिति सम्बन्धः, ततश्च हविष्यार्ते द्रव्यमात्रविधानात् पञ्चशरावो दोहप्रतिनिधिः स्यात्। अथवा पञ्चशरावमैन्द्रं कुर्यादिति सम्बन्धः, ततश्च द्रव्यदेवतासम्बेधात् निमित्ते देवता.... कर्मान्तरं विधीयते इति पञ्चशरावः कर्मान्तरमिति।

तत्र प्रत्यासत्तिलक्षण श्रुत्यनुग्रहस्यापेक्षित विधानस्य लाभात्

पञ्चशरावमित्याद्युक्तरीत्या पञ्चशराव ओदनो दोहप्रतिनिधिरैन्द्रमिति। देवतापदं च "ऐन्द्रं दधि ऐन्द्रं पय" इति प्राप्तैन्द्रत्वानुवाद इति प्राप्ते-

ब्रूमः। पक्षे प्राप्ताया देवताया इन्द्रस्य पञ्चशरावपरिमाणस्य चौदनाद्रव्यस्य च प्राप्ते कर्मणि विधानादत्रानेकगुणविधिप्रयुक्तत्वाद्वाक्यभेदप्रसङ्गात् पञ्चशरावमैन्द्रमित्याद्युक्तरीत्या कर्मान्तरमिति॥

(टि) इदानीं प्रसङ्गादुत्तराधिकरणोपोद्धाततया चेदमारभ्यते दर्शेत्यादिना। ननु पञ्चशरावपरिमाणं ओदनद्रव्यमिन्द्रो देवतेति बहवोऽर्थाः प्राप्ते कर्मणि कथं विधीयेरन्नित्यत्राह पञ्चशराव ओदन इति। अयमाशयः- पञ्चशरावशब्दार्थ एक एवात्र विधीयते। ततश्च पञ्चशरावशब्देन बहुव्रीहिणान्यपदार्थ ओदन एव परिमाणविशिष्टो विहितो भवति। ततश्च सान्नाय्यस्थानापत्त्या तद्देवताप्राप्तेरैन्द्रमिति नित्यानुवाद इति। नन्वर्थविधिरिति प्राप्तेति। सान्नाय्य स्थानापत्त्येति शेषः। स्थानापत्त्या हि नैकान्तेनेन्द्रस्य प्राप्तिः महेन्द्रस्यापि सत्वात्। अतो नित्यानुवादायोगादप्राप्तांशे विधिरभ्युपेयः। ततश्चानेकार्थविधानाद्वाक्यभेद इत्यभिप्रेत्याह-पक्षे प्राप्ताया इति।

हविर्नाशादेरयमर्थः - हविर्नाशाद्द्रव्याभावेन कर्मणोऽभावः तेन लक्षितः प्रतीतस्तस्य कर्मणः प्रतिषेधः तेन लक्षितं प्रतीतं दर्शफलं तत्साधनत्वेन दर्शस्थाने विधानादिति पञ्चशरावो विधीयमानः कार्यमपेक्षते। दर्शफलं च साधननिवृत्तेः साधनमपेक्षते। ततश्चाकाङ्क्षावशात्तयोः सम्बन्धः निवृत्तसाधनफलसाधनत्वेन विधीयमानश्च प्रत्याम्नाय इत्यभिप्रायः॥

**॥ पञ्चशरावयागस्य नैमित्तिकदर्शयागाङ्गताधिकरणम्॥**

**सू. स प्रत्यामनेत् स्थानात्॥**

(मू) दर्शपूर्णमासयोः श्रूयते-"यस्योभयं हविरार्तिमार्च्छेत् ,ऐन्द्रं पञ्चशरावमोदनं निर्वपेदिति। तत्र नैमित्तिकं कर्मान्तरमिति समधिगतम्। तत्र संशयः- किमयं नैमित्तिको यागो दर्शप्रत्याम्नाय उत निमित्ते दर्शकर्माङ्गमिति। तत्र हविर्नाशकृत द्रव्याभावनिमित्त दर्शकर्माभावलक्षिततत्प्रतिषेधलक्षित दर्शफलसाधनत्वेन दर्शस्थाने पञ्चशरावकर्म

विधानात् दर्शप्रत्याम्नायो ऽयं नैमित्तिकः पञ्चशरावयागः, यस्य हविरार्त्या सम्बन्धः तस्य न दर्शः कर्तव्यः, स दर्शफलं तु पञ्चशरावेण भावयेदिति च वचनव्यक्तिरिति प्राप्ते-

ब्रूमः। दर्शस्य श्रुतद्रव्यनाशे सति येनकेनचिद्द्रव्येणावश्यसमापनीयस्य सतो यथाश्रुतद्रव्याकरणदोषनिर्घाताकाङ्क्षायां विधीयमानस्य पञ्चशरावयागस्य तद्दोषप्रतिसमाधानार्थतया दर्शसम्बन्धात् निमित्ते दर्शकर्माङ्गं पञ्चशरावयाग इति। तस्मादेकदोहनाशे उभयदोहनाशे च पञ्चशरावयागः कर्मान्तरं दर्शाङ्गं कर्तव्यमिति स्थितम्॥

(टि) अत्रापेक्षितां वचनव्यक्तिं दर्शयति यस्य हविरित्यादिना। प्रतिषिध्य विधीयमानश्च प्रत्याम्नायः। इह तु "न गिरा गिरेति ब्रूयादैरं कृत्वोद्गेयमिति इरापदवत् नाहत्य दर्शं प्रतिषिध्य पञ्चशरावो विधीयते, किन्तु द्रव्याभावेन परम्परया प्रतिषेधं लक्षयित्वा विधानात् प्रत्याम्नाय इति वक्तव्यम्। तन्न सम्भवतीत्याह-दर्शस्येत्यादि सत इत्यन्तेन। श्रुतद्रव्यनाशे ऽपि पयोऽन्तरे दध्यन्तरे चान्यत् प्रतिनिधौ वा सति दर्शस्याभावः येन तत्स्थाने विहितत्वात् प्रत्याम्नायः स्यादिति भावः। एवं दर्शफलस्य साधनापेक्षाभावमुक्त्वा द्रव्यविनाशोपजनितवैगुण्यसमाधानापेक्षा च दर्शस्यास्तीत्याह-यथाश्रुतेति। अधिकरणत्रयसिद्धमेवार्थं दर्शयन्नुपसंहरति-तस्मादिति।

### ॥ सत्रायागूर्याप्रवृत्तस्य विश्वजिदावश्यकताधिकरणम्॥

### सू. विश्वजित्प्रवृत्ते भावः कर्मणि स्यात्॥

(मू) सत्रं प्रकृत्य श्रूयते- "सर्वेभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः आत्मानमागुरते। यस्सत्रायागुरते स विश्वजितातिरात्रेण सर्वपृष्ठेन सर्ववेदसदक्षिणेन यजेत सर्वाभ्य एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानं निष्क्रीणीत इति। आगुरते सङ्कल्पयतीत्यर्थः।

तत्र संशयः-किमयं सत्रागोरणे निमित्ते विहिते विश्वजित् सत्रागोरणमात्रं निमित्तत्वात् प्रवृत्ते चाप्रवृत्ते च सत्रे कर्तव्य उत निमित्ते कर्माङ्गत्वाद प्रवृत्तस्य च कर्मणोऽङ्गासम्भवात् प्रवृत्ते सत्रे कर्तव्यः किं वा सत्रफलागोरणतत्साधनत्वेन विश्वजितो विधानात् प्रवृत्ते च सत्रे तेन

फलसिद्धेर्विश्वजिदनुष्ठानस्य निष्फलत्वात् अप्रवृत्ते सत्रे विश्वजित् कर्तव्यः सत्रफलमागूर्य विश्वजिता तत् साधयेदिति वाक्यार्थः, अथवा शक्तिप्रयुक्ताप्रवृत्तनिमित्त सत्रागोरणे निमित्ते आगूर्याशक्त्याप्रवृत्तस्य सत्रस्य फलसाधनत्वेन विधानादप्रवृत्ते सत्रे विश्वजित् कर्तव्यः सत्रेण फलं करिष्यत इति सत्रकरणत्वेनागूर्य तदनुष्ठानाशक्तौ मनसा वर्तमानस्य सत्रफलस्योपायत्वेन विश्वजितं कुर्यादिति च वाक्यार्थ इति।

तत्राविशेषात् आगोरणमात्रस्य निमित्तत्वात् प्रवृत्ते चाप्रवृत्ते च कर्तव्य इति चेत्। आगोरणमात्रस्य निमित्तत्वेऽप्रवृत्ते कर्माङ्गत्वं प्रवृत्ते फलसाधनत्वमिति वैरूप्यप्रसङ्गात् निमित्त इत्याद्युक्तरीत्या प्रवृत्ते कर्तव्य इति प्राप्ते-

ब्रूमः। कर्माङ्गत्वे नित्यप्राप्तस्यागोरणस्य "यस्सत्रायागुरत" इति यच्छब्देन निमित्तप्रतिपादनानर्थक्यप्रसङ्गात् सत्रफलेत्याद्युक्तरीत्या अप्रवृत्ते कर्तव्य इति। अत्रोच्यते-तत्राफलागोरणस्य निमित्तत्वे सत्रग्रहणवैयर्थ्यस्य अष्टदोषदुष्टविकल्पस्य चापातात् अशक्तेत्याद्युक्तरीत्या अप्रवृत्ते सत्रे विश्वजित् कर्तव्य इति॥

(टि) तत्र संशय इति। अत्र प्रवृत्तस्याप्रवृत्तस्येत्येतावदधिकरणशरीरम्। प्रथमपक्षस्तु श्रुतिविशेषाभावप्रतिपादनायोपन्यस्तम्। तृतीयस्तु सिद्धान्तैकदेशिमतमिति द्रष्टव्यम्। उभयार्थत्वे क्रत्वर्थत्वपुरूषार्थत्वकृतं वैरूप्यं स्यादित्याह-आगोरणेति। नित्यप्राप्तेति। नहि सङ्कल्पं विनानुष्ठानमिति तस्य नित्यत्वम् ततश्च निमित्तत्वं न सम्भवतीति। अप्रवृत्त इति। सत्रमागूर्याकुर्वतः प्रायश्चित्तमिदमित्यभिप्रायः॥

**॥बर्हिर्वत्सयोः कालोपलक्षकताधिकरणम्॥**

**सू. वत्ससंयोगे व्रतचोदना स्यात्॥**

(मू) "दर्शपूर्णमासयो"रमाषमांसं बहुसर्पिष्कं व्रतयतीति व्रतभोजनं विधायाम्नायते; बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायामिति, "तथा "परस्तादपि पुरा वत्सानापकर्त्रोर्दम्पती अश्नीयातामिति। तत्र संशयः- किमत्र वत्सविशिष्टं व्रतं विधीयते उत वत्सो व्रताङ्गतयात्र विधीयते, अथवा

वत्सलक्षितः कालो व्रताङ्गतया विधीयत इति।

तत्र श्रुतिबलात् वत्सविशिष्टं व्रतं विधीयत इति चेत् उच्यते व्रतस्यामाषमिति वास्यान्तरप्राप्तत्वात् वत्सो व्रताङ्गतया विधीयते इति। एवं प्राप्ते-

ब्रूमः। "पुरा वत्सानि"त्यनेन एकवाक्यत्वात् वत्सलक्षितः कालो व्रताङ्गतया विधीयत इति॥

(टि) इदानीं प्रवृत्ताप्रवृत्तविचारप्रसङ्गाद्वत्सकालस्य प्रवृत्ताप्रवृत्तधिकारं विचारयितुमुपोद्घाततयेदमारभ्यते-श्रुतिबलादिति। वत्सैरिति तृतीयाया व्रतमिति द्वितीयायाश्च बलादित्यर्थः। न श्रुतिवशाद्विधानं किन्तु अप्राप्तत्वादित्याशयेनाह-व्रतस्यामाषमिति। एकवाक्यत्वादिति। व्रताङ्गतया वत्सविधाने वाक्यभेदः स्यादिति भावः। किञ्च न वत्सस्य प्राण्यादिवद् व्रते करणत्वं सम्भवति। अतो वत्समेव व्रतयेत्। तदशक्यं, विशसने च वत्सत्वव्याधातः, अमांसमिति पर्युदासविरोधश्च। तस्मात् कालोपलक्षणार्थमेव वत्सग्रहणमिति॥

**॥ वत्सापाकरणकालस्य संनयदसंनयदुभयसाधारणताधिकरणम्॥**

**सू. कालश्चेत् संनयत्पक्षे तल्लिङ्गसंयोगात्॥**

(मू) दर्शपूर्णमासयोः श्रूयते-"बर्हिषा पूर्णमासे व्रतयति वत्सैरमावास्यायामिति। तत्र कालार्थः संयोग इति समधिगतम्। तत्र संशयः-किं सन्नयत एवैष कालः उतासन्नयतोऽपीति। तत्रासन्नयतो वत्सापाकरणाभावात् न वत्सापाकरणवतः सन्नयत एव वत्सापाकरण लक्षितकाल इति प्राप्ते-

ब्रूमः। वत्सापाकरणलक्षितस्याग्रयन्वाधानोत्तरकालस्य सन्नयतोऽपि सम्भवात् सन्नयतोऽपि व्रताङ्गं वत्सापाकरण लक्षितकाल इति। तस्मात् सन्नयतोऽसन्नयतश्चानेन कालेनाधिकार इति॥

(टि) एकपुराडाशायां त्वाग्रयेस्त्वात्तेनोपांशुयाजकालो लक्ष्यत इति युक्तं। इह तु वत्सापाकरणान्नोपलक्षणमुपात्तं, अतो न वत्सापाकरणाभावे केन कालो लक्ष्यतामित्याशङ्का निराकरणार्थ मिदमारभ्यते।

उपलक्षणाभावे ऽप्युपलक्षितः कालो ऽस्त्येवेत्याशयेन सिद्धान्तमाह वत्सापाकरणेत्यादिना अयं चात्र वाक्यार्थः "यो वत्सापाकरणयोग्यः कालः तस्य पुरस्तात्काले ऽग्न्यन्वाधानोत्तरकाले व्रतमुपेयादिति। तदेतद्ध्वनयन्नाह-अग्न्यन्वाधानेति॥

## ॥ सान्नाय्यरहितस्य शाखाहरणनिराकरणाधिकरणाम्॥

## सू. प्रस्तरे शाखाश्रयणवत्॥

(मू) दर्शपूर्णमासयोः श्रूयते- "सहशाखया प्रस्तरं प्रहरतीति। तत्र प्रतिपत्तिः शाखाप्रहरणमिति चतुर्थे स्थितम्। तत्र संशयः, किं शाखा प्रह्रियमाणस्य प्रहरणस्य गुणभूता तयोश्चाङ्गप्रयोजनसम्बन्धि प्रह्रियमाणप्रस्तरस्य शाखामिश्रणमङ्गं मैत्रावरूणपयोमिश्रणवत् उत कालार्थसंयोगः प्रस्तरप्रहरणकाले शाखा प्रहर्तव्येति। तत्र शाखाया अप्रधानतृतीया निर्देशात् प्रस्तरस्य गुणभूताङ्गभूता शाखेति प्राप्ते-

ब्रूमः। तृतीयया शाखायाः प्रधानभूतप्रस्तरतुल्यत्वावगमात् न शाखा गुणभूता, किन्तु कालार्थ एव संयोग इति। अत्रायं विवेकः-प्रस्तरस्य यजौ गुणभावः प्रहरणे च प्राधान्यं तत्र चतुर्थे हरतिमात्रे शाखायाः प्रस्तरसाहित्यं न यजतावित्युक्तम्। इह तु हरतावपि गुणभावो निराकृताः। ततश्च शाखाप्रहरणं प्रतिपत्तिरेव, प्रस्तरप्रहरणं तु उभयस्वरूपमिति स्थितम्॥

## ॥ इति षष्ठाध्यायस्य चतुर्थः पादः॥

(टि) वत्ससंयोगः कालार्थः, तद्वत् प्रस्तरसंयोगोऽपीति प्रसङ्गादिदमारभ्यते। अथवा व्रतकालः सन्नमतोऽसन्नयतश्च शाखा तु न तद्वत् सन्नयत एवेति व्रतकालप्रसङ्गादारभ्यते। अप्रधानतृतीयेति। यदि प्रस्तरप्रहरणकाले शाखाप्रहरणं विधित्सितं स्यात्तदा "प्रस्तरेण सह शाखां प्रहरेदिति ईदृशं वचनं स्यान्न तु तथेत्यभिप्रायः। प्रधानभूतेति। अयमाशयः "सहशाखया प्रस्तरं प्रहरतीत्यस्यायमर्थः-प्रस्तरप्रहरणेन प्रतिपादयेत् सह शाखया यदि शाखापि प्रतिपाद्येत तदा शाखया सह प्रस्तरः प्रतिपादितो भवति नान्यथेति। तुल्यत्वेति। प्रतिपाद्य प्रस्तरतुल्यत्वं प्रतिपाद्यत्वेनैव

भवति नान्यथा, नहि प्रस्तरशाखयोः प्रतिपाद्यत्वं विहायान्यत् सादृश्यमस्तीत्यभिप्रायः। किञ्चोपयुक्तशाखादि प्रतिपत्तिमपेक्षते नोपयोगान्तरमित्यतोऽपि प्रतिपत्तिः प्रहरणमिति। इदानीं शाखाप्रस्तरप्रहरणयोर्विशेषं दर्शयति अत्रायमित्यादिना॥

**॥ इति केरलीये षोडशाध्यायीटिप्पणे**

**षष्ठस्याध्यायस्य चतुर्थः पादः॥**

**॥ श्रीः ॥**

**॥अथ षष्ठाध्यायस्य पञ्चमः पादः॥**

**॥ दर्शे ऽभ्युदयेष्टौ नैमित्तिकदेवतापनयाधिकरणम्॥**

**सू. अभ्युदये कालापराधादिज्याचोदना स्यात् यथा पञ्चशरावे॥**

(मृ) दर्शपूर्णमासयोः श्रूयते-"वि वा एतं प्रजया पशुभिर्व्यर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरूप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेत् ये मध्यमाः स्युः तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात् ये स्थविष्ठाः तानिन्द्राय प्रदात्रे दधश्चरूं ये ऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरूमिति। क्वचित्तु "दधनि चरूं ये क्षोदिष्ठा" इति पाठो दृश्यते। यस्य हविर्निरूप्तं पुरस्तात् पूर्वस्यां दिशि चन्द्रमाश्चाभ्युदेति दर्शभ्रान्त्यां चतुर्दश्यां हविर्निरूप्तं भवतीत्यर्थः। तमेतं अकालनिरूप्तं हविष्कं प्रजया पशुभिश्च व्यर्धयति वियोगं करोति अस्य भ्रातृव्यं शत्रुं वर्धयति च। तस्मात्त् प्रजापशुवियोगस्य शत्रुवर्धनस्य च परिहारार्थं तान्निरूप्तांस्तण्डुलान् त्रेधा विभजेत् अखण्डिता ईषत्खण्डिता अति सूक्ष्मकणाश्चेति च त्रैविध्यम्। तत्र ये मध्यमा ईषत्खण्डिताः ये स्थविष्ठाः अखण्डिता इत्यर्थः। शिष्टः स्पष्टार्थः।

तत्र संशयः-किमभ्युदये यः कालापराधः तत्र कालापराधे प्रायश्चित्तार्थं कर्मान्तरं विधीयते उत तेष्वेव प्रकृतेषु कर्मसु अभ्युदये निमित्ते देवतापनयो विधीयत इति।

तत्र यागे विधीयमाने न गुणविधिप्रयुक्तवाक्यभेदप्रसङ्गात्

यस्येत्यादिपदपञ्चकार्थविशिष्टाभ्युदयनिमित्ते कर्मान्तरं दध्याद्यधिकरणविशिष्ट चरूद्रव्यदात्रादिगुणविशिष्टाग्न्यादि देवताविशिष्टं विधीयत इति प्राप्ते-

ब्रूमः। द्रव्यदेवतातद्गुणविशिष्टविभागभावनाया दातृत्वदिगुण विशिष्टदेवतामात्रस्य प्रकृतेषु कर्मसु विधाने वाक्यभेदाभावात् देवतापनयो विधीयत इति।

इहाग्न्यादिशब्दानां दात्रादिशब्दानां च सामानाधिकरण्यात् तत्तत्प्रतिपादितं एकं विशिष्टदेवताकारकं एकेनैव विधिना विधातुं शक्यमिति न वाक्यभेदः। भावनाविधिपक्षेऽपि न यागान्तरत्वं द्रव्यदेवताविशिष्टाया विभागाख्यनिर्वापभावनाया विहिताया यागापेक्षित्वात्, प्रकृतयागानां च द्रव्यापेक्षत्वात् परस्परं सम्बन्धसम्भवादिति। तस्मात् नैमित्तिकमिदं दर्शप्रयोगविशेषमनुष्ठाय पश्चात् स्वकाले नित्यो दर्शप्रयोगः कर्तव्य इति॥

**॥ श्रीः ॥**

## ॥ अथ षष्ठस्य पञ्चमः पादः ॥

(टि) आधानाभ्युदयेष्ट्यधिकारश्चिन्त्यते। तत्र तावत् प्रथमं किमभ्युदयेष्टिः कर्मान्तरं वा दर्शप्रयोगविशेषो वेति चिन्त्यते। देवतापनय इति। द्रव्याद्देवताया अपनय इति वा देवतया द्रव्यस्यापनय इति वार्थः। पदपञ्चकार्थेति। तथा सत्येवाभ्युदयस्य निमित्तता सम्भवति नान्यथेत्याशयः। दध्यादीति। दधिशृतयोरधिकरणत्वं स्थविष्ठाणिष्ठादीनां च चरूत्वमग्न्यादयो देवतास्तद्गुणाश्च दातृत्वादय इत्यनेकार्थविशिष्टकर्मान्तरविधानेन वाक्यभेदः स्यात्। प्राप्ते कर्मण्येतेषु विधीयमानेषु वाक्यभेदः स्यादिति भावः। सत्यां गतौ प्रकृतप्रहाणाप्रकृतकल्पना न युक्ता। अस्ति चात्रगतिरित्यभिप्रेत्याह- द्रव्यदेवतेति। एवमपि गौरवमित्यस्वरसादाह-दातृत्वादीति। ननु प्राप्ते कर्मणि विशिष्टविधिर्न सम्भवतीत्यत्राह-इहग्न्यादीति। यत्र विधिव्यापारं विनैव विशेषणविशेष्यभावसम्बन्धो लभ्यते तत्र प्राप्ते कर्मण्यपि

विशिष्टविधिः सम्भवति। न ह्यप्राप्तेऽपि कर्मणि तस्याप्राप्तत्वाद्विशिष्टविधिरङ्गीक्रियते, किं तर्हि क्रियाकारकसम्बन्धस्य लोकतः सिद्धेस्तत्र विधिव्यापारापेक्षाभावात्। इह तु दात्रादिपदानां यौगिकत्वात् श्रुत्यैव दातृत्वादिविशेषविशिष्टाग्र्यादि प्रतिपादकत्वमिति तत्र न विधिव्यापारापेक्षेत्यभिप्रायः। किञ्चाग्र्यदिपदानां दात्रादिपदानां च सामानाधिकरण्याद्दातृत्वादि विशिष्टाग्र्यादिरेवार्थ इत्येकस्य पदस्यार्थ एवात्र विधीयत इति न विशिष्टविधित्वमपीत्यपि बोध्यम्। ननु भावनाविधिपक्षे कर्मणो विधानात् कथं न कर्मान्तरत्वमित्यत्राह-भावनाविधिपक्ष इति। यद्ययं दर्शयागस्तदा स्वकाले पुनस्तस्य प्रयोगो न स्यादितीमं भ्रमं वारयन्नुपसंहरति तस्मादित्यादिना। न ह्यत्र प्रयोगान्तरं विधीयते प्रारब्धस्यावश्यसमापनीयत्वेन प्राप्तत्वात्। किन्तु तदनुवादेनेत्थं प्रयोक्तव्यमिति विशेषमात्रं विधीयत इत्यभिप्रेत्याह-दर्शप्रयोगविशेषमिति॥

## ॥उपांशुयागे ऽपि देवतापनयाधिकरणम्॥

## सू. उपांशुयागे ऽवचनात् यथाप्रकृति॥

(मू) अभ्युदयेष्टावेव बह्वृचब्राह्मणे स्पष्टेन वाक्येनामावास्यायामपि विहित उपांशुयाज इति। (तत्र) संशयः-किमुपांशुयाजे ऽपि देवतापनयः उत नेति। तत्र देवतान्तरावचनात् नापनय इति प्राप्ते-

ब्रूमः। विभजेदित्यनेन प्राकृतीनां देवतानां यद्भजनं तस्य वियोगं कुर्यादिति सर्वासां देवतानामपनयविधानात् उपांशुयाजे ऽपि देवतापनय इति।

अत्रेदं बोध्यम्-विभजेदित्यत्र धात्वर्थं भजनमनूद्य विशब्दार्थो वियोगो विधीयते। तण्डुलग्रहणं तु हविर्मात्रोपलक्षणार्थम्। ततश्च सर्वेभ्यो हविर्भ्यो देवतापनयः उपांशुयाजद्रव्यस्याज्यस्य पुनर्देवतान्तरविधाना दुपांशुयाजस्य लोप इति। यत्तु दशमे अमावास्यायां नोपांशुयाज इति तदनपेक्ष्य वचनन्यायमात्रमिति च बोध्यम्। अत्र उपांशुयाजार्थं चतुर्गृहीतमाज्यं त्रिष्वापि यागेषु विभागेन प्रक्षेप्तव्यं, वीत्युपसर्गस्य कर्मव्यतीहारार्थत्वादिति पक्षान्तरमप्याकरे स्थितम्॥

(टि) तत्रैव चिन्ता। न ह्यमावास्यायामुपांशुयाजोऽस्तीत्याशङ्क्य भगवतो वृत्तिकारस्योपवर्षस्य मतेनाह-बह्वृचेति। दशमोपान्त्ये तु पौर्णमास्यामेवोपांशुयाजः नामावास्यायामिति वक्ष्यति। तद्वचनमनपेक्ष्य न्यायमात्रमिति वृत्तिकाराशय इति भावः। तदेतद्वक्ष्यति यत्त्वित्यादिना विभजेदित्यनेनेति। अयमत्र श्रुत्यर्थः-तण्डुलान् हवींषि निर्वपेत् प्राकृतीभ्यो देवताभ्यो वियुञ्ज्यादिति। ततश्च देवताभ्यो हविषां हविर्भ्यो देवतानां च अपनयः सिद्ध इति। अत एवाकरेषु द्रव्यादपनयो द्रव्यस्यापनय इति चोच्यते। तत्र द्रव्यादपनीता देवतेति भाष्यानुरोधेनात्र व्यवहारः। शास्त्रदीपिकादौ तु द्रव्यस्यापनय इत्येव स्थितम्॥

**॥ अनिरूप्तेऽप्यभ्युदयेष्ट्यधिकरणम्॥**

**सू. निरूप्ते स्यात्तत्संयोगात्॥**

(मू) अभ्युदयेष्टावेव संशयः-किं निर्वापस्य हविर्विशेषणत्वेन विवक्षितत्वात् निर्वापानन्तरमभ्युदयेऽपि इयमिष्टिरुताविवक्षितत्वात् प्रक्रमानन्तरं अभ्युदयेऽपि इयमिष्टिरिति। तत्र यां काञ्चित् क्रियां विना हविषोऽभ्युदयं विशेष्टुमशक्यत्वात् श्रुतस्य निर्वापस्य विवक्षितत्वात् निर्वापानन्तरं अभ्युदय एवेयमिष्टिरिति प्राप्ते-

ब्रूमः। हविरभ्युदेतीत्येतावत्युक्तेऽपि अर्थसिद्धप्रवृत्तिक्रियाया हविर्विशेषणत्वसम्भवात् हविरुभयत्ववन्निर्वापस्याविवक्षितत्वात् प्रक्रमा(न)न्तरमभ्युदयेऽपीयमिष्टिः स्यादिति। ततश्च निरूप्तमित्य प्रक्रान्तमित्येतावता विवक्षितत्वोक्तिरिति।

इदं त्ववधेयम्-यस्योभयं हविरित्यत्र पदान्तरगतः सङ्ख्याख्यो गुणो न निमित्तविशेषणत्वेन विवक्षित इत्युक्तं, इह तु पदान्तरगता क्रिया न निमित्तविशेषणत्वेन विवक्षितेत्युच्यते, यस्याः कस्याश्चित् क्रियाया विवक्षास्तित्यत्र श्रुताया एव विवक्षाशङ्केति॥

(टि) आर्त्यधिकरणेनास्य गतार्थत्वमाशङ्क्याह-इदं त्वित्यादिना। विवक्षाशङ्केति। अस्योच्यत इत्यनेन सम्बन्धः। श्रुताया एव विवक्षाशङ्का स्यात् तन्निरासार्थमत्र विवक्षितेत्युच्यत इत्यन्वयः॥

## ॥अनिरूप्तेऽभ्युदये वैकृतीभ्यो निर्वापाधिकरणम् ॥

### सू. अनिरूप्तेऽभ्युदिते प्राकृतीभ्यो निर्वपेदित्याश्मरथ्य स्तण्डुलभुतेष्वपनयात् ॥

(मू) अभ्युदयेष्टावेव यदा अनिरूप्ते हविषि अभ्युदयः तदा संशयः-किं देवतापनयः तण्डुलावस्थात ऊर्ध्वं कर्तव्यः ततश्च तण्डुलावस्थातः प्राक् देवताया अनपनीतत्वात् प्राकृतीभ्य एव देवताभ्यो व्रीहिनिर्वापः कर्तव्य उत तण्डुलग्रहणस्यातन्त्रत्वात् यदैवाभ्युदयो अवगतः तदैवारभ्य देवतापनयः कर्तव्यः ततश्च निर्वापात् प्रागभ्युदयेऽपि वैकृतीभ्य एव दातृत्वादिगुणविशिष्टाग्र्यादिदेवताभ्यो व्रीहिनिर्वापः कर्तव्य इति।

तत्र "तण्डुलान् विभजेदिति तण्डुलावस्थहविषो देवतापनयविधानात् तण्डुलेत्याद्युक्तरीत्या प्राकृतीभ्य एव निर्वाप इति प्राप्ते, ब्रूमः। "तण्डुलान् विभजेदिति विभागमात्रविधायके वाक्ये प्रकरणलब्धहविरुपलक्षणार्थत्वात् तण्डुलग्रहणस्यातन्त्रत्वादुक्तरीत्या वैकृतीभ्य एव निर्वाप इति ॥

(टि) एवं कर्मप्रवृत्तिमात्रं निमित्तमिति स्थितम्। तत्र नैमित्तिको देवतापनयो देवतान्तरसंयोगश्च कदा कर्तव्य इति चिन्त्यते तण्डुलावस्थस्येति। अन्यथा तण्डुलग्रहणमनर्थकं स्यादिति भावः। हवि रूपलक्षणार्थत्वादिति। अतो नानर्थक्यम्। अतन्त्रत्वादिति। अन्यथा दधिशृतयोरपनयाद्देवतान्तरसंयोगवचनमनुपपन्नं स्यादिति भावः ॥

## ॥ किञ्चिन्निरूप्तेऽभ्युदयेऽवशिष्टस्य तूष्णीं निर्वापाधिकरणम् ॥

### सू. विनिरूप्ते तु मुष्टीनामपनयस्तद्गुणत्वात् ॥

(मू) अभ्युदयेष्ट्यामेव प्रारब्धे चतुर्मुष्टिनिर्वापे अपरिसमाप्ते चाभ्युदये ऽवगते संशयः-किमवशिष्टं प्राकृतीभ्य एव निर्वप्तव्यं उत वैकृतीभ्यः अथवात्र तूष्णीमेव निर्वप्तव्यमिति। तत्र प्राकृतदेवता संयुक्तैकावयवोपेतैकपदार्थभूतचतुर्मुष्टिनिर्वापस्यावयवान्तरे देवतान्तरसं योगान्तरासम्भवात् प्राकृतीभ्य एवावशिष्टं निर्वप्तव्यमिति चेत्। उच्यते। निमित्तमात्रापेक्षिणो प्राकृतदेवतापनय वैकृतदेवतासंयोगयोः पदार्थावयवेऽपि सम्भवादवशिष्टं वैकृतीभ्यो निर्वप्तव्यमिति प्राप्ते।

ब्रूमः। निमित्ते सत्यपि अपनीतदेवताकत्वेऽपि पदार्थैकदेशस्य देवातान्तरसंयोगे च सति अपनीतप्राकृतदेवताकासंयुक्तवैकृतदेव-ताकत्वापातादवशिष्टं तूष्णीमेव निर्वप्तव्यमिति। अन्यत्रापि बह्ववयवे पदार्थे सामिकृते अभ्युदये सति शिष्यं तूष्णीमेव कर्तव्यमित्ययमेव न्यायः यथा प्रदानेऽनुवचनप्रैषाज्यादयो ऽवयवास्तेष्वपि सामिकृते ऽवशिष्टं तूष्णीमेव (इति) स्थितम्॥

(टि) पदार्थैकदेशस्येति। वैकृत्यो हि देवताः प्राकृतीनां स्थाने संयोज्याः। पदार्थेन हि प्राकृतीनां संयोगो विहितः नावयवेन, अतो वैकृत्योऽपि पदार्थेनैव संयोजयितव्या नावयवेन। सामिकृते च न पदार्थेन संयोगः सम्भवतीत्यभिप्रायः॥

**॥ सन्नयदसन्नयदुभयस्थैवाभ्युदये प्रायश्चित्ताधिकरणम्॥**

**सू. सान्नाय्यसंयोगान्नासंनयतः स्यात्॥**

(मू) अभ्युदयेष्ट्यामेव संशयः-किमियमिष्टिः सन्नयत एव उतासन्नयतोऽपीति। तत्र दधिशृतयोरधिकरणत्वेन औषधसंस्का-रार्थत्वविधानात् सन्नयत एवेष्टिरिति प्राप्ते ब्रूमः। वाक्यभेदपरिहाराय देवतामात्रविधानाभ्युपगमात् असर्वदधिशृतस्यासन्नयतो ऽपि इयमिष्टिरिति। दधनिचरूं शृते चरूमिति च यथाप्राप्तानुवाद इति।

(टि) एवमभ्युदयेष्टिविचारं समाप्याधुना विश्वजिदधिकारश्चिन्त्यते) सन्नयत एवेति। असन्नयतस्तु दधिशृतयोरभावान्नाधिकार इति। दधनीति। अत्र तण्डुलान् दधिशृते च उद्दिश्य देवतामात्रं विधीयते। न चाद्देश्यानां साहित्यं विवक्षितम्। अतो दधिशृताभावेऽपि तण्डुलानां देवतान्तरसंयोगः कर्तव्य इत्यभिप्रायः॥

**॥ सत्राय प्रवृत्तमात्रस्य विश्वजिदधिकरणम्॥**

**सू. साम्युत्थाने विश्वजित्क्रीते विभागसंयोगात्॥**

(मू) इदमामनन्ति-"यदि सत्राय सन्दीक्षितानामथ साम्युत्तिष्ठेरन् सोमं विभज्य विश्वजितातिरात्रेण यजेरन्निति। अत्र पाठान्तरं सत्राय दीक्षितानां सत्रिणां मध्ये यः कश्चित् सत्रै कदेशमनुष्ठाय सत्रं परित्यज्य गच्छेत् यदि

तदा स्वक्रियं सोमं विभज्य तेन सोमेन विश्वजिदाख्यं सोमं कुर्यादित्यर्थः।

तत्र संशयः-किं क्रीतराजस्योत्थाने विश्वजित् उत प्रवृत्तमात्रस्येति। तत्र "सोमं विभज्येति सोमाविभागश्रवणात् क्रीतराजस्य विश्वजिदिति प्राप्ते-

ब्रूमः। अक्रीतराजस्यासम्भवतः क्रीतराजस्य अर्थसिद्धस्य सोमविभागस्याविवक्षितत्वात् प्रवृत्तमात्रस्य विश्वजिदिति। तत्र मध्ये यः कश्चित् स्वतन्त्रः सत्रं परित्यज्य गच्छेत् तदा विश्वजित् कर्तव्य इति। एतावानेव विवक्षितार्थ इति॥

(टि) एवमभ्युदयेष्टिविचारं समाप्याऽधुना विश्वजिदधिकारश्चिन्त्यते-क्रीतराजस्येति। अक्रीतराजस्य सोमविभागं न शक्नोति कर्तुमिति तस्यानधिकारः सोमविभागो न विधातुं शक्यत इत्याशयेनाह अक्रीतराजस्येत्यादिना। विवक्षितं वाक्यार्थं दर्शयति यदीत्यादिना

**॥ ज्योतिष्टोमे दीक्षापरिमाणानां वैकल्पिकत्वाधिकरणम्॥**

**सू. दीक्षापरिमाणे यथाकाम्यविशेषात्॥**

(मू) ज्योतिष्टोमं प्रकृत्य श्रुयते-"एका दीक्षा तिस्र उपसदः पञ्चमी प्रसृतः तिस्रो वा दीक्षाः तिस्र उपसदः सप्तमी प्रसृतः चतस्रो वा दीक्षास्तिस्र उपसदोऽष्टमी प्रसुतः इति "द्वादश दीक्षा" इति च बहूनि दीक्षापरिमाणान्याम्नातानि। तेषु सन्देहः-किमत्र यद्वा तद्वा परिमाणमुपादेयमिति विकल्पः उत द्वादश दीक्षा इति। तत्र विशेषाभावाद्विकल्प इति प्राप्ते-

ब्रूमः- "द्वादशरात्रीर्दीक्षितो भृतिं वन्वीतेति नित्यवदाम्नानात् द्वादश दीक्षा एव ज्योतिष्टोम इति भाष्यकारमतम्।

सर्वेषां दीक्षापरिमाणानां नित्यवदाम्नानाद्विकल्प एव "द्वादशरात्रीर्दीक्षितो भृतिं वन्वीतेत्यत्र दीक्षाकर्तृकं भृतिवननं द्रव्यार्थं विधीयते, द्वादशरात्रीरित्यनुवादः कालमात्रलक्षणा वा भवत्विति वार्तिककारमतमिति

(टि) इदानीं नैमित्तिकप्रसङ्गात् दीक्षानिमित्ता धर्माः कियन्तं

कालमनुवर्तन्त इति विचारयितुं दीक्षापरिमाणं चिन्त्यते। तत्र भाष्यकारेण "यथाकाम्यमविशेषादिति सूत्रेण पूर्वपक्षं कृत्वा" द्वादशाहस्तु लिङ्गादित्यनेन सूत्रेण सिद्धान्तितम्। तदनुसारेणाह-विशेषाभावादित्यादिना। द्वादशदीक्षा एवेति। एकादीनां तु विकृतिषूत्कर्ष इति भावः। वार्तिककारस्त्वयुक्तमिदमिति मत्वा सूत्रद्वयमपि द्वयोरधिकरणयोरूत्सूत्रपूर्वपक्षयोः सिद्धान्तसूत्रत्वेन व्याचख्यौ। तदनुसारेणाह सर्वेषामित्यादि कृत्वाचिन्तेयमित्यन्तेन। नित्यवदाम्ना नाद्विकल्प इति। प्रकृतौ नित्यवदाम्नानान्नित्यत्वं न प्रयोगापेक्षं, अतो न नित्यत्वविकल्पयोर्विरोध इति। द्वादशरात्रीरित्यनुवाद इति। यदि द्वादशरात्ररूप दीक्षापरिमाणमपि विधीयेत तदा वाक्यं भिद्येतेति भावः। अनुवादत्वे पाक्षिकत्वं स्यात्। तच्चान्याय्यमित्यस्वरसादाह कालमात्रलक्षणेति॥

**॥द्वादशाहे दीक्षापरिमाणनियमाधिकरणम्॥**

**सू. द्वादशाहस्तु लिङ्गात् स्यात्॥**

(मू) द्वादशाहे ज्योतिष्टोमात् प्रकृतितो विकल्पेन दीक्षा परिमाणे प्राप्ते, संशयः-किमिहापि विकल्पः उतास्ति कश्चिन्नियम इति। तत्र विशेषाभावात् विकल्प इति प्राप्ते। ब्रूमः-"षट्त्रिंशदहो वा एष यत् द्वादशाह" इति श्रवणात् द्वादशैव दीक्षा सति नियम इति। "द्वादशरात्रीर्दीक्षित" इति वचनं नास्तिति कृत्वाचिन्तेयम्। भाष्यकारमते तु इदं न पृथगधिकरणमिति॥

(टि) इदानीमाचार्यैर्द्वितीयसूत्रेण कृतमधिकरणं दर्शयति द्वादशाह इत्यादिना। विशेषाभावादिति। चोदकप्राप्तास्वेकादिदीक्षासु कस्या ग्रहणं कस्या नेत्यत्र न विनिगमकमित्यर्थः। षट्त्रिंशदहत्वश्रवणमस्ति विनिगमकमित्याशयेनाह-षट्त्रिशदिति। द्वादशाहसमाख्यया तावत् सुत्या द्वादशेति सिद्धं, द्वादशाहीनस्येत्युपसदोऽपि द्वादशेति। तत्र यदि दीक्षा अपि द्वादश स्युः ततः षट्त्रिंशदनुवादो ऽवकल्पत इत्यभिप्रायः॥

**॥गवामयने माघपौर्णमास्याः पुरस्ताद्दीक्षाधिकरणम्॥**

सू. पार्णमास्यामनियमोऽविशेषात् ॥

(मू) गवामयने श्रूयते-"पौर्णमास्याश्चतुरहे पुरस्ताद्दीक्षे मुखं वा एष संवत्सरस्य या चैत्री पौर्णमासीति, तथा एकाष्टकाया दीक्षेरन् एषा वै संवत्सरस्य पत्नी यदेकाष्टके त्यभिधाय चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन् तेषामेकाष्टकायां क्रय: सम्पद्यते तेनैकाष्टकां न छंबट् कुर्वन्तीति पौर्णमास्या: पूर्वस्मिन् चतुरहे शुक्लैकादश्यां दीक्षामारभेत यतश्चैत्री पौर्णमासी संवत्सरस्य मुखमिति पूर्ववाक्यास्यार्थ: । मुख्यक्रमे... ष्टकायां माघ्यकृष्णाष्टम्यां ... तस्या: संवत्सरपतितत्वात् । अथवा एकादश्यां दीक्षामारभेत । तथा सति कृष्णसप्तमीदिने द्वादश दीक्षा: पूर्यन्ते । स तत उपरितन्यामेकाष्टकायां माध्यां कृणाष्टम्यां सोमक्रय: सम्पद्यते । तश्च दीक्षात: प्रच्युतामेकाष्टकां सामक्रयेणानुगृह्णातीत्यन्यस्यार्थ: ।

तत्र संशय:- किं यस्या: कस्याश्चित् पौर्णमास्या: चरौ पुरस्ताच्चतुरहे दीक्षा स्यादित्यनियम: आहोस्वित् चैत्र्या उत माघ्या इति । तत्राविशेषादनियम इति चेत् । उच्यते । "मुखं वा एषा संवत्सरस्य या चैत्री पौर्णमासीति वाक्यशेषानुरोधाच्च चैत्र्या इति एवं प्राप्ते-

ब्रूम: । एकाष्टकायां क्रयविधानात् माघ्या: पौर्णमास्या: पुरस्ताच्चतुरहे दीक्षेति वाचनिकत्रयसामर्थ्यबलात् वाक्यशेषस्था चैत्री स्तुति: माघीस्तुतिपरतया नेयेति बोध्यम् ॥

(टि) दीक्षाप्रसङ्गादिदमधिकरणमारभ्यते । अविशेषादिति । चैत्री स्तुतिश्चित्रा पौर्णमासे दीक्षेरन्नित्यस्य शेष:, न चतुरहे पुरस्तादित्यस्य । न चाप्येकाष्टकास्तुतिवशान्माघीविषयत्वं, द्वादशानामपि कृष्णाष्टमीनां एकाष्टकाशब्दवाच्यत्वात् "द्वादश पौर्णमास्यो द्वादशैकाष्टका" इति श्रवणाचेत्यभिप्राय: । सत्यमेकाष्टकाशब्दो न विशेषक:, चैत्र्यास्त्वनन्तरमेव कीर्तितत्वात् सामान्यविषय: पौर्णमासीशब्दस्तया विशेषेऽवस्थापयतीत्याशयेनाह मुखं वा इत्यादिना । माघ्या: पौर्णमास्यामुपरितन्यां कृष्णाष्टम्यामेकाष्टकाशब्द: प्रसिद्ध:, अन्यासु गौण इत्याशयेनाह-एकाष्टकायामिति । तर्हि चैत्रीस्तुते: का गतिरित्याशङ्क्याकरे

ऽर्थवादाधिकरणोक्तं विधिप्रतिषेधयोः प्रक्रमेण वाक्यशेषाः स्तुति निन्दानिर्णयहेतवो भवन्ति न हि स्तुनिन्दि नाम व्यवस्थिते" इति, तदनु सन्धायाह वाचनिकेत्यादिना। माघीस्तुतिपरतयेति न चैत्र्याः कश्चिद्दोषः, ततोऽपि श्रेयसी माघीत्येवं व्याख्यानं कृत्वा माघ्येव ग्राह्येति भावः॥

**॥दीक्षोत्कर्षे तन्नियमानामप्युत्कर्षाधिकरणम्॥**

**सू. दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतनामनुत्कर्षः प्राप्तकालत्वात्॥**

(मू) इदं श्रूयते-"दीक्षितो न ददाति न जुहोति न पचतीति ज्योतिष्टोमे च "एकादीक्षा तिस्रो दीक्षा इत्यादि। तत्रावभृथाद्दीक्षानुवर्तते। तत्र दैवान्मानुषाद्वावभृथ उत्कृष्येत तत्र संशयः, किमवभृथोत्कर्षे अग्निहोत्रहोमादीनामपि उत्कर्षः उत नेति।

तत्र दीक्षाविधेरवभृथकालस्य श्रुतस्यातिक्रान्तत्वात् नाग्निहोत्रादीनामुत्कर्षः कर्तव्यमेवाग्निहोत्रादीति प्राप्ते,

ब्रूमः । अवभृथस्यैव दीक्षाविधित्वात् तदुत्कर्षे अग्निहोत्रादीनामप्युत्कर्षः यावदवभृथमग्निहोत्रादिभिर्नाधिक्रियत इति ॥

207 (टि) इदानीं प्राग्दीक्षापरिमाणं चिन्तितं, स एव विचार आरभ्यते "दीक्षितो न ददाती"त्यादीनां शास्त्राणां यावन्तं कालं शास्त्रवशेन दीक्षानुवर्तते तावन्तं कालं न दानादि कुर्यादिति शास्त्रार्थ इत्याभिप्रायेणाह - दीक्षाविधेरिति । यावद्दीक्षानुवर्तते तावन्न कुर्यदित्येव शास्त्रार्थः । दीक्षाया एव प्रतिनिषेधनिमित्तत्वोपपत्तौ दीक्षितशब्देन काललक्षणायां न प्रमाणमस्तीत्यमिप्रायेणाह - अवभृथस्यैवेति । न त्ववभृथकालस्येत्यर्थः ॥

## ॥दीक्षानुवृत्तौ प्रतिहोमनिराकरणाधिकरणम्॥

## सू.तत्र प्रतिहोमो न विद्यते यथा पूर्वेषाम् ॥

(मू) तत्र ज्योतिष्टोम उत्कृष्यमाण अकृतेषु होमेषु संशयः, किमेषां प्रतिहोमाः कर्तव्या उत नेति । तत्र होमानामकृतत्वात् कर्तव्या इति प्राप्ते -

ब्रूमः । अनधिकृतेन होमानामकरणेऽपि कर्तव्याकरणाभावात् कर्तव्याकरणनिमित्तक प्रतिहोमा न कर्तव्या इति ॥

(टि) होमानामकृतत्वादिति । अवभृथोत्कर्षकृता दीक्षानुवृत्तिःपुरुषापराधकृता न शास्त्रकृता । अतस्तत्काले पुरुषापराधकृतमग्निहोत्राननुष्ठानं पुरुषापराधकृताननुष्ठान एव च प्रतिहोमविधिरिति स कर्तव्य इत्यभिप्रायः। यथा तथा वा यावद्दीक्षानुवृत्ता तावदनधिकार इत्याशयेनाह - अनधिकृतेनेति ॥

## ॥उदवसानीयोत्कर्षेऽपि प्रतिहोमनिराकरणाधिकरणम्॥

## सू. प्रतिषेधाच्चोर्ध्वमवभृथादिष्टेः ॥

(मू) यदोदवसानीया केनापि हेतुना उत्कृष्टा तदावभृथादूर्ध्वं उदवसानीयायाः प्राग् ये होमाः ते दीक्षाया उन्मुक्तत्वात् अस्त्यधिकार इति होमाः कर्तव्याः । तेच केनचित् कारणेन कृताः स्युः। तत्र संशयः - किं तत्र प्रतिहोमः कर्तव्य उत नेति । कर्तव्यानामकृतत्वात् कर्तव्य इति प्राप्ते.

ब्रूमः, "एतया पुनराधेयसंमितयेष्टचा इष्ट्वा अग्निहोत्रं होतव्यमि"ति वचनेन उदवसानीयायाः प्रागग्निहोत्रानधिकारप्रतिपादनात् न प्रतिहोमः कर्तव्य इति ॥

(टि) अस्त्यधिकार इति । पूर्वपक्षाभिप्रायेणेदमुक्तं अतो न विरोध इति भाष्यकारेण दर्शितम् । संशयं दर्शयति - किं तत्रेति । शास्त्रदीपिकायां तु किमग्निहोत्रं कर्तव्यमकरणे च प्रतिहोमः स्यादथवा न कर्तव्यं प्रतिहोमश्च न कर्तव्य इति अग्निहोत्रप्रतिहोमोभयाधिकारविचारत्वेनाधिकरणं दर्शितम् । तत्राग्निहोत्राधिकारानधिकारविचारस्तदर्थविचार इति । अत्र पूर्वपक्षिणोऽयमाशयः - एतयेति वचनं तु नाग्निहोत्रं प्रतिषेद्धुमर्हति परिसङ्ख्यादोषापातादिति । सत्यं न प्रतिषेधः, किन्तु "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते"तिवदिदं वचनमुदवसानीयोत्तरकालमग्निहोत्राधिकारं प्रतिपादयति अन्यथानर्थक्यप्रसङ्गादिति सिद्धान्तिनोऽभिप्राय इत्याशयेनाहएतयेत्यादिना ।

## ॥प्रतिहोमे सायमग्निहोत्रप्रभृत्यारम्भाधिकरणम्॥

## सु. प्रतिहोमश्चेत् सायमग्निहोत्रप्रभृतीनि हूयेरन्॥

(मू) अवभृथोदवसीनीययोरुत्कर्षे होमः कर्तव्य इति अग्निहोत्राकरणे

प्रतिहोमश्च कर्तव्य इति कृत्वा चिन्त्यते । तत्र संशयः - किं प्रतिहोमे सायमग्निहोत्रप्रभृतीनि होतव्यानि प्रातरग्निहोत्रप्रभृतीनि वेत्यनियमः उत सायमग्निहोत्रप्रभृतीन्येवेति । तत्रार्थकृतत्वादनियम इति प्राप्ते - ब्रूमः । सायमग्निहोत्रादारभ्यातिपन्नत्वात् सायमग्निहोत्रप्रभृतीन्येव होतव्यानीति ।

षोडशिसंस्थस्य सोमयागस्य सायमवभृथः । तत्रातिपन्नेषु अग्निहोत्रेषु प्रतिहोतव्येषु संशयः - किं सायमग्निहोत्रेण प्रतिहोतव्यमुत प्रातरग्निहोत्रेणेति । तत्र पूर्वाधिकरणे "सायमग्नि होत्रप्रभृतीनी"त्युक्तत्वात् सायमग्निहोत्रादारभ्य प्रतिहोतव्यमिति प्राप्ते -

ब्रूमः । सायं समाप्ते षोडशिनि प्रातरग्निहोत्रादारभ्यातिपन्नत्वात् प्रातरग्निहोत्रप्रभृत्येव प्रतिहोतव्यमिति । न्यायमालायां तु इदं न [पृथग] प्रथमाधिकरणम् ॥

(टि) प्रतिहोमप्रसङ्गादिदमधिकरणद्वयमारभ्यते - अर्थकृतत्वादिति । अर्थकृतानां च युगपदुपस्थितिः । युगपदुपस्थितानां च क्रमनियमेन, किञ्चित् प्रमाणमस्तीत्याशयः । अतिपत्तिसमाधानार्थानामतिपत्तिक्रमः क्रमनियामक इत्यभिप्रेत्याह - सायमग्निहोत्रादारभ्येति । न्यायमालायां त्विति । इदं च तन्त्ररत्नशास्त्रदीपिकादीनामुपलक्षणम् ॥

## ॥भेदनादिनिमित्तकहोमस्य दर्शपूर्णमासाङ्गताधिकरणम्॥

## सू. प्रायश्चित्तमधिकारे सर्वत्र दोषसामान्यात् ॥

(मू) दर्शपूर्णमासयोः श्रूयते - "भिन्ने जुहोति, स्कन्ने जुहोती"ति । तत्र निमित्ताविशेषात् वाक्येन सर्वत्र प्राप्तमिदं पात्रभेदेन द्रव्यस्कन्दननिमित्तं प्रायश्चित्तं प्रकरणाच्च दर्शपूर्णमासयोः । तत्र संशयः - किं सर्वत्र

कर्तव्यमिदं प्रायश्चित्तमुत दर्शपूर्णमासयोरेवेति ।

तत्र वाक्यबलीयस्त्वात् वाक्येन प्रकरणं बाधित्वा सर्वत्र कर्तव्यमिति प्राप्ते -

ब्रूमः । एवं सति अत्यन्ताप्रतिपन्नफलकल्पनाप्रसङ्गात् फलाभावेन वाक्यं बाधित्वा दर्शपूर्णमासयोरेव कर्तव्यमिति । तस्मादग्निहोत्रे ज्योतिष्टोमे च दर्शपूर्णमासप्रकृतिकत्वाभावान्नास्ति प्रयश्चित्तमिति स्थितम् ॥

(टि) प्रासङ्गिकं समाप्य प्रायश्चित्ताधिकार एव प्रस्तूयते । अत्यन्ताप्रतिपन्नफलकल्पनेति । नहि फलमन्तरेण कस्यचिद्विधिः सम्भवतीति भावः । दर्शपूर्णमासयोरिति । एवं प्रकरणाद्दर्शपूर्णमासाङ्गत्वमेतेषामिति तदुपकार एव फलमिति न फलकल्पनादोष इति भावः ॥

## ॥व्यापन्नशब्दार्थनिर्णयाधिकरणम्॥

सू. व्यापन्नस्याप्सु गतौ यदभोज्यमार्याणां तत् प्रतीयेत॥

(मू) "व्यापन्नमप्सु प्रहरती"ति श्रूयते । तत्र संशयः किं व्यापन्नशब्दस्यार्थ निश्चेतुं [अ] शक्य उत शक्य इति । तत्र निश्चायकाभावात् न शक्यो निश्चेतुमिति प्राप्ते,

ब्रूमः, "केशकीटाद्युपघातमार्याणां नित्यमभोज्यमि"ति प्रसिद्धेः यत् केशकीटादिभिर्दूषितं अभोज्यं तदेव द्रव्यं, स एव व्यापन्नशब्दस्य अर्थ इति निश्चेतुं शक्य इति ॥

(टि) प्रायश्चित्तप्रसङ्गादस्यारम्भः । अत्राकरेषु प्रश्नेनैवोपक्रमः, इह तु

तदनुसारेण संशयपूर्वपक्षावपि दर्शिताविति न विरोधः ॥

## ॥अपच्छेदयौगपद्येऽपि प्रायश्चित्ताधिकरणम्॥

### सू. विभागश्रुते : प्रायश्चित्तं यौगपद्ये न विद्यते ॥

(मू) ज्योतिष्टोमे बहिष्पवमानस्तुत्यर्थं प्रस्तोत्रा प्रतिहर्तारौ प्रतिहर्त्रोद्गातारौ च परस्परं संघारब्धाः प्रसर्पन्ति । तत्र विभागे प्रायश्चित्तं श्रूयते "यदि प्रस्तोता विच्छिद्येत ब्रह्मणे वरं दद्यात् यदि प्रतिहर्ता विच्छिद्येत सर्ववेदसं दद्यात् यद्युद्गाता विच्छिद्येत अदक्षिणो यज्ञः संस्थाप्यः अथ तेन पुनर्यजेत तद्दद्यात् यत् पूर्वस्मिन् दास्यन् स्यादि"ति ॥ सर्ववेदसं सर्व[स्वं] स्थं समाप्यः [संस्थाप्यः] समापनीयः पुनः तेनैव यजेत तस्मिन् पूर्वं यद्दित्सितं द्रव्यं तद्दद्यादित्यर्थः । क्रियाजन्यश्च विभागो [ऽप] च्छेदः स च विभागोदयसमवेतोऽपि यत्कर्तृकक्रियया जन्यते तत्कर्तृकत्वेनोच्यते। यदा च पुरुषद्वयसमवेतक्रियाभ्यां विभागो जन्यते तत्र संशयः - किमुभयकर्तृकविभागे प्रायश्चित्तं स्यात् उत नेति ।

तत्रोभयकर्तृकस्य विभागस्य एककर्तृकत्वाभावात् एक - कर्तृकविभागनिमित्तं प्रायश्चित्तं न स्यादिति प्राप्ते, ब्रूमः । उभयकर्तृकत्वेऽपि एककर्तृकत्वसत्वात् अस्त्येव प्रायश्चित्तमिति । द्वावपि पुरुषौ स्वीयक्रियया मिथो विभागं एककालिकमारभेते इत्यस्ति द्वयोरपि प्रत्येकं कर्तृत्वमिति बोध्यम् ॥

(टि) एककर्तृकत्वाभावादिति । अनेन निमित्तविघातो दर्शित इति । न ह्युभयोः सापेक्षं कर्तृत्वं किन्तु स्वक्रियां प्रति निरपेक्षमेव कर्तृत्वं कालमात्रं त्वेकमित्याशयेनाह - उभयकर्तृकत्वेऽपीति । निरपेक्षत्वमेव प्रतिपादयति द्वावपीत्यादिना ॥

## ॥यौगपद्येऽदाक्षिण्यसर्वस्वदाक्षिण्यविकल्पाधिकरणम् ॥

### सू. तत्र प्रतिषेधाद्विकल्पः स्यात् ॥

(मू) तत्रैव यद्युद्गातृप्रतिहर्त्रोः युगपदपच्छेदः तत्र संशयः किं सर्वस्वदानादाक्षिण्ययोः समुच्चय उत विकल्प इति। तत्र पूर्वस्मिन् प्रयोगे दाक्षिण्यं उद्गात्रव [प] च्छेदनिमित्तकं उत्तरप्रयोगे सर्वस्वदानमित्येवं प्रयोग - भेदेनोभयोः सम्भवात् समुच्चय इति प्राप्ते - ब्रूमः । सर्वस्वदानादाक्षिण्ययोः पूर्वं दाक्ष[क्षि]ण्यसर्वस्वदानयोश्च विरोधाद्विकल्प इति ॥

(टि) सम्भवादिति । विकल्पं विना सम्भवति सति विकल्पो न न्याय्य इत्यभिप्रायः । यदि समुच्चितस्तर्ह्युभयमपि नानुष्ठितं स्यात् तद्वरं विकल्प एव । तथा सत्येकमनुष्ठितं भवतीत्याशयेनाह - सर्वस्वदानादाक्षिण्ययोरिति । पूर्वस्मिन् प्रयोगे सर्वस्वदानाकरणाद्वैगुण्यं, उत्तरत्र तु तद्दानाद्द्वादशशतस्यादानाच्चावैगुण्यमिति । तथा हि, पूर्वस्मिन् प्रयोगे यद्देयं सददाक्षिण्येन बाधान्न दत्तं तदेवोत्तरत्र देयं, नहि सर्वस्वदानस्यादाक्षिण्येन बाधः सम्भवति, उभयोर्नैमित्तिकत्वेन तुल्यबलत्वात् । तस्मादुभयत्रापि वैगुण्यसम्भवात्तत्परिहाराय विकल्प एवाश्रितो वरमिति ॥

## ॥आनुपूर्व्येणापच्छेद उत्तरापच्छेदनिमित्त - प्रायश्चित्तानुष्ठानाधिकरणम् ॥

### सू. पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् ॥

(मू) ननु पूर्वेणाव [प] च्छेद [दे] संशयः - किं पूर्ववद्विकल्पः उत पूर्वनिमित्तं प्रायश्चित्तं स्यात् उत्तरनिमित्तस्य बाधः अथ उत्तरनिमित्तं स्यात् पूर्वनिमित्तस्य बाध इति, तत्र शास्त्रद्वयस्य कथं सामान्यविशेष-

नित्यनैमित्तिकनित्यकाम्य क्रत्वर्थपुरुषार्थाल्पभूयस्त्वसावका-शनिरव-काशत्वाङ्गप्रधानतद्धर्मलक्षणस्य शास्त्रबाधकारणाभावात् विकल्प इति चेत् । उच्यते । श्रुतिलिङ्गादिवत् पूर्वबलीयत्वात् पूर्वं निमित्तं स्यात् उत्तरस्य बाध इति प्राप्ते -

ब्रूमः । नित्यनैमित्तिकवत् परबलीयस्त्वात् उत्तरनिमित्तं प्रायश्चित्तं स्यात् पूर्वनिमित्तस्य तु बाध इति ॥

इदं त्ववधेयम् - क्रतौ नैमित्तिके विशेषे विधीयमानेऽयमर्थोऽवगम्यते प्रागन्यादृशोऽपि क्रतुः फलसाधनः सन्नस्मिन्निमित्ते सञ्जाते सत्यन्यादृशं फलं साधयतीति । ततश्च द्वादशशतदक्षिणः फलसाधनः सन् उद्गात्रव् [प] च्छेदे सत्यदक्षिणः फलसाधनः प्रतिहर्त्र [प] वच्छेदे च सर्वस्वदक्षिण इति तत्रा [त्र] फलं साधयतीति गम्यते । तत्र यथा निमित्तज्ञानोत्पत्तिदशायां विद्यमानं पूर्वज्ञानं नित्यज्ञानं बाध्यते तथा नैमित्तिकज्ञानमपि पूर्वं परेण बाध्यते न तु पूर्वे परं, पूर्वज्ञानसमये परस्यासतो बाधासम्भवादिति । एवं नित्यनैमित्तिकयोः नित्यकाम्ययोः प्राकृतवैकृतयोश्च पौर्वापर्यन्यायेन पूर्वस्य विद्यमानशास्त्रस्यैव बाधः । श्रुतिलिङ्गादिविरोधे तु प्रमाणानुत्पत्ति - लक्षणो बाधः उपक्रमवशेनोपसंहारशब्दार्थकल्पनायां लक्षणापरिग्रहेण शब्दार्थविज्ञानस्य बाधः, सामान्यविशेषेषु सामान्यशास्त्रेण लक्षणाजनितस्य विशेषज्ञानस्य विशेषशास्त्रेण श्रुत्या जनितेन विशेषज्ञानेन बाधः, वैकल्पिकयोस्तु अपूर्वैकनिमित्तत्वात् पौर्वापर्याभावेऽव [प] च्छिद्यमानशास्त्रत्वेन च तुल्यबलत्वादितरेतरबाध इति ॥

(टि) एवं यौगपद्ये विकल्पमुक्त्वेदानीं पौर्वापर्ये कथमिति चिन्त्यते । शास्त्रबाधकारणेति । एतावदेव शास्त्रबाधकारणं नान्यदित्यभिप्रायः । ननु द्वेधा हि बाधः अनुत्पत्तिलक्षणो मिथ्यात्वलक्षणश्चेति ।

तत्रानुत्पत्तिलक्षणोऽप्राप्तबाधः इतरः प्राप्तबाध इति । तत्र मिथ्यात्वलक्षणे कल्प्यमाने शास्त्रस्य मिथ्याजनकत्वेनाप्रामाण्यं स्यात् । अतो न स कल्पयितव्यः, किं त्वनुत्पत्तिलक्षण एव कल्पयितव्यः । स च न पूर्वस्य परेण बाधे सम्भवति, परोत्पत्त्यवस्थायां पूर्वस्योत्पन्नत्वात् । तस्मात् पूर्वमसञ्जातविरोधित्वादुत्पन्नं सत् सञ्जातविरोधिनः परस्योत्पत्तिं विरुणद्धीति पूर्वबलीयत्वमेव श्रुतिलिङ्गादिवदिति । तदनुसन्धायाह - श्रुतिलिङ्गादिवदिति । पूर्वनिमित्तस्य तु बाध इति । या तु न्यायाभासाच्छास्त्रस्य सर्वविषयतया बाधकविषयेऽपि प्रवृत्तिकल्पनारूपा भ्रान्तिः सात्र बाध्यत इति न शास्त्रस्याप्रामाण्यापत्तिः बाधकाप्रवृत्तवि-षयमात्रविषयत्वात्तस्येत्यभिप्रायः। इदानीं प्रसङ्गाङ्गाद्बाधाप्रकारं दर्शयति - इदंत्वित्यादिना । प्रमाणोत्पत्तिनिरोधलक्षणे बाधे शास्त्रस्य नाप्रामाण्यशङ्काप्यस्ति, मिथ्यात्वलक्षणे तु न्यायाभासप्रवृत्तस्यैव मिथ्यात्वल-क्षणो बाध इति न तत्रापि शास्त्रस्याप्रामाण्यप्रसक्तिरिति भावः॥

## ॥उद्गात्रुत्तरापच्छेदे सर्वस्वदक्षिणादानाधिकरणम्॥

### सू. यद्युद्गाता जघन्यः स्यात् पुनर्यज्ञे सर्ववेदसं दद्याद्यथेतरस्मिन्॥

(मू) यदा प्रतिपत्तुः प्रथममपच्छेदः तत उद्गातुः तत्र प्रतिपर्त्रपच्छेदात् द्वादशतं बाधित्वा सर्वस्वदानं पूर्वस्मिन् प्रयोगे प्राप्तम् । ततः उद्गात्रपच्छेदात् तस्यादक्ष [क्षि] ण्यं प्राप्तम् । तत्रोत्तरप्रयोगे सन्देहः - किं द्वादशशतं दातव्यमुत विकल्पः उत सर्वस्वमिति। तत्र "यत् पूर्वस्मिन् दास्यन् स्यादि"त्यनेन यदेव क्रतोः स्वभावतो देयं द्वादशशतं तस्यैव ग्रहणात् द्वादशशतमेव देयमिति चेत् । उच्यते । सर्ववेदसादाक्ष् [क्षि]

ण्यबाधितयोः द्वादशशतसर्ववेदसयोरेव पुनर्विधानात् विकल्प इतीति प्राप्ते -

ब्रूमः । अदाक्षिण्येन सर्वस्वदानस्याबाधितत्वात् सर्वस्वमेव दातव्यमिति परिमाणान्तरोपदेशेन प्रतिषेधेन वा बाधः स्यात् । स चेह नास्ति । न वा दाक्षिण्यवचनेन प्रतिषेधः क्रियते । अदक्षिणसंस्थापनान्यथानुपपत्तिप्राप्तत्वात् । तस्मात् बाधहेतोरभावात् न सर्वस्वबाध इति । सर्वस्वदानेनैव पुनर्विधीयमानायां - तावधिकार इति स्थितम् ॥

(टि) एवं पौर्वापर्ये जघन्यनिमित्तं प्रायश्चित्तमित्युक्तम् । अधुना उद्गात्रापच्छेदस्य जघन्यत्वे चिन्त्यते । अबाधितत्वादिति । नहि बाधितयोः पुनर्विधानं येन विकल्पः स्यात् । किन्तु पूर्वस्य या दक्षिणा सा तत आच्छिद्योत्तरत्र विधीयते । पूर्वस्मिंश्च सर्वस्वेन द्वादशशतं बाधितमिति सर्वस्वमेवोत्तरत्र विधीयत इति भावः । बाधाभावमेव दर्शयति परिमाणान्तरेत्यादिना ॥

## ॥अहर्गणेऽपच्छेदे सर्वावृत्तिनिराकरणाधिकरणम्॥

## सी. अहर्गणे यस्मिन्नपच्छेदस्तदावर्तेत कर्मपृथक्त्वात्॥

(मू) अहर्गणे द्वादशाहादौ यदा भवति कस्मिंश्चिदहन्युद्गातुः अपच्छेदः तदा सन्देहः - किं कृत्स्ना ऽहर्गणोऽदक्षिणः समापनीयः पुनः प्रयोक्तव्यश्च उत यस्मिन् अहनि विच्छेदः तदेवाहरिति । तत्राहर्गणप्रयोगस्यैकत्वात् कृत्स्न [त्स्नोऽ] दक्षिणः पुनः प्रयोक्तव्यश्चेति प्राप्ते -

ब्रूमः । प्रयोगस्य प्रत्यहमवान्तरापूर्वभेदप्रयुक्तभेदसत्वात् यस्मिन्नहनि विच्छेदः तदहरेवादक्षिणं समापनीयं पुनरावर्तनीयं चेति॥

॥इति षष्ठाध्यायस्य पञ्चमः पादः ॥

✤ ✤ ✤

(टि) एकत्वादिति । गणस्य संहत्य फलसाधनत्वात् फलसाधननिवेशित्वाच्च धर्माणामिति भावः । भेदसत्वादिति । समूहस्य अशाब्दत्वान्न फलं प्रति साधनत्वेन विधानमिति भावः ॥

॥इति केरलीये षोडशाध्यायीटिप्पणे षष्ठाध्यायस्य पञ्चमः पादः ॥

✤ ✤ ✤

॥श्रीः॥

## ॥अथ षष्ठाध्यायस्य षष्ठः पादः॥

### (मु) ॥सत्रे समानकल्पानां सहाधिकाराधिकरणम्॥

### सू. सन्निपातेऽवैगुण्यात् प्रकृतिवत्तुल्यकल्पा यजेरन्॥

इह सत्राण्युदाहरणं, "सप्तदशावराः सत्रमासीरन्, विद्वांसः सत्रमुपयन्ती"ति । असत्राण्यप्यनेककर्तृकाण्युदाहरणं, तुल्यन्यायत्वात् । तत्र केचिन्नराशंसकल्पाः केचित्तु तनूनपात्कल्पाः । येषां नराशंसो द्वितीयः प्रयाजः ते नराशंसकल्पाः यथा राजन्यात्रिवध्यश्ववसिष्ठवैश्यशुनकानां कण्वकाश्यप - सांस्कृतीनां नराशंसो द्वितीयः प्रयाज इति ते नराशंसकल्पाः। तनूनपादन्येषामित्यन्ये तनूनपात्कल्पाः । तत्र सत्रादिषु संशयः - किं समानकल्पानां भिन्नकल्पानां वाधिकार इत्यनियमः उत समानकल्पानामेवेति । तत्र उभयकर्तृकक्रतोरन्यतरकल्पेन साद्गुण्यसम्भवादनियम इति प्राप्ते,

ब्रूमः । अन्यतरकल्पानुष्ठाने अन्येषां क्रतुवैगुण्यप्रसङ्गात् समानकल्पानामेव अनेककर्तृकेषु क्रतुष्वधिकार इति। राजन्येत्यादिकल्पविधायकवाक्यस्यायमर्थः - राजन्य - वसिष्ठादीनां नराशंस एव यज्ञाङ्गं तद्युक्त एव क्रतुः तेषां फलसाधने समर्थ इतरेषां तु तनूनपादेव यज्ञाङ्गं तद्युक्त एव क्रतुः फलसाधने समर्थः । षष्ठ्या स्वामित्वलक्षणसम्बन्धार्थत्वात् वसिष्ठाद्युद्देशेन नराशंसादिविधानादिति । नतु कर्तृषष्ठी वसिष्ठादीनाम धात्वर्थानां विधेयत्वप्रसङ्गादिति॥

॥ श्रीः ॥

## ॥ अथ षष्ठस्य षष्ठः पादः ॥

(टि) एवं पादद्वयेन प्रायश्चिताधिकारं विचार्याधुना अनेककर्तृकाधिकारश्चिन्त्यते - साद्गुण्यसम्भवादिति । अयमाशयः - कल्पविधिवाक्येन राजन्यवसिष्ठाद्यर्थत्वेन कल्पविधाने फलकल्पनाप्रसङ्गात् प्रकरणबाधाच्च राजन्य - वसिष्ठादय एव कल्पाङ्गत्वेन कर्तृत्वेन विधीयन्ते । सम्बन्धवाचिनी वा कर्तृवाचिनी वा षष्ठीति । ननु कथं क्रतुवैगुण्यमित्यत्र वाक्यार्थप्रदर्शनेनाह - राजन्येत्यादिना । अधात्वर्थानां विधेयत्वप्रसङ्गादिति पूर्वपक्षे धात्वर्थेऽन्यस्य वसिष्ठादेर्विधानमिति विप्रकृष्टविधिः, सिद्धान्ते तु धात्वर्थस्य अन्यत्र विधानमिति सन्निकृष्टविधिः, सन्निकृष्टविधिश्च बलीयानित्याशयः । यत्तु फलकल्पनाप्रसङ्गादिति तन्न, क्रतूपकारस्य फलत्वात् । अत एव न प्रकरणविरोधोऽपीति ॥

### ॥ भिन्नकल्पयोरपि राजपुरोहितयोः कुलाययज्ञे अधिकाराधिकरणम् ॥

### सू. वचनात्तु द्विसंयोगस्तस्मादेकस्य पाणित्वम् ॥

(मू) कुलाययज्ञं प्रकृत्य श्रूयते - "एतेन राज्य [ज्ञ] पुरोहितौ सायुज्यकामौ यजेयाताम्"ति । तत्र संशयः - किं राजपुरुषाविति षष्ठीतत्पुरुषैकशेषः राज्ञः पुरोहितो राजपुरोहितः राजपुरोहितश्च राजपुरोहितश्च राजपुरोहिताविति, उत विभक्तयर्थस्य द्वित्वस्य उत्तरसन्निहितनोत्तरपदार्थेनान्वयात् कृतैकशेषेणोत्तरपदेन तत्पुरुषः पुरोहितश्च पुरोहितश्च पुरोहितौ राज्ञः पुरोहितौ राजपुरोहिताविति, अथवा कर्मधारयबलीयस्त्वात्

समानाधिकरणैकरणैकशेषः राजा चासौ पुरोहितश्च राजपुरोहितः राजपुरोहितश्च राजपुरोहितश्च राजपुरोहिता - विति, उत द्वन्द्वे राजा चपुरोहितश्च राजपोहिताविति । तत्र त्रिष्वपि पक्षेषु समानकल्पयोरधिकारः, द्वन्द्वपक्षे तु भिन्नकल्पयोः राजपुरोहितयोरधिकार इति विवेकः, तत्र युगपदधिकरणवचनतायां इतरेतरसहितस्वार्थलक्षकपदद्वये युक्तात् द्वन्द्वात् पूर्वपदमात्रलक्षणतत्पुरुषस्य बलीयस्त्वात् षष्ठीतत्पुरुषैकशेषः राजद्वयसम्बन्धिनौ पुरोहिताविति चेदुच्यते । राजपदानर्थक्यान्न तत्पुरुषैकशेषः, किन्तु विभक्तयर्थस्य द्वित्वस्य सन्निहितोत्तरपदार्थेनान्वयात् कृतैकशेषोत्तरपदतत्पुरुषः एकराजसम्बन्धिनौ द्वौ पुरोहिताावित्यर्थ इति राज्ञ एव पुरोहितो नान्यस्येति च राजपदानर्थक्यीमति।

अत्रोच्यते । एकस्य राज्ञः पुरोहितद्वयाभावात् न कृतैक - शेषोत्तरतत्पुरुषः, किन्तु कर्मधारयबलीयस्त्वात् समानाधिकरणैकशेषः राजात्मकौ पुरोहितावित्यर्थ इति । एवं प्राप्ते,

ब्रूमः । ब्राह्मणस्यैव पुरोहितत्वेन वरीतव्यत्वश्रवणान्न समानाधिकरणैकशेषः, किन्तु द्वन्द्व एव । इदं त्ववधेयम् इतरेतरयोगद्वन्द्वे एकविभक्त्यर्थद्वित्वादि सङ्ख्यान्वयादेव इतरेतरयोगसिद्धेः इतरेतरयोगद्वन्द्वे न लक्षणा । युगपदधिकरणवचनतापक्षे तु लक्षणा स्यादेव । समाहारद्वन्द्वे सर्वपदानां लक्षणा । षष्ठीतत्पुरुषे तु पूर्वपदस्य लक्षणा । ततश्चेतरेतरयोगद्वन्द्वः कर्मधारयव्यतिरिक्ततत्पुरुषात् बलीयान्, समाहारद्वन्द्वस्तु तत्पुरुषादपि दुर्बलः । ततश्च कर्मधारयेतरेतरयोगद्वन्द्व-तत्पुरुषसमाहारद्वन्द्वानां परदौर्बल्यमिति । तस्माद्भिन्नकल्पयोरेव कुलायय्ज्ञेऽधिकार इति स्थितम् ॥

(टि) युगपदधिकरणवचनतायामिति । राजसहितपुरोहितः पुरोहितपदार्थः

पुरोहितसहितो राजा च राजपदार्थ इति हि युगपदधिकरणवचनतेति । एकस्य राज्ञ इति । अनेनात्र पक्षे राजपदसार्थक्यं दर्शितम् । पुरोहितद्वयाभावादिति । "पुरोहितं वृणीत" इत्युपादीयमानस्य पुरोहितस्यैकत्वं विवक्षितमित्यभिप्रायः । द्वन्द्वे च लक्षणा स्यादित्यपशङ्क्याह इदं त्वित्यादिना । लक्षणा स्यादेवेति । तस्मान्न तत्पक्षो व्याप्य इति भावः ॥

## ॥ सत्रे ब्राह्मणमात्रस्याधिकाराधिकरणम् ॥

## सू. सत्राणि सर्ववर्षानामविशेषात् ॥

(मू) सत्राण्येवोदाहरणम् - "य एवं विद्वांसः सत्रमुपयान्ती"ति "ऋत्विक्कामाः सत्रमासीरन्निति" । तत्र श्रूयते "ये यजमानाः त ऋत्विज" इति। तत्र यजमानऋत्विग्शब्दयोः भिन्नार्थत्वात् समानाधिकरणानुपपत्त्या ऽन्यतरस्य कार्यलक्षकत्वमावश्यकम् ॥ तत्र मुख्यत्वाद्यजमानशब्द[ः]श्रुतिवृत्तः ऋत्विग्शब्दस्तु जघन्यत्वात् कार्यलक्षणार्थः, यच्छब्दतच्छब्दौ च उद्देशप्रतिनिर्देशकाविति स्थिते, तत्र संशयः - किमत्र यजमानानुद्दिश्य तेषामार्त्विज्यं संस्कारत्वेन विधीयते, ततश्च यजमानानां प्राधान्यात् "सत्रमासीरन्नि"त्यत्र विशेषाश्रणाच्च प्राप्तानां यजमानानां ब्राह्मणराजन्यवैश्यानां मध्ये यथा ब्राह्मणानां यजमानानां वचनप्रामाण्यात् अन्यकर्तृकमार्त्विज्यं संस्कारार्थत्वेनाङ्गं तथा राजन्यवैश्ययोरपि ब्राह्मणकर्तृकमार्त्विज्यमङ्गमेव । तस्मात् सर्ववर्णानां सत्रेष्वधिकार उत आर्त्विज्यमुद्दिश्य तत्कर्तृकत्वेन यजमाना विधीयन्ते । ये परिक्रीतकर्तृ - कत्वेन प्रकृतितः पदार्थाः प्राप्ताः तेषु यजमानाः कर्तार इति । ततश्चार्त्विज्यपदार्थप्राधान्यात् यजमानाः तत्कर्तृत्वेन तदङ्गमित्यन्यकर्तृ-कत्वमात्रं प्रत्याम्नानात् बाध्यते नतु ब्राह्मणकर्तृकत्वम् । ततश्चार्त्विज्यपदा-

र्थाङ्गब्राह्मण्यं सत्रेष्वपि प्राप्तमिति तदबाधार्थं ब्राह्मणानामेव सत्रेष्वधिकार इति । तत्र यजमानानां यच्छब्दयोगप्राथम्यात्मकोद्देश्यलक्षणद्वयसत्वात् यजमानानित्याद्युक्तरीत्या सर्ववर्णानां सत्रेऽधिकार इति प्राप्ते, ब्रूमः । आर्त्विज्यविधाने अर्त्विज्यपदार्थानां अप्राकृतपुरुषसंस्कारताद्यदृष्टान्तर-कल्पनयोः प्रसङ्गात् आर्त्विज्यमित्याद्युक्तरीत्या ब्राह्मणानामेव सत्रेष्व-धिकार इति ॥

(टि) अत्र किं सर्ववर्णानामधिकार उत ब्राह्मणानामेवेत्यधिकरणशरीरं, एतच्च प्रागुक्तमेव तन्न विस्मर्तव्यम् । प्राधान्यादिति । प्रधानभूतैरेव तैः क्रियमाणमार्त्विज्यं न गुणभुतानध्वर्य्वादीन् कर्तृनपेक्षते गुणकर्त्रपच्छेदेन हि ब्राह्मण्यमार्त्विज्याङ्गं, तच्च गुणकर्त्रभावे द्वाराभावान्न सत्रेषु प्राप्नो तीत्यभिप्रायः । अन्यकर्तृत्वमात्रमिति । प्रकृतितो द्वौ धर्मौ ह्यार्त्विज्याङ्गत्वेन प्राप्तौ । अन्यकर्तृकत्वं ब्राह्मणकर्तृकत्वं चेति । तत्रान्यकर्तृकत्वमात्र-मित्यर्थः । ब्राह्मणकर्तृकत्वस्य न किञ्चिद्बाधकमस्तीत्याशयेनाह - नत्विति ॥

## ॥ विश्वामित्रतत्समानकल्पानामेवाधिकाराधिकरणम् ॥

## सू. वासिष्ठानां वा ब्रह्मत्वनियमात् ॥

(मू) सत्राण्येवोदाहरणम् "य एवं विद्वांसः सत्रमुपयन्ती"ति, तत्र ब्राह्मणानामेवाधिकार इति समधिगतम् । तत्र संशयः, किं सर्वेषां ब्राह्मणानां सत्रेष्वीधकार उत वासिष्ठानां तत्समानकल्पानां च अथ वैश्वामित्राणां भृगुशुनकवासिष्ठान् वर्जयित्वा अन्येषां वैश्वामित्रतत्समानकल्पानां अधिकार इति । तत्राविशेषात् सर्वेषामिति चेत् । उच्यते। "वासिष्ठो ब्रह्मा भवती"ति वासिष्ठानां ब्रह्मत्वनियमात् वासिष्ठानां तत्समानकल्पानामेवाधिकार इति । एवं प्राप्ते -

ब्रूमः । "वैश्वामित्रो होता भवती"ति वैश्वामित्राणां हौत्रनियमात् वैश्वामित्राणां तत्समानकल्पानामेवाधिकार इति । "य एव कश्चन स्तोमभागानधीयीत स एव ब्रह्मा भवेदि"ति प्रतिप्रसवान्न वासिष्ठानां ब्रह्मत्वनियम इति । "रश्मिरसि क्षयाये"त्यादयो मन्त्रास्स्तोमभागा इति बोध्यम् ॥

(टि) आर्त्विज्यनियम एवोभयोः पक्षयोः हेतुरुक्तस्तत्र को विशेष इत्यत्राह य एवेत्यादिना ॥

## ॥ सत्रे आहिताग्नेरेवाधिकाराधिकरणम् ॥

## सू. विहारस्य प्रभुत्वादनग्नीनामपि स्यात् ॥

(मू) सत्राण्येवोदाहरणं - "य एवं विद्वांसः सत्रमुपयन्ती"ति तत्रैतत् तनूनपात्कल्पानामेव सत्राधिकार इति । तत्र संशयः, किमाहिताग्नीनामनाहिताग्नीनामपि सत्रेष्वधिकार उत आहिताग्नीनामेवेति । तत्र येन केनाप्यग्निना क्रतुसिद्धेरनाहिताग्नीनामपि अधिकार इति प्राप्ते -

ब्रूमः । "दर्शपूर्णमासाभ्यामिष्ट्वा अन्येन यजेते"ति वचनात् प्राप्तज्योतिष्टोमपूर्वत्वस्य च सत्रेषु सम्भवात् कृतदर्शपूर्णमासज्योतिष्टोमानामाहिताग्नीनामेवाधिकारो नतु अकृतदर्शपूर्णमासज्योतिष्टोमानामनाहिताग्नीनामिति भावः ॥

(टि) अनाहिताग्नीनामिति । केनचिदाहिताग्निना संहत्येत्यर्थः । तदेतद्येन केनाप्यग्निनेत्यनेन ध्वनितमिति । क्रतुसिद्धेरिति । यथैकेन यजमानेन औदुम्बरीसम्मितं सिध्यति तथेति भावः । एवकारव्यावर्त्यमेवाह - नत्विति । आदधीतेत्यात्मनेपदादन्येनाहितेनाग्निना न फलसिद्धिः ।

"यजमानेन संमितौदुम्बरी"त्यत्र तु नैवं विनिगमकमस्तीति वैषम्यमिति ध्येयम् ॥

## ॥ जुह्वादीनां साधारण्याधिकरणम् ॥

### सू. जुह्वादीनामप्रयुक्तत्वात् सन्देहे यथाकामी प्रतीयेत ॥

(मू) अन्तराचिन्ता । तत्र संशयः - किं सत्रेषु जुह्वादीनि पात्राणि यस्य कस्यचित् स्युः उतान्यानि साधारणान्युत्पाद्यानीति । तत्र यस्य कस्यचित् पात्रैः सर्वेषां क्रतुकार्यसिद्धेः यस्य कस्यचित् पात्राणि स्युरिति प्राप्ते,

ब्रूमः । यस्य पात्रैरारब्धं सत्रं तस्य सत्रमध्ये तस्य मरणप्रसक्तौ तेषां पात्राणां परिधानीयप्रक्षेपप्रतिपत्तिलोपप्रसङ्गात् साधारणानि पात्राणि उत्पाद्यानीति ॥

(टि) अन्तराचिन्तेति । पूर्वपक्षे सारस्वतेनाहिताग्न्यधिकारदर्शनमपि हेतुत्वेनोक्तं, तदप्रतिसमाधायेदमधिकरणं कृत्वा पुनः समाहितमिति भावः ॥

## ॥ विकृतौ सप्तदशसामिधेनीषु वर्णत्रयाधिकाराधिकरणम् ॥

### सू. पुरुषकल्पेन वा विकृतौ कर्तृनियमः स्यात् यज्ञस्य तद्गुणत्वात् अभावादितरान् प्रत्येकस्मिन्नाधिकारः स्यात् ॥

(मू) येषु सप्तदश सामिधेन्यः तान्यध्वरकल्पाग्रयणपश्वादीन्युदाहरणम् । तत्र संशयः - किं वैश्यस्यैवेभिः कर्मभिः अधिकारः उत त्रयाणामपि वर्णानामिति । तत्र "सप्तदश वैश्यस्यानुब्रूयादि"त्यनेन सप्तदशस्य वैश्यकर्तृकत्वविधानात् साप्तदश्यवद्भिः अध्वरकल्पादिभिः वैश्यस्यैवाधिकार इतिप्राप्ते,

ब्रूमः । वैश्यस्योपकारकत्वेन साप्तदश्यविधानात् सर्वेषामधिकार इति । नहि साप्तदश्योद्देशेन वैश्यकर्तृकता विधीयते, प्रकरणबाधप्रसङ्गात् । किन्तु वैश्योद्देशेन साप्तदश्यं दर्शपूर्णमासोपकारकत्वेन विधीयते । ततश्च साप्तदश्यस्य वैश्यकर्तृकत्वाभावान्न साप्तदश्यवत्सु वैश्यकर्तृकत्वनियम इति ॥

॥ इति षष्ठाध्यायस्य षष्ठः पादः ॥

(टि) गतोऽनेककर्तृकाधिकारविचारः । वैश्यस्योपकारकत्वेनेति । स्थिते चास्मिन् वैश्योद्देश्यत्वे "वसिष्ठानां नराशंस" इत्यत्र प्रकरणविरोधाभावाद्वसिष्ठाः कर्तृत्वेन नराशंसस्य विधीयन्तामित्याशङ्का धात्वर्थविधिबलीयस्त्वेन निराकृतेति न पुनरुक्ततेति ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे

षष्ठाध्यायस्य षष्ठः पादः ॥

✣ ✣ ✣

॥ श्रीः ॥

## ॥ अथ षष्ठाध्यायस्य सप्तमः पादः ॥

## ॥ विश्वजिति पित्रादीनामदेयत्वाधिकरणम् ॥

## सू. स्वदाने सर्वमविशेषात् ॥

(मू) इदमामनन्ति "विश्वजिति सर्वस्वं ददाती"ति । तत्र संशयः, किं मातापुत्रादीनां आत्मीयधनानां च दानं कर्तव्यं उतात्मीयं धनं सर्वं देयमिति । तत्र ज्ञातित्वेनात्मीयत्वेन वा मातापित्रादीनामपि स्वशब्दवाच्यत्वाविशेषात् तेषामेव दानं कर्तव्यमिति प्राप्ते -

ब्रूमः । स्वत्वत्यागपूर्वकपरस्वत्वापादानरूपदानवाचक - ददातिसमभिव्याहारसामर्थ्यात् लब्धात्मीयधनवाचकत्वावधारणात् स्वशब्दस्य यद्वाच्यं स्वत्वत्यागपूर्वकपरस्वत्वापादानसमर्थमात्मीयं धनं तत् सर्वं देयमिति । तत्रात्मीयज्ञातिधनवाचिनः स्वशब्दस्य यथा दानायोग्यत्वादात्मनः ज्ञातीनां चाग्रहणं तथात्मीयमात्रस्य धनमात्रस्य च अग्रहणमिति आत्मीयवाचिनः स्वशब्दस्य अर्थसङ्कोचो योग्यताबलादिति नात्र स्वशब्दो मुख्यार्थ इति बोध्यम् ॥

॥ श्रीः ॥

## ॥ अथ षष्ठस्य सप्तमः पादः ॥

(टि) अथ विश्वजित्यधिकारश्चिन्त्यते । स्वशब्दवाच्यत्वाविशेषादिति । परस्वत्वापादनमेव दानम् । शक्यन्ते च पित्रादयोऽपि परविधेयाः कर्तुमिति भावः । नहि परस्वत्वापादनमात्रं दानं, किन्तु स्वत्वनिवृत्तिपूर्वकं

परास्वत्वापादनम् । न च पित्रादिगतं स्वत्वं पितृत्वादि निवर्तयितुं शक्यत इत्याशयेनाह-स्वत्वेत्यादिना । तत् सर्वं देयमिति धनदानेन विश्वजित्यधिकार इत्यर्थः । प्रसङ्गादाह-अन्नेत्यादि ॥

## ॥ विश्वजिति भुमेरदेयत्वाधिकरणम् ॥

## सू. न भूमिः स्यात् सर्वान् प्रत्यविशिष्टत्वात् ॥

(मू) "विश्वजिति सर्वस्वं ददाती"ति । तत्रैव सर्वस्वदाने संशयः - किं भूमिर्देया नवेति । तत्र सार्वभौमस्वत्वात् भूगोलस्य सार्वभौमेन भूमिरपि देयेति प्राप्ते -

ब्रूमः। भूगोलस्य सार्वभौमस्वत्वाभावात् न तेनापि भूमिर्देयेति । सार्वभौमस्यापि भूमौ परिपालनवृत्तिमात्रं न स्वत्वं, अतः कस्यापि भूगोलं स्वमिति भूगोलं न केनापि देयं वस्तु । क्षेत्रादिकं तु देयमेवेति स्थितम्॥

(टि) परिपालनवृत्तिमात्रमिति । परिपालनकण्टकोद्धरण प्रवृत्तित्वेन कर्षकादिभ्यः करादानं दण्डेयभ्यश्च दण्डदानमित्येतावान् सम्बन्ध इत्यर्थः । न देयमिति । यथा सार्वभौमेन भूमिर्न देया तथा माण्डलिको मण्डलं न दद्यादिति बोध्यम् ॥

## ॥ विश्वजिति अश्वादीनामदेयताधिकरणम् ॥

## सू. अकार्यत्वाच्च ततः पुनर्विशेषः स्यात् ॥

(मू) "विश्वजिति सर्वस्वं ददाती"ति सर्वस्वदानं विधाय श्रूयते "न केसरिणो ददाती"ति "नोदयादतः प्रतिगृह्णाती"ति । तत्र संशयः - किमयं प्रतिषेधः, ततश्च विहितप्रतिषिद्धत्वादश्वा विकल्पेन देया उत पर्युदासः ततश्च

न देया इति । तत्र नञो मुख्यार्थलाभात् प्रतिषेधः ततश्च विकल्पेन अश्वा अपि देया इति प्राप्ते,

ब्रूमः । विकल्पस्याष्टदोषदुष्टत्वात् पर्युदा सः । ततो न देया इति । अत्र सामान्यविषयस्यापि विधेः तदधीनात्मलाभेन प्रतिषेधेन तुल्यबलत्वात् प्रतिषेधपक्षे विकल्प इति वोध्यम्

(टि) ननु सामान्यविशेषविषयत्वाद्विधिप्रतिषेधयोरतुल्यबलत्वात् कथं विकल्प इत्यत्राह-अत्र सामान्येति ॥

## ॥ विश्वजिति अविद्यमानसर्वस्वदाननिराकरणाधिकरणम् ॥

## सू. नित्यत्वाच्च अनित्यैर्नास्ति सम्बन्धः ॥

(मू) "विश्वजिति सर्वस्वं ददाती"ति श्रूयते । तत्र संशयः, किमत्र यत् सर्वस्वं तद्देयमिति दानं विधीयते, ततश्च स्वशब्देन धनवाचिना यानि पुरुषस्योपकारकाणि शयनासनादीनि तान्युच्यन्ते तेषां च सर्वत्वं सर्वशब्देन । ततश्च यस्य शयनादिकं सर्वं नास्ति तेनार्जयित्वापि सर्वस्वं देयम् । अथवा चोदकप्राप्तदानानुवादेन सर्वस्वता विधीयते यत् सर्वस्वं ददाति तत् सर्वं स्वमिति । ततश्च यानि विद्यन्ते तानि सर्वाणि देयानि नार्जयित्वा दातव्यमिति । तत्र वाक्यार्थ-विधानात् श्रुत्यर्थविधानस्य बलीयस्त्वाद्दानं विधीयते, ततश्च उक्तरीत्या अर्जयित्वापि सर्वस्वं देयमिति प्राप्ते,

ब्रूमः दानविधानचोदनानीत्येतया प्राप्तस्य दानस्य नैमित्तिकत्वप्रसङ्गात् वाक्यार्थभूता अपि सर्वथा विधीयते । ततश्च यानि विद्यन्ते तानि सर्वाणि देयानि नार्जयित्वा दातव्यमिति । अर्ज्यमानस्य कदाचिदलाभप्रसङ्गात्

यदा लभ्यते तदा दद्यादिति दानस्य लाभो निमित्तं स्यादिति हि नैमित्तिकत्वप्रसक्तिरिति ॥

(टि) नार्जयित्वेति । प्रसिध्दस्वत्वेषूपपन्नोऽयं सर्वशब्दो नासिद्धस्वत्वानामार्जनमाक्षिपतीत्यर्थः ॥

## ॥ विश्वजिति धर्मार्थसेवकशूद्रस्यादेयताधिकरणम् ॥

## सू. शूद्रश्च धर्मशास्त्रत्वात् ॥

(मू) "विश्वजिति सर्वस्वं ददाती"ति श्रूयते । त्रैवर्णिकसुशूषा शूद्रस्य धर्मत्वेन विहिता । तत्सिद्ध्यर्थं यः स्वयमेवोपनतः स धर्मोपनतः । तत्र संशयः - किं धर्मोपनतः परिचारकः शूद्रो देय उत नेति। धर्मोपनतस्यापि त्रैवर्णिक-विधेयत्वात् देय इति प्राप्ते,

ब्रूमः । स्वत्वाभावात् धर्मोपनतः सुश्रूषुः न देयः । दासस्तु स्वत्वाद्देय एवेति द्रष्टव्यम् ॥

(टि) स्वत्वाभावादिति । अनिच्छया परवश्यत्वानभ्युपगमसम्भवाच्चेति द्रष्टव्यम् ॥

## ॥ विश्वजिति दक्षिणाकाले विद्यमानानामेव सर्वस्वानां देयताधिकरणम् ॥

## सू. दक्षिणाकाले यत् स्वं तत् प्रतीयेत तद्दानसंयोगात् ॥

(मू) "विश्वजिति सर्वस्वं ददाती"ति श्रूयते । तत्रैवं संशयः किं दक्षिणाकालात् प्रागेव सर्वं धारयित्वा दातव्यं न किञ्चिदप्यन्यत्र विनियोक्तव्यं तथा यद् भविष्यतीति केनापि प्रमाणेन निश्चितं तदपि दातव्यमित्येवं काल-

त्रयविशिष्टं सर्वस्वं देयमुत दक्षिणाकाले यद्विद्यते तत् सर्वं देयमिति । तत्र सर्वशब्दसामर्थ्यात् कालत्रयविशिष्टं सर्वस्वं देयमिति प्राप्ते,

ब्रूमः। दक्षिणाकाले देयत्वेन प्राप्तस्य धनस्य सर्वताविधायकस्य सर्वशब्दस्य दक्षिणाकाले विद्यमानत्वस्य साकल्येनार्थत्वात् दक्षिणाकाले विद्यमानं सर्वस्वं देयमिति ॥

(टि) अनेन सर्वशब्देन न धारणं प्रयुज्यत इति दर्शितम् ॥

## ॥ विश्वजिति दक्षिणादानोत्तराङ्गणामनुष्ठानाधिकरणम् ॥

## सू. अशेषत्वात्तदन्तः स्यात् कर्मणो द्रव्यसिद्धत्वात् ॥

(मू) "विश्वजिति सर्वस्वं ददाती"ति श्रूयते, प्रकृतौ ज्योतिष्टोमे च दीक्षासु आत्मीयसर्वत्वस्य "इदं मे क्रत्वर्थं इदं में भक्तार्थं इदं म आनत्यर्थमि"ति त्रेधा निर्देशो विहितः । स इह चोदकप्राप्तः । तत्र संशयः । किं दक्षिणाकाले यत् क्रत्वर्थं भक्तार्थमानत्यर्थं तत् सर्वं देयं तत आर्जमानं धनं लभ्यते चेत् कर्म समापनीयं नो चेत् तदन्तमेवोत्सृष्टव्यं अथवा यावता विना क्रतुशेषो न समाप्यते तावच्छेषयित्वा शिष्टं सर्वं देयमुत यदानत्यर्थं तत् सर्वं देयमिति । तत्र प्रत्यक्षवचनेन सर्वस्वदानस्य विहितत्वात् क्रत्वर्थं भक्तार्थमानत्यर्थं च सर्वं देयं, कर्म चोक्तरीत्या समापनीयं वा तदन्तमेवोत्स्रष्टव्यमिति चेत् । उच्यते, अङ्गभूतदक्षिणादानेन प्रधानभूतक्रतुशेषसमापनबाधस्यान्याय्यत्वात् यावता क्रतुशेषः समाप्यते तावच्छेषयित्वा परिशिष्टं सर्वं देयमिति प्राप्ते -

ब्रूमः। "स्वं ददाती"ति देयधनानुवादेन सर्वताविधानाय यद्देयमानत्यर्थं तत् सर्वं देयं, इतरेण तु क्रतुशेषसमापनमिति । अत्र लाघवात् देयस्य सर्वतामात्रं विधीयते नतु सर्वताविशिष्टं स्वं दानकर्मत्वेन विधीयते,

गौरवात् । यत् स्वं ददाति तत् सर्वमिति वचनव्यक्तिः, नतु यद् ददाति तत् सर्वस्वमिति बोध्यम् ॥

(टि) प्रसङ्गाद्वाक्यार्थं दर्शयति अत्र लाघवादित्यादिना ॥

## ॥ अहर्गणस्थेऽपि विश्वजिति सर्वस्वदानाधिकरणम् ॥

## सू. अहर्गणे च तद्धर्मा स्यात् सर्वेषामविशेषात् ॥

(मू) अस्ति ह्यष्टरात्रोऽहर्गणः "अथैतस्याष्टरात्रस्य विश्वजिदभिजितौ एकाहावभित उभयतो ज्योतिर्मध्ये षडहः पशुकामो ह्येतेन यजेते"ति । तत्र "ज्योतिर्गौरायुर्गौर्ज्योतिरि"-त्युभयतो ज्योतिष्षडहस्सु मध्ये कर्तव्यः । आदौ विश्वजित् अन्ते अभिजिदित्यर्थः। अस्ति च स्वतन्त्र एकाहो विश्वजित् एकाहकाण्डपठितः। तत्र च सर्वस्वदानं विहितम् । तदत्राष्टरात्रस्य द्वादशाहप्रकृतिकत्वात् चोदनालिङ्गातिदेशात् द्वादशाहदक्षिणा प्राप्ता, द्वादशाहस्य ज्योतिष्टोमप्रकृतिकत्वात् द्वादशशतं प्राप्तमिति चोदकपरम्परया अष्टरात्रे द्वादशशतं प्राप्तं, तदन्तर्गतश्च विश्वजिदिति तस्यापि चोदनालिङ्गातिदेशात् द्वादशशतं प्राप्तं, नाम-धेयातिदेशात्तु सर्वस्वदानं प्राप्तम् । नामधेयातिदेशस्य च चोदनालिङ्गातिदेशात् बलीयस्त्वं वक्ष्यते । एवं स्थिते संशयः- किमहर्गणगतस्यापि विश्वजितः सर्वस्वमेव दक्षिणा अथवा द्वादशशतमिति । तत्र चोदकपरम्परया द्वादशशतस्य प्राप्तत्वात् द्वादशशतमिति प्राप्ते -

ब्रूमः। नामधेयातिदेशस्य बलीयस्त्वात् सर्वस्वमेव दक्षिणेति । एवं भाष्यकारमतम् ।

वार्तिककारमतम् - तत्र यज्जघन्या भूयासं तत्र मुख्यादपि जघन्यानां बलीयस्त्वमिति वक्ष्यति । अत्र जघन्यानि सप्ताहानि द्वादशशतदक्षिणवन्तीति

तेषां बलीयस्त्वान्मुख्येऽपि विश्वजिति द्वादशशतमेव दक्षिणा । इदम-धिकरणं तु मुख्यस्य भूयोभ्यो बलीयस्त्वमिति कृत्वाचिन्तापरम् ।

द्वादशशतं दक्षिणा देयमुत सर्वस्वमिति संशयः। तत्र द्वादशशतदक्षिणाया अहर्गणार्थत्वेन चोदकप्राप्तत्वादहर्गणान्तः पातिनो विश्वजितोऽपि द्वादशशतमेव दक्षिणेति प्राप्ते -

ब्रूमः। चोदकानां प्रतिकर्मावसायित्वस्य मुख्यबलीयस्त्वस्य च सत्वात् विश्वजिति नामप्राप्तं सर्वस्वमेव दक्षिणेति ॥

(टि) इदानीं विश्वजित्येवाहर्गणगते विचार्यते । नामधेयातिदेशस्य बलीयस्त्वादिति । वक्ष्यमाणादित्यर्थः । एवं भाष्यकारमतमुक्त्वा वार्तिककारमतमाह - अथेत्यादिना । अयमत्राचार्याशयः- प्राप्तिमात्रपरमिद-मधिकरणम् । अहर्गणान्तर्गते विश्वजिति नाम्ना सर्वस्व-दानप्राप्तिरस्तीति भाष्याशयः । न तु सर्वस्वं देयमितीति । यत्तु पार्थसारथिमिश्रैस्तन्त्ररत्ने वार्तिककाराभिप्रायत्वेन दर्शितं तद्दर्शयति इदमधिकरणमित्यादिना । शास्त्रदीपिकायां न्यायमालायां च न कृत्वाचिन्तत्वेनोक्तं, किन्तु प्राप्ति-मात्रपरत्वेनेति, कृत्वाचिन्ता वा प्राप्तिमात्रपरंवास्तु, सर्वथा विश्वजित्यहर्गणान्तर्गते न सर्वस्वदक्षिणेति वार्तिककाराशय इति ॥

## ॥ विश्वजिति द्वादशशतन्यूनस्यानधिकाराधिकरणम् ॥

## सू. विकारः सन्नुभयतोऽविशेषात् ॥

(मू) एकाहकाण्डपठितो विश्वजित् ज्योतिष्टोमविकारः। तत्र त्विदं श्रूयते "विश्वजिति सर्वस्वं ददाती"ति प्रकृतौ विधाय श्रूयते "यद्येतावता नानमेयुरपि सर्वस्वेने"ति क्वचित् एवं वा ऋत्विज आनमनीयाः अपि सर्वस्वेनेति पाठो दृश्यते । तच्च वैकल्पिकं सर्वस्वदानं चोदकप्राप्तं "विश्वजिति सर्वस्वं

ददाती"त्यनेन नियम्यते । प्रकृतौ च द्वादशशतादधिकमेव सर्वस्वमिति । इहापि तथैवेति । तत्र संशयः- किं द्वादश-शतधनस्य ततो न्यूनधनस्याधिकधनस्य च सर्वस्य विश्वजिताधिकारः उताधिकधनस्यैवेति ।

तत्र श्रुतायाः सर्वस्वतायाः सर्वैरपि सम्पादयितुं शक्यत्वात् सर्वस्याप्यधिकार इति प्राप्ते -

ब्रूमः। चोदकप्राप्तत्वात् द्वादशशताधिकसर्वस्वस्यैवात्र नियमविधानात् द्वादशशतादधिकधनस्यैव विश्वजिताधिकार इति ॥

(टि) द्वादशशताधिकमेवेति । द्वादशशतेनासिद्धं चानतिं ततोऽधिकेनैव साधयितुं शक्नुयान्न न्यूनेनेति भावः ॥

## ॥ अपरिमितशब्दस्य सङ्ख्यान्तरत्वाधिकरणम् ॥

## सू. अपरिमिते शिष्टस्य सङ्ख्याप्रतिषेधस्तच्छ्रुतित्वात् ॥

(मू) आधाने श्रूयते "एका देया षट् देया द्वादश देयाश्चतुर्विंशतिर्देया शतं देयं सहस्रं देयमपरिमितं देयमि"ति । तत्रा"परिमितं देयमि"त्यत्र संशयः- किं यदेका देयेत्यादि विहितं परिमितं सङ्ख्या तं तन्न देयमिति अपरिमितं देयमिति प्रतिषेधो विधीयते उत बहुयुक्तं दानान्तरं विधीयत इति । तत्रापरिमितशब्दस्यावयवव्युत्पत्त्या यस्य परिमाणं नास्ति तदभिधेयत्वात् आर्थिको न न प्रतिषेध आर्थिको विधीयत इति प्राप्ते -

ब्रूमः। रूढिबलीयस्त्वादुक्तरूपं दानान्तरं विधीयत इति, बहुत्वे परिमितशब्दस्य समुदायप्रसिद्धिः तया चावयवप्रसिद्धिर्बाध्यत इति । अत्र दीयमानेन परिमितेन नञोऽन्वये परिमाणप्रतिषेधे पर्यवस्यति

अन्यस्यामसम्भवात् । ततश्च तद्विशिष्टदानप्रतिषेधोऽपि देयपरिमाणप्रतिषेधात् सिध्यतीति प्रतिषेधस्यार्थिकत्वमिति पूर्वपक्ष्याशय इति बोध्यम् । अत्र रूढेरलब्धत्वशङ्का विद्यमानाव-यवेष्वपि ।

(टि) गतो विश्वजिति सर्वस्वविचारः । इदानीमाधानेऽपरिमितविचारः प्रस्तूयते । प्रतिषेधस्यार्थिकत्वमेव प्रतिपादयति अत्र दीयमानेनेत्यादिना । पौनरुक्त्यमाशङ्क्य परिहरति अत्र रूढेरित्यादिना ॥

## ॥ अपरिमितशब्देन सहस्राधिकग्रहणाधिकरणम् ॥

### सू. अनियमोऽविशेषात् ॥

(मू) अपरिमितं देयमित्येतत् कल्पान्तरं तत्र इति समधिगतम् । तत्र संशयः- किं सहस्रादूनं अधिकं वापरिमितमित्यनियम इति उत सहस्रादधिकमेवेति । तत्र सहस्राधिके न्यूने च बहुत्वाविशेषादनियम इति प्राप्ते ब्रूमः । आपेक्षिकस्य बहुत्वस्यानन्तवाक्यनिर्दिष्ट सन्निहितसहस्रापेक्षित्वात् सहस्रादधिकमेवापरिमितमिति ॥

(टि) सन्निहितेति हेतुगर्भं विशेषणम् ॥

## ॥ 'इति ह स्मे'त्यादि परकृतिपुराकल्पानामर्थवादताधिकरणम् ॥

### सू. परकृतिपुराकल्पं च मनुष्यधर्मः स्यादर्थाय ह्यनुकीर्तनम् ॥

(मू) एककर्तृकमुपाख्यानं यथा "इति हस्माह बर्कुर्वार्ष्णिर्माषानेव मह्यं पचत न वा एतेषां हविर्गृह्णातीत्येवमादयः । माषान् पचत हविर्गृह्णन्तीति

पाठः क्वचिद्दृश्यते । बहु-कर्तृकमुपाख्यानं पुराकल्पः यथा" उल्मुकैः भस्मपूर्वं समाजग्मुः तान् ह्यसुरा रक्षांसि निजघ्नुरित्यादयः । मानपरिमाणेषु बहुत्वमात्रे अपरिमितशब्दस्य प्रयोग-दर्शनात् लब्धं रूढिरित्युत्तरम् तत्र विधायकत्वमिति कृत्वाचिन्त्यते । तत्र संशयः- किमेते सर्वपुंसां माषपाकादि - धर्माणां विधयः उत तद्गोत्राणां अथवा अर्थवादा इति । तत्र वार्ष्णिरित्यादि विशिष्टगोत्राणां निर्देशात् तद्गोत्राणामेव एते माषपाकादि-धर्मविधय इति चेत् । उच्यते । बट्कुर्वार्ष्णिरित्यादि पुरुषग्रहणस्य विधि - प्रशंसार्थत्वात् सर्वपुंसामेते धर्मविधय इतीति प्राप्ते -

ब्रूमः । विधिशेषत्वादर्थवादा एत इति। "तस्मादारण्यमेवा - ग्निर्यदि"ति, विधेः शेष "इति हस्मे"त्यादि परकृतिः गृहपतेरेवाग्निषु निर्मन्थ्यं निर्वपेरन्निति विधेःशेषः "उल्मुकैरित्यादि पुराकल्प इति विवेकः । औदुम्बराधिकरण एव एवञ्जातीयकानामर्थवादत्वं सिद्धमिति अत्र विधित्वमिति कृत्वा अधिकारः चिन्त्यत इति वोध्यम् ॥

(टि) गतो दक्षिणाद्वारेणाधिकारविचारः । इदानीं कृत्वाचिन्तयाधि कारश्चिन्त्यते । तदेवाह-औदुम्बराधिकरण इति ॥

## ॥ सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताधिकरणम् ॥

## सू. सहस्रसंवत्सरं तदायुषामसम्भवान्मनुष्येषु ॥

(मू) अस्ति सहस्रसंवत्सरं सत्रं "पञ्चपञ्चाशतस्त्रिवृतस्संवत्सराः, पञ्चपच्चाशतः पञ्चदशाः पञ्चपञ्चाशतः सप्तदशाः, पञ्चपञ्चाशत एकविंशाः, विश्वसृजां सहस्र-संवत्स"रमिति । तत्र संशयः- किमयं संवत्सरशब्दो मुख्यः तत्र संशयः- किं गन्धर्वादीनामधिकार उत मनुष्याणाम् ।

तत्रापि संशयः- किं रसायनादिसम्पादितसहस्रायुषामुत पितृपुत्रादीनां सम्भूय सहस्रायुस्सम्भवात् कुल-कल्पः, आहोस्वित् सहस्रसंवत्सरसत्रविधि बलादेव तत् कुर्वतां सहस्रायुष्ट्वसम्भवात् सर्वेषामधिकारः, अथवा पञ्चपञ्चाशत इत्यधिकारिविशेषणं, ततश्च पञ्चपञ्चाशद्यजमानैः त्रिवृदादिस्तोमकसंवत्सरेषु अनुष्ठीयमानेषु चतुर्भिः संवत्सरैः सत्रं समाप्यत इति अर्धतृतीयशतानां कर्तॄणामधिकारः किं वा संवत्सरसङ्ख्याशब्दयोः सम्बन्धात् तयोश्च यथाश्रुतयोः सम्बन्धे उक्तदोषतादवस्थ्यात् सङ्ख्यासंवत्सरशब्दयोरन्यतरस्य गौणत्वावश्यकत्वात् जघन्यत्वात् भावनाद्यनियतवाचकत्वात् संवत्सरशब्दो गौणः। तत्रापि संशयः- किं मासेषु गौण उत "संवत्सरप्रतिमा वै द्वादश रात्रय" इत्युपचारात् द्वादशरात्रिषु गौणः उत त्रिवृदादिशब्दानुगुण्याद्दिवसेषु गौण इति । अत्र संवत्सरशब्दस्य मुख्यत्वपक्षे गन्धर्वादीनामधिकारो मनुष्याणामधिकार इति द्वौ पक्षौ । तत्र मनुष्याधिकारे चत्वारः पक्षाः, संवत्सरशब्दस्य गौणत्वपक्षे तु त्रयः पक्षाः। एवं मनुष्याधिकारपक्षे सप्त पक्षाः गन्धर्वाद्यधिकारपक्षश्चेत्यष्टौ पक्षा इति विवेकः । तत्र संवत्सर - परिमिताहस्सङ्ख्यस्य त्रिवृदादिशब्दै- रुच्यमानस्यपञ्चसंख्याविशिष्ट- पञ्चाशत्सङ्ख्यया विशेषणे गौणतां विनोत्पन्नत्वात् मुख्यसंवत्सरशब्दः। तत्र मनुष्याणामल्पायुषां अनधि कारात् गन्धर्वादीनामधिकार इति चेत् । उच्यते, शास्त्रस्य मनुष्याधि कारत्वनियमान्मनुष्याणामेवाधिकारः, तत्रापि अन्यथासम्भवात् रसायनादिसम्पादितसहस्रायुषामिति ।

अत्र ब्रूमः। आरोग्यमात्रहेतुकस्य रसायनस्यैताव - दायुस्सम्पादनसामर्थ्याभावादुक्तरीत्या कुलकल्प इति । अत्र वदामः - शास्त्रफलं प्रयोक्तरीति न्यायबाधप्रसङ्गात् उक्तरीत्या सर्वेषामधिकार इति । अत्रोच्यते - "शतायुर्वै पुरुष" इति श्रुतम् । शतायुष्ट्वबाधेन

सत्रविधिना सहस्रायुष्ट्वकल्पनासम्भवादुक्तरीत्या अर्धतृतीयशतानां कर्तृणामधिकार इति ।

अत्राभिधीयते - "चतुर्विंशतिपरमाः सत्रमासीरन्नि"ति विहितपरिमाणबाध प्रसङ्गात् उक्तरीत्या संवत्सरशब्दो गौणः । तत्र "यो मासः स संवत्सर" इत्यर्थवादानुरोधात् मासेषु गौण इति । अत्र वदामः- मासपरत्वेऽपि संवत्सर-शब्दस्याशक्तिततादवस्थ्यादुक्तरीत्या द्वादशरात्रिषु गौण इति । एवं प्राप्ते -

ब्रूमः । प्रतिमाशब्दविशेषणभूतस्य संवत्सरशब्दस्य द्वादशरात्रिष्वप्रयुक्तस्य द्वादशरात्रिषु गौणत्वे प्रमाणाभावात् त्रिवृदादिशब्दानुगुण्याद्दिवसेष्वेव संवत्सर-शब्दो गौण इति त्रिवृदादिशब्दाः स्तोत्रीयसङ्ख्यावचनास्सन्तः तत्सम्बन्धिन्यपि लक्षणया वर्तितुं शक्ताः संवत्सरशब्दस्य अहस्सङ्ख्यपरत्वे तु लक्षणयाहस्सङ्ख्ये त्रिवृदादिशब्दा वर्तेरन्निति संवत्सरशब्दस्य दिवसपरत्वे त्रिवृदादिशब्दानुगुण्यमिति बोध्यम् अत्र भूमार्थबहुव्रीहिव्यतिरिक्तेषु समासेषु एक-वचनान्तेनान्यतमलिङ्गेन निग्रह इत्युत्सर्गः। ततश्चास्तित्वविवक्षायां बहुव्रीहौ एकवचनान्तेनैव निग्रह इति "शतायुरि"त्यत्र शतान्यस्यायुरिति विग्रहो न सम्भवति, किन्तु शतमायुरस्येत्येवेति न मनुष्याणां सहस्रायुष्ट्वमिति आकरे स्थित-मिति ॥

## ॥ इति षष्ठाध्यायस्य सप्तमः पादः ॥

(टि) इदानीं सहस्रसंवत्सरस्य विश्वसृजामयनस्याधिकारश्चिन्त्यते । मनुष्याधिकारत्वेति । गन्धर्वादीनामग्न्याद्युपसंहारासामर्थ्याच्च नाधिकार इत्यपि द्रष्टव्यम् । शास्त्रफलं प्रयोक्तरीति । समग्रकर्मानुष्ठायिनामेव फलं न विकलानुष्ठायिनामित्यर्थः। बाधप्रसङ्गादिति । अनुपात्तयज-

मानसम्बन्धापत्तेश्चेति द्रष्टव्यम् । त्रिवृदादिशब्दानुगुण्यमेव प्रतिपादयति - त्रिवृदादिशब्दा इत्यादिना ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे

षष्ठाध्यायस्य सप्तमः पादः ॥

✣ ✣ ✣

॥ श्रीः ॥

## ॥ अथ षष्ठाध्यायस्याष्टमः पादः ॥

### ॥ चतुर्होतृहोमेऽनाहिताग्नेरेवाधिकाराधिकरणम् ॥

सू. इष्टिपूर्वत्वादक्रतुशेषो होमः संस्कृतेष्वग्निषु स्यादपूर्वोऽप्याधानस्य सर्वशेषत्वात् ॥

(मू) इदं श्रूयते किञ्चिदनारभ्य प्रजाकामं याजयेत् चतुर्होत्रा चतुर्गृहीतमाज्यं गृहीत्वा चतुर्होतारं व्याचक्षीत पूर्वेण ग्रहणेनार्धं जुहुयात् उत्तरेणार्धमिति । तत्र संशयः- किं पवमानेष्टिसंस्कृतेष्वग्निषु एवमादयः कर्तव्याः तत आहिताग्नेरेवात्राधिकार उत पवमानेष्टिसंस्कृतेष्वपि कर्तव्याः ततश्चानाहिताग्नेराहिताग्नेश्चाप्यत्राधिकारः किं वा पवमानेष्टयसंस्कृतेष्वेव ततश्चानाहिताग्नेरेवाधिकार इति ।

तत्र होममन्त्राङ्गभूतस्याहवनीयस्य चतुर्होतृहोमेष्वप्यङ्गत्वात् आहिताग्नेरेवाधिकार इति चेत् । उच्यते । "एषा वा अनाहिताग्नेरिष्टिः यच्चतुर्होतार इति वचनात् अनाहिताग्नेरप्यधिकार इति प्राप्ते -

ब्रूमः । वाचनिकेनाहिताग्नावधिकारिणि सति सामर्थ्य - निमित्ताहिताग्न्यधिकारसम्भवादनाहिताग्नेरेवाधिकार इति । अयमत्र विवेकः- अक्रतुशेषेषु चतुर्होत्रादिषु होमेषु अनाहिताग्नेरधिकारः क्रत्वर्थेषु क्रत्वनापातिपुरुषार्थेषु चाहिताग्नेरधिकार इति ॥

ब्रूमः। वाचनिकेनाहिताग्नावधिकारिणि सति सामर्थ्य- निमित्ताहिताग्न्यधिकारसम्भवादनाहिताग्नेरेवाधिकार इति । अयमत्र विवेकः- अक्रतुशेषेषु चतुर्होत्रादिषु होमेषु अनाहिताग्नेरधिकारः क्रत्वर्थेषु क्रत्वन्तपातिपुरुषार्थेषु चाहिताग्नेरधिकार इति ॥

॥ श्रीः ॥

## ॥ अथ षष्ठस्याष्टमः पादः ॥

(टि) अथाग्निद्वारेणाधिकारचिन्ता प्रस्तूयते - अङ्गत्वादिति, एषा वा इत्यत्रैषा वचनव्यक्तिः यैषानाहिताग्नेः क्रिया जपात्मिका सेष्टिरिति । इष्टिशब्दश्च जपस्तुत्यर्थ इति भावः । सत्यमुक्ता वचनव्यक्तिः सम्भवति । इयमपि वचनब्यक्तिः सम्भवत्येव यैषा चतुर्होत्रा होमात्मिकेष्टिः सानाहिताग्नेरिति । तत्रान्यतरनिर्धारणे प्रमाणाभावादित्यभिप्रायेणाह - एषा वा इत्यादिना । एषा वा इति वचनस्य मन्त्रपरत्वेऽर्थावादमात्रमनर्थकं स्यादित्याशयेनाह वाचनिकेत्यादिना । न्यायसिद्धमेवार्थं सुखग्रहणायाह अयमत्रेति ॥

## ॥ अनाहिताग्निषु उपनयनहोमाधिकरणम् ॥

## सू. उपनयन्नादधीत होमसंयोगात् ॥

(मू) इदमाम्नायते "उपनयंस्तिसृभिर्जुहुयादि"ति । तत्र संशयः किमयमुपनयनहोमः आधानसंस्कृतेष्वग्निषु कर्तव्य उतासंस्कृतेष्विति । तत्र होममात्रोद्देशेनाहवनीया [भि] धानादाधानसंस्कृतेष्विति प्राप्ते -

ब्रूमः । अविद्यस्य अपत्नीकस्य अनुपनीतस्याधानानधिकारादाधानासंस्कृतेष्विति । अत्रानुपनीत एवोपनयनाधिकारसिध्यर्थं "दारानुपयम्याग्निंश्चोत्पाद्य लब्धाहबनीय उपनयने अधिक्रियत इति शङ्का, स्नात्वा भार्यामनुगच्छेदिति वचनविरोधप्रसङ्गात् नानुपनीतस्य दारसङ्ग्रह इत्युत्तरमिति ।

(टि) उपनयनहोम इति । उपनयनाङ्गभूता होमा माणवककर्तृका

आचार्यकर्तृकाश्चेत्यर्थः। भाष्यानुरोधेनैकवचनान्तनिर्देशः। आधानासंस्कृतेष्विति । लौकिकाग्निष्वित्यर्थः। दारानुपयम्येति। स्नात्वा भार्यामनुगच्छेदिति स्नानोत्तरकाला दारक्रिया या सापत्यार्था भविष्यतीत्यभिप्रायः। स्नात्वा भार्यामिति। अयमाशयः - कर्मार्थैरेव दारैरपत्यमपत्यार्थैश्च कर्म सिध्यतीति नार्थः पृथग्दारक्रियया । किञ्च य एव दारसङ्ग्रहोऽपत्यकर्मोभयार्थेन सन् प्राप्तस्तस्यैवाविशेषात् कालमात्रविधिः स्नात्वा भार्यामुपेयादिति । ततश्च स्नानात् प्राग्दारसङ्ग्रहे नियम-वचनविरोध इति ॥

## ॥ अनाहितेऽग्नौ स्थपतीष्टयधिकरणम् ॥

## सू. स्थपतीष्टिः प्रयाजवदग्न्याधेयं प्रयोजयेत् तादर्थ्याच्चापवृज्येत ॥

(मू) अस्ति स्थपतीष्टिः "एतया निषादस्थपतिं याजयेदि"ति । तत्र संशयः - किमियं स्थपतीष्टिराधानसंस्कृतेष्वग्निषु कर्तव्याथवा लौकिकेष्विति । तत्र यद्यपि निषादस्य शूद्रस्याधानं नास्ति तथापि चोदकप्राप्ता - हवनीयादिसम्पत्यर्थं स्थपतीष्टेरेवाधानप्रयोजक-त्वात् आधानसंस्कृतेष्वेवाग्निषु इयं स्यादिति प्राप्ते -

ब्रूमः। आधानस्यानङ्गस्य दर्शपूर्णमसानङ्गस्य स्थपतीष्टौ चोदकेनाप्राप्तस्य स्थपतीष्टयनङ्गस्य स्थपतीष्टिप्रयुक्तत्वसम्भवात् लौकिकेष्वग्निषु स्थपतीष्टिः कर्तव्येति ॥ इदं त्ववधेयम् - आधानाभावादेवाहवनीयाद्यग्नीनामपि स्थपतीष्टयनङ्गत्वमिति न तद्द्वारेणाप्याधानसिद्धिरिति ।

(टि) चोदकेन वा प्रयुक्तया वा प्रप्तिरिति विकल्प्य आह-दर्शपूर्णमासान

ङ्गस्येति । द्वितीय आह स्थपतीष्टचनङ्गस्येति । यद्याधानस्य साक्षाद्विधि - र्नास्ति तदा "नक्तं गार्हपत्यमादधाती"त्यादिवेदपर्यालोचनेनाहवनीयादिशब्दानां पावकादिशब्दवदाधानक्रियानिमित्तत्वमाश्रित्य स्थपतिरप्याहवनीयादिसिद्ध्यर्थमाधानं कुर्यात् यदा तु वसन्तादि - विधानान्याधानविधायकानीति द्वितीये स्थितं तदा ब्राह्मणादीनामेव श्रवणादनधिकारिणा स्थपतिना कृतेनाप्याधानेन नाहवनीयादित्वं सिध्यति, ब्राह्मणादिभिः कृतस्यैवाधानस्य तन्निमित्तत्वादिति लौकिकेष्वेव स्थपतीष्टिरित्यभिप्रायः ॥

## ॥ अनाहितेऽग्नाववकीर्णपश्वनुष्ठानाधिकरणम् ॥

## सू. अवकीर्णपशुश्च तीद्वधानस्याप्राप्तकालत्वात् ॥

(मू) अस्त्यवकीर्णी पशुः "ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेते"ति। "योब्रह्मचार्यवकिरेत् स गर्दभं पशुमालभे"तेति च पाठो दृश्यते। तत्र संशयः- किमयमवकीर्णपशुः अधानसंस्कृतेष्वग्निषु स्यात् उत लौकिकेष्विति । तत्र पूर्ववत् पशोराधानप्रयोजकत्वादाधानसंस्कृतेष्वेव स्यादिति प्राप्ते,

ब्रूमः। अपत्नीकस्य ब्रह्मचारिण आधानासम्भवात् लौकिकेष्वग्निषु अवकीर्णपशुः कर्तव्य इति । अत्र त्रैवर्णिकत्वाव्द्रह्मचारिणो विद्यावत्वाच्च आधानं सम्भवतीति शङ्कानिरासार्थमिदमधिकरणमिति बोध्यम् ॥

(टि) पूर्ववदिति । स्नात्वा भार्याधिगमसम्भवाच्चेति द्रष्टव्यम्। अपत्नीकस्येति। "अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेदि"ति वचनात् अवकिरणे च ब्रह्मचर्यविप्लवात्तदसमाधाय गार्हस्थ्यप्रवेशासम्भवादपत्नीकत्वमित्यभिप्रायः ॥

## ॥ दैवकर्मणामुदगयनादिकालताधिकरणम् ॥

सू. उदगयनपूर्वपक्षाहः पुण्याहेषु दैवानि स्मृतिरूपा - न्यार्थदर्शनात् ॥

(मू) उपनयनचौलकर्मादीनि दैवकर्माण्युदाहरणम् । तत्र संशयः किमनियतकाले दैवानि कर्तव्यानि उत उदगयनपूर्वपक्षाहः पुण्याहेष्विति । तत्र विशेषाश्रणादनियतकाल इति प्राप्ते,

ब्रूमः। उदगयनपूर्वपक्षाहःपुण्याहेष्वेव उपनयनादीनि दैवानि कर्तव्यानि स्मृतिषु तथैव विहितत्वादिति ।

अत्रायं विवेकः- अग्निहोत्रदर्शपूर्णमासादीनां अन्येषां सन्ध्योपासनादीनां च येषां कालविशेषः श्रुतः तद्व्यतिरिक्ता-- नामेवायमुदगयनादिनियमः। तत्रापि येषु उदगयनादिसमुच्चयो न सम्भवति तेषु यथासम्भवमुदगयनादयः यथा सर्पबलिरनाहिताग्न्याग्रयणमित्यादीनि उदगयनमनादृत्य पूर्वपक्षादिकमादृत्य क्रियन्ते स्मृतिप्रामाण्यादिति । पित्र्याणि कर्माण्युदाहरणम् । तत्र संशयः- किं पित्र्याण्यनियतकाले कर्तव्यानि उत दैवकालादितरेषु कालेष्विति । तत्राविशेषात् अनियतकाल इति प्राप्ते -

ब्रूमः। दैवकालादितरेषु दक्षिणायनापरपक्षापराह्णादिषु कालेषु कर्तव्यानि तथैव स्मृतिषु विहितत्वादिति । अत्रापि पूर्ववत् सम्भवासम्भवौ द्रष्टयौ । तत्रापि येषामहरहरुदकतर्पणश्राद्धादीनां कालविशेषः स्मृतः तानि तत्रैव कर्तव्यानीति । इदं न पृथगधिकरणमिति पक्षान्तरम् ॥

(टि) गतोऽग्निद्वारा विचारः । इदानीं कालाधिकारचिन्ता उपनयेत्यादिना ।

पित्र्येषु चिन्त्यते-पित्र्याणीत्यादिना । पक्षान्तरमिति भाष्यकारेण न व्याख्यातमिति बोध्यम् ॥

## ॥ ज्योतिष्टोमाङ्गयाच्ञाक्रययोर्नित्यताधिकरणम् ॥

### सू. याच्ञाक्रयणमविद्यमाने लोकवत् ॥

(मू) ज्योतिष्टोमे श्रूयते "द्वादशरात्रीर्दीक्षितो भृतिं वन्वीते"ति अथ तया सोमं क्रीणातीति । भृतिं वन्वीतेति धनयाचना कर्तव्येत्यर्थः । तत्र संशयः- किं यस्य भृतिर्न विद्यते तेन भृतिर्वनितव्या यस्य सोमो न विद्यते तेन सोमः क्रेतव्य इत्युभयमविद्यमाने स्यात् उत यस्य भृति-र्विद्यते तेनापि सा वनितव्या यस्य सोमो विद्यते तेनापि सोम क्रेतव्य इति भृतियाच्ञासोमक्रयेणोभयं नियमेन विद्यमानेऽविद्यमाने च कर्तव्यमिति ।

तत्र वननक्रयणयोः ज्योतिष्टोमप्रकरणाम्नातवाक्यभ्यां तदङ्गत्वेन विधानादुभयं नियमेन कर्तव्यमिति । अत्र प्रकरणादनयोः क्रत्वङ्गत्वं न द्रव्यलाभार्थत्वमिति बोध्यम् ॥

(टि) गतोऽयं विचारः। अधुना याच्ञाद्यधिकारचिन्ता। अविद्यमाने स्यादितीति। तस्माद् द्रव्यवतो न याच्ञादावधिकारः। विधानादिति । अपूर्वप्रयुक्तमेव याच्ञादि । तस्मादनेन विना वैगुण्यादपूर्वमेव नोत्पद्यत इति नित्यमेव याच्ञाक्रयणमित्यभिप्रायः ॥

## ॥ ज्योतिष्टोमादिषु पयोव्रतादीनामपि नित्यताधिकरणम्

### सू. तथा भक्षप्रैषाच्छादनसंज्ञप्तहोमद्वेषम्

(मू) ज्योतिष्टोमे श्रूयते - "पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्य आमिक्षा वैश्यस्ये"ति भक्षः, तथा दर्शपूर्ण-मासादिषु प्रैषाः "प्रोक्षणीरासादये"त्यादयः । तथा वाजपेये श्रूयते "दर्भमयं वासो भवती"ति, तथा पशौ श्रूयते संज्ञप्तहोमः यत्पशुर्मायुमकृतोरोवापदिभराहते अग्निर्मा तस्मादेनसो विश्वान्

मुञ्चन्त्वंहसः तथा "योऽस्मान् द्वेष्टि यें वयं द्विष्म" इति वचनान्युदाहरणम् । तत्र संशयः- किमन्यस्मिन् भक्षे विद्यमाने पय आदिकमुत विद्यमानेऽपि, तथा प्रेष्यस्य प्रैषं, विना प्रैषार्थज्ञाने विद्यमाने म प्रेषितव्य उता विद्यमानेऽपि, तथा सूत्रमये वासस्यविद्यमाने दर्भमयं वासः उता विद्यमानेऽपि, तथा मायुकरणोरोहननान्यतरनिमित्ते विद्यमाने होम उताविद्यमानेऽपि, तथा भ्रातृव्ये विद्यमाने "योऽस्मानि"ति मन्त्रोच्चारणं उताविद्यमानेऽपीति । तत्र पूर्वाधिकरणपूर्वपक्षन्यायात् पूर्वपक्षे प्राप्ते -

बूमः। पूर्ववत् क्रत्वङ्गत्वात् भक्षान्तरादिषु विद्यमानेष्वविद्यमानेष्वपि पय आदयः स्युरिति, अत्र प्रैषवाससां पुरुषार्थत्वशङ्का संन्नप्तहोमस्य नैमित्तिकत्वशङ्का मन्त्रोच्चारणस्य भ्रातृव्योपद्रवार्थत्वशङ्का, तन्निरासार्थमिदमधिकरणमिति ॥

(टि) पूर्वाधिकरणन्यायमतिदिशतीति दर्शयन्नाह पूर्वाधिकरणेत्यादिना । वैयर्थ्यमाशङ्क्याह-अत्र भक्षेत्यादिना ॥

## ॥ अपररात्रे व्रतस्यानित्यताधिकरणम् ॥

## सू. अनर्थकं त्वनित्यं स्यात् ॥

(मू) ज्योतिष्टोमे श्रूयते-"मध्यन्दिनेऽपररात्रे वा व्रतं व्रतयती"ति । तत्र संशयः- किमजीर्णेऽपि कर्तव्य-मुत नेति। तत्र विहितत्वादजीर्णेऽपि कर्तव्यमिति प्राप्ते -

बूमः। अजरणप्रयुक्तप्रधानानुष्ठानविघ्नप्रसङ्गात् नाजीर्णे व्रतं व्रतयितव्यमिति ॥

(टि) इदानीं व्रत एवापवादः क्रियते-विघ्नप्रसङ्गादिति । रोगोत्पत्त्येति भावः ॥

TAMIL NADU STATE DEPARTMENT OF ARCHAEOLOGY LIBRARY, Date ... MADRAS 28

## ॥ छागस्यैवाग्नीषोमीयपशुताधिकरणम् ॥

## सू. पशुचोदनायामनियमोऽविशेषात् ॥

(मू) ज्योतिष्टोमे श्रूयते - "यो दीक्षितो यदग्नीषोमीयं पशुमालभत" इति । एकेषामाम्नात"मजोऽग्नीषोमीय" इति । तत्र प्रतिशाखं कर्म भिन्नमिति कृत्वाचिन्तेयम् । तत्र संशयः - किं यः किश्चत् पशुः आलम्भनीय इत्यनियमः उत छाग इति । तत्र विशेषाश्रवणात् अनियम इति प्राप्ते -

ब्रूमः। "छागस्य वपाया मेदसोऽनुब्रूही"ति मन्त्रवर्णाच्छाग एवालम्भनीय इति ॥

अत्र छिन्नगमनयोगाद्यौगिकश्छागशब्दः अश्वादि-वचन इति एकः पक्षः, पयोवचन इत्यश्वादिष्वविरुद्ध इत्यपरः पक्षः, पशुशब्दश्छागत्वादिपशुत्वावान्तरसामान्यवाचक इति पक्षान्तरम् । पशुत्वसामान्यवचनः पशुशब्दः छागत्वसामान्यवचनः छागशब्द इति सिद्धान्तः। ततश्च साधनत्वेन पशुं तत्प्रकाशकत्वेन मन्त्रणं च स्वीकुर्वता प्रयोगवचनेन सामर्थ्यादनेन मन्त्रेण प्रकाशितं पशुमालभेतेति विहितं भवतीत्यर्थाच्छागेन पशुना यजेतेति विशेषणसम्भवात् पश्वन्तरानुपादानेन न कश्चिद्विरोध इति स्थितम् ॥

## ॥ इति षष्ठाध्यायस्याष्टमः पादः

## अध्यायश्च समाप्तः ॥

(टि) इदानीं पशुवन्धाधिकारचिन्ता । तत्रेति । चोदनायां पशुमिति सामान्यश्रवणात् मन्त्रे च छागस्येति विशेष-श्रवणात् संशयः । विशेषाश्रवणादिति। अयमाशयः - विधिस्तुत्योरेकवाक्यत्वात् प्राक्स्तुतेरपर्यवसितोऽञ्जनविधिरर्थवादगतघृतविषये पर्यवस्यतीति युक्तं,

मन्त्रवाक्ययोस्तु भिन्नवाक्यत्वादपरिपन्थिविधिवाक्यं सामान्ये पर्यवसितं न यमन्त्रानुरोधेन नेतुं युक्तं, मन्त्रस्तु चोदितार्थप्रकाशनार्थत्वाद्यथा - कथञ्चिच्चोदितार्थवशेन नीयमानो न दुष्यतीति । मन्त्रवर्णादिति । चोदना हि पशुत्वसामान्यमङ्गत्वेन विधत्ते। तच्च छागेऽप्यविकलमस्त्येव । अतो न चोदनामन्त्रयोर्विरोधो येन मन्त्रवशेन चोदनानयनमयुक्तं स्यादिति भावः ।

आकरोक्तान् पक्षान् दर्शयति अत्र छिन्नेत्यादिना । अत्र शास्त्रदीपिकायां अध्यायार्थसङ्ग्रहश्लोकः पूर्वोत्तरानुषङ्गसङ्गतिप्रदर्शनार्थः

अधिकृतिरिति सिद्धयशेषभेदप्रयुक्ति -
क्रमनियमविचारैरेतया चाधिकृत्या ।
सुविदित उपदेशोऽनन्तरं चातिदेशो
विकृतिषु तत ऊहो वाधतन्त्रप्रसङ्गाः ॥ इति ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥

षष्ठाध्यायस्याष्टमः पादः ॥

समाप्तश्चाध्यायः ॥

॥ अथ सप्तमाध्यायस्य प्रथमः पादः ॥

## ॥ प्रयाजादिधर्माणामपूर्वप्रयुक्तताधिकरणम् ॥

### सू. श्रुतिप्रमाणत्वाच्छेषाणां मुखभेदे यथाधिकारं भावः स्यात् ॥

(मू) दर्शपूर्णमासयोः ज्योतिष्टोमस्य च प्रकरणे प्रयाजादयो दक्षिणादयश्च

धर्माः समाम्नाताः । तत्र संशायः - किमेते धर्माः यजिप्रयुक्तत्वात् सर्वयागार्था विहिताः तस्मा-दुपदेशत एव ऐन्द्राग्नसौर्यश्येनादीनामङ्गला-भादुपदेशलक्षणपूर्वषट्कानन्तरं उत्तरषट्कमतिदेशलक्षणं नारम्भणीयमुतापूर्वप्र-युक्तत्वादयथाप्रकरणं व्यवस्थिताः, ततश्चातिदेशतः एव विकृतिषु धर्माणां प्राप्तिरिति उपदेशलक्षणानन्तरमतिदेशलक्षणमारभणीयमिति ।

तत्र "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" "ज्योतिष्टोमेन स्वर्गकामो यजेते"ति प्रयोगवाक्यगतयजतिना वा करणभूतयागोद्देशेन यज्यर्थतया धर्मविधानात् यजिप्रयुक्तत्वात् सर्वयज्यर्था एव धर्मा विहिताः । तस्मादुपदेशात एव सौर्यादीनां धर्मलाभात् इदमतिदेशलक्षणं नारम्भणीयमिति प्राप्ते-

ब्रूमः। कथम्भावापेक्षिप्रकृतापूर्वभावनार्थत्वेन धर्मविधानात् अपूर्वप्रयुक्तत्वात् यथाप्रकरणं व्यस्थिता धर्माः । ततश्चातिदेशत एव विकृतिषु धर्माणां प्राप्तिरिति अतिदेशलक्षणमारम्भणीयमिति ।

अत्रेदमवधेयम् - धर्माणां प्रथमं करणत्वेन यागसम्बद्धयापूर्वभावनया सम्बन्धः, पश्चात्तु करणभूतेन यागेन सहाङ्गाङ्गिभावसम्बन्धो, न तु प्रथमं याग - भावनया सम्बन्धः पश्चात् तत्करणक्रियापूर्वभावनया यागभावनाद्वारेण सम्बन्ध इति ।असिद्धे सामान्ये विशेषनिरूपणासम्भवात् इदं सप्तमं सामान्यातिदेशलक्षणप्यारम्भणीयमिति सिद्धमिति बोध्यम् ।

अतिदेशो नाम अन्यधर्माणामन्यत्र प्रदेशः सम्बन्धः येन व्यापारेण स इति । स च अतिदेशः त्रिविधः प्रत्यक्षवचनात् नामधेयात् चोदनासा-मान्यानुमितवचनाच्चेति ॥

॥ श्रीः ॥

## ॥ अथ सप्तमस्य प्रथमः पादः ॥

(टि) उपदेशविचारे समाप्तेऽधुना तदधीनसिद्धिरति देशविचारः प्रस्तोष्यते । तदुपोद्घातत्वेनेदमारभ्यते । तत्र किं प्रयाजादिधर्माः सर्वयागार्था उत यथाप्रकरणं व्यवस्थिता इत्यधिकरणशरीरम् । यदीत्यादिस्त - दर्थविचारस्तस्मादित्यादिश्च फलविचार इति । अत्र भाष्यकारमतेनाह - दर्शपूर्णमासाभ्यामित्यादि यजतिनेत्यन्तम् ।

भाष्यकारस्यायमाशयः - दर्शपूर्णमासादिप्रयोग - विधिवाक्यं तावन्न यागोत्पत्तिपरं, आगनेयादिवाक्यैरेवोत्पन्नत्वात् । नापि फलविनियोगार्थं, "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ सर्वेभ्यः कामेभ्यो ज्योतिष्टोम" इति स्वर्गस्यापि सिद्धत्वात् । तस्मादनन्यार्थत्वात् फलवतो यागानुद्दिश्य धर्मा विधीयन्ते । यथा "ध्वर्युर्गृहपतिं दीक्षयित्वे" - त्यनेन अनन्यार्थत्वाद्दीक्षाक्रमो विधीयते तद्वत् । नचोद्देश्यत्वात् दर्शपूर्णमासादितृतीयान्तशब्दो वा स्वर्गकामशब्दो वा शक्नोति यागं विशेष्टुम् । तस्मात् स्वर्गकामपदं फलोपलक्षणार्थं, दर्शपूर्णमासशब्दस्तु प्रायेण पर्वकालत्वाद्यागानामनुवादः। ज्योतिष्टोमशब्दोऽपि कथञ्चिद्यागानुवादत्वेन व्याख्येयः। सप्तम्यर्थे च तृतीया व्याख्येया । अनुवादे लक्षणादोषाभावादिति।

वार्तिककारमतेनाह-प्रकरणानुमितेति । अयमत्राशयः यदि प्रयोगवाक्यं केवलं धर्मपरं स्यात् तदा नामधेयपदं फलपदं चाविवक्षितं स्यात् । तस्मात् सामान्यवचनेन सेत्स्यदपि स्वर्गफलत्वमनेन विशेषवचनेन प्रतिपाद्यते । सामान्यवचनं तु फलान्तरपरं न स्वर्गपरमिति ।

यज्यर्थतयेति । अपूर्वभावनया हि सम्बध्यमाने करणेतिकर्तव्यते

तुल्यकल्पे स्यातां, न त्वितिकर्तव्यतायाः करणाङ्गत्वं स्यात् । ततश्च कुतो धर्माणां सर्वार्थत्वमिति चेन्न । प्रकरणस्याविशेषकत्वात् सन्निधेश्च यजिश्रुतिजनिताविशेषप्रत्ययेन बाधितत्वादिति । सर्वयज्यर्था इति । पारिप्लवा धर्मा इत्यर्थः । कथम्भावापेक्षीति । अयमभिप्रायः - न यजिः स्वयमित्थम्भावापेक्षो, नापि यागभावना निर्ज्ञातप्रकारत्वात् । अपूर्वस्य त्वदृष्टत्वात् तद्भावना कीदृशीति जायते व्यापारविशेषापेक्षा तद्विशेषत्वेन समिधादिव्यापारविधानमित्याकाङ्क्षासन्निधियोग्यत्वैरवसीयते । तस्मात् प्रकृतभावनाविशेषणत्वात् समिधादीनां न पारिप्लवत्वमिति।

यत्तु तुल्यबलत्वं करणेतिकर्तव्यत्वयोः स्यादिति अत्रोच्यते । यथा फलं साध्यरूपकारकत्वेन भावनयान्वीयमानं फलत्वापरित्यागात् प्रधानमपि भवति तथा करणमपि करणत्वेन सम्बद्धं फलं प्रति गुण इतिकर्तव्यतां प्रति साधनं च भवति तदेव हि करणं यत्फलोद्देशप्रवृत्तेन कर्तृव्यापारेण फलसाधनतां प्रतिपद्यते । इतिकर्तव्यता तु येन व्यापारविशेषेण करणस्य फलसाधनरूपत्ववज्जन्यते स व्यापार उच्यते । अतः स्वभावादेव न तुल्यकल्पत्वापत्तिरिति ।

इदानीमाकाङ्क्षाक्रमेणैवान्वयः नतु तद्वैपरीत्येनेत्याह अत्रेदमित्यादिना । अयमभिप्रायः - सर्वत्र विधिवाक्येषु तावदाख्यातप्रत्ययेन प्रथमं भावयेदिति भावनावगम्यते ततः किमिति भाव्याकाङ्क्षा, ततः फलं भावयेदिति सम्बन्धः ततः केनेति करणाकाङ्क्षा, ततो यागेन फलं भावयेदिति करणसम्बन्धः, ततः कथमितीतिकर्तव्यताकाङ्क्षा, ततोऽपूर्वं कृत्वेत्यपूर्व-सम्बन्धः । ततः कथं यागेनापूर्वं कर्तव्यमिति इतिकर्तव्यताविशेषाकाङ्क्षा, ततः अग्न्यन्वाधानादिकयेतिकर्तव्यतयेतीतिकर्तव्यतात्मकधर्माणां सम्बन्धः । ततोऽरुणैकहायनीन्यायेन परस्परनियमः । करणं

फलापूर्वसाधनं, इतिकर्तव्यता तु करणानुग्रहिणी तदङ्गमिति । यदातिदेशलक्षणमारम्भणीयमिति सिद्धान्तादतिदेशसामान्यलक्षणस्याप्यारम्भणीयत्वं सिद्धमिति न तत्र पृथग्विचार इत्याशयेनाह असिद्ध इत्यादिना । अयमाशयः - किमतिदेशसामान्यलक्षणमिदं सप्तमं नारम्भणीयमुतारम्भणीयमिति संशयः, तत्र विशेषातिदेशलक्षणेन गतार्थत्वान्नारम्भणीयमिति प्राप्ते -

ब्रूमः। असिद्धे सामान्ये विशेषनिरूपणासम्भवादारम्भणीयमिदं सप्तमं सामान्यातिदेशलक्षणमिति । एवं न पृथग्विचारः कर्तव्यः सिद्धप्रायत्वादिति । तथा चोक्तम् -

"प्राकृतात्कर्मणो यत्स्यात्तत्समानेषु कर्मसु ।
धर्मप्रदेशो येन स्यात्तदतिदेश इति स्मृतः" ॥

इति । अयमत्रान्वयः - प्राकृतात्कर्मणो धर्मप्रदेशो येन स्यात् सोऽतिदेशः ॥ धर्मप्रदेश इत्यपेक्षायामाह - तत्समानेष्विति । यस्मात् प्राकृतादाग्नेयादेर्धर्माः प्रदर्श्यन्ते तत्समानेषु सौर्यादिषु कर्मस्विति ॥

॥ इषौ श्येनीयविशेषधर्मातिदेशाधिकरणम् ॥

सू. समाने पूर्ववत्वादुत्पन्नाधिकारः स्यात् ॥

(मू) अस्तीषुर्नामैकाहः अपरः श्येनः, द्वावप्याभिचारिकौ ज्योतिष्टोमविकारौ । तत्रेषौ "विष्टुतिः सप्ताहं भवती"ति प्राकृतानां स्तोत्राणां विकारं विधाय श्रूयते "समानमितरच्छ्येनेने"ति । तत्र संशयः - किमयमनुवादः उतातिदेशविधिरिति । तत्रेतरशब्दस्य सन्निहिताभिधायकत्वात् इषौ श्येने चातिदेशप्राप्तानां सन्निहितानां ज्योतिष्टोमधर्माणामनुवाद इति प्राप्ते -

ब्रूमः। वाक्यसामर्थ्यात् विष्टुत्यादितरत् चोदकप्राप्त - मितरशब्देनोद्दिश्य श्येनेन समानमिति श्येनवैशेषिकादीनां लोहितोष्णीषत्वादीनां श्येनादतिदेशाविधिरिति ॥

(टि) एवमुपोद्घातं प्रसाध्याधुना अतिदेशविचार आरभ्यते । तत्र स्थूलसूक्ष्मक्रमेण बुद्धयोऽवतरन्तीति प्रथमं तावत् सुगमत्वात् प्रत्यक्षवचननिमित्तोऽतिदेशः सप्रपञ्चः पादद्वयेन कथ्यते, ततो नामातिदेशस्तृतीये पादे । स हि वत्यर्थकल्पनया क्लेशगम्य इति ततोऽपि तु क्लेशसाध्य आनुमानिकनिमित्तो ऽतिदेशः पश्चात् प्रस्तोष्यते । तत्र हि सवतिकं वचनमेव कल्पयितव्यमिति । तच्च चतुर्थपाद आद्ये द्वितीये वा विध्यन्ताधिकरणे सामान्येन साधयित्वा तत्प्रसङ्गान्नामधेयानुमानिक - वचनयोर्बलाबलचिन्तया अध्यायसमाप्तिरिति । इषौ श्येने च ज्योतिष्टोमधर्माणां प्राप्तिरस्तीति दर्शयितुमाह ज्योतिष्टोमविकाराविति । श्येनवैशेषिकाणामसन्निहितत्वं दर्शयितुमाह-इषौ विष्टुतिरित्यादि । इषाविति । सन्निहितत्वलाभार्थमिदम् । श्येन इति इषोः श्येन-सादृश्यलाभार्थम् । ततश्च इषावित्येतदितरशब्दार्थवत्वाय, श्येन इत्येतत् समानशब्दार्थवच्वायेत्युभयोपादानमिति । अतिदेशेत्यादिविशेषणपदद्वयं हेतुगर्भविशेषणम् । चोदकप्राप्तत्वेन सन्निहितत्वादित्यर्थः। अनुवाद इति । इषोः स्तुत्यर्थमिति शेषः । तदयं श्रुतेरर्थः - श्येनेन हीदं समानं, उभयोरपि ज्योतिष्टोमविकारत्वात् । अतस्तद्वदेवादरेणाभिचरता कर्तव्यमिति च स्तुतिरिति । वाक्यसामर्थ्यादिति । इषुविधायकवाक्याद् भिन्नं हीदं वाक्यं, एकवाक्यतया च स्तुत्यर्थत्वं स्यात् अतोऽनुवादमात्रं व्यर्थमित्यभिप्रायः ।

अत्र भाष्यकारेणेतरशब्दस्य पूर्वोक्तसादृश्यं सन्निहितत्वं च प्रवृत्तिनिमित्तमित्याश्रित्य इह तदुभयं न सम्भवति सान्निहितं ज्यौतिष्टौमिकं,

तन्न पूर्वोक्तसदृशं, अप्राकृतानां सप्ताभावानां पूर्वमुक्तत्वात् । यत्तु पूर्वोक्तसश्शं लोहितोष्णीषादिद्वयेनवैशेषिकं तन्न सन्निहितं, अतोऽवश्यम्भाविन्यन्यतरपरित्यागेन गौणत्वेऽनुवादमात्रमनर्थकमित्यर्थवत्वाय श्येनवैशेषिकाणां ज्योतिष्टौमिकादधिकानां विधिरिति सिद्धान्तितम्। अत्र पक्षे इतरपदस्य श्येनवैशेषिकार्थत्वात्तेषां चेषावप्राप्तत्वान्नोद्देश [श्य] समर्पकत्वं किन्तु विधेयसमर्पकत्वम् । तदेषा वचनव्यक्तिः "श्येनेन यत् समानमित्युद्देशः इतरदिति विधिः, ततश्च यादृगत्र क्रियमाणं श्येनेन समानं भवति तादृगधिकं लोहितोष्णीषादिकं कण्टकवितोदनादिकं चात्र कर्तव्यं श्येने यदधिकं तदिहापि कर्तव्यमित्यर्थः ।

आचार्यैस्तु इतरशब्दो न पूर्वोक्तसदृशे लोके प्रसिद्धः, किन्तु उपयुक्तपरिशिष्टसन्निहिते । लोकप्रसिद्धिर्हि शब्दार्थगतौ प्रमाणम् । किञ्चेतरशब्दस्योपयुक्तावशिष्टवाचित्वे चोदकप्राप्तेषु मध्ये सप्ताभवादिविशेषविधानायोपयुक्तेभ्यो विष्टुत्यादिभ्योऽवशिष्टं चोदकप्राप्तं ज्यौतिष्टौमिकमितरशब्देन परामृश्यत इतीतरशब्दस्य मुख्यार्थो लभ्यत इत्यतोऽप्युपयुक्तावशिष्ट एवेतरशब्दस्यार्थः । तदयं श्रुत्यर्थः, यत् पूर्ववाक्योपयुक्ताद्विष्टुत्यादेरितरत् ज्योतिष्टोमादिषु प्राप्तं तत् श्येनेन समानं कर्तव्यं, यथा श्येने तत् कृतं तथेहापि कर्तव्यमिति । ततश्च कण्टकवितोदनादीनां नेषां प्राप्तिः ज्योतिष्टोमे सत्वात् अनेन विधानाभावाच्च । अनेन हि ज्योतिष्टौमिकानां श्येने ये विकारा विहिता लोहितोष्णीषादयस्त एव तानुद्दिश्य विधीयन्त इति । तदेतदाचार्यमतं युक्ततरमित्याशयेन तदनुरोधेनाह विष्टुत्यादित इत्यादिना । तदत्र भाष्यवार्तिकयोरुद्देश्यविधेयवैपरीत्यं यच्छ्येनेन समानं तदितरदिति भाष्यकारमते । यदितरत् तच्छ्येनेन समानमिति वार्तिककारमते च वचनव्यक्तिरिति ॥

## ॥ पञ्चहविष्षु सार्थवादविध्यतिदेशाधिकरणम् ॥

### सू. पञ्चसञ्चरेष्वर्थवादादतिदेशः संनिधानात् ॥

(मू) चातुर्मास्येषु चत्वारि पर्वाणि वैश्वदेवं वरुणप्रघासः साकमेधश्शुनासीरीयमिति । तत्र वैश्वदेवेऽष्टौ हवींषि विहितानि "आग्नेयमष्टाकपालं निर्वपति, सौम्यं चरुं, सावित्रं द्वादशकपालं, सारस्वतं चरुं, पौष्णं चरुं, मारुतं सप्तकपालं, वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपाल"मिति। तेषां हविषामर्थवादब्राह्मणं श्रूयते "वार्त्रघ्नीनि हवा एतानि हवींषी"ति, तथाङ्गविधायकब्राह्मणं "त्रेधा सन्नद्धं बर्हिर्भवति त्रेधा सन्नद्ध इध्मः नव प्रयाजा इज्यन्ते नवानूयाजा" इति । वैश्वदेवरुणप्रघासेषु पूर्वोक्तान्येवाग्नेयादीनि विधाय श्रूयते - "एतद्ब्राह्मणान्येव पञ्च हवींषि यद्ब्राह्मणानीतराणीत्यतिदेशः । तत्र संशयः - किं वार्त्रघ्नीनीत्यर्थवादमन्त्रस्यायमतिदेशः उत सार्थवादस्य साङ्गविधिकस्य कृत्स्नस्य ब्राह्मणकाण्डस्यातिदेश इति ।

तत्रार्थवादस्य हविर्विधिविधिनैकवाक्यत्वेन सम्बद्धत्वादर्थवादब्राह्मणमात्रस्य अतिदेश इति प्राप्ते -

ब्रूमः। ब्राह्मणशब्दवाच्यत्वाविशेषात् कृत्स्नस्य ब्राह्मणकाण्डस्यातिदेश इति॥

(टि) हविर्विधीति । अतिदेशवाक्ये हवींषीति हविस्सम्बन्धश्रवणात् अङ्गविधीनां चाङ्गमात्रविधायकत्वेन हविस्सम्बन्धाभावाच्च नाङ्गविधीनामतिदेश इत्यभिप्रायः । अङ्गवाक्यैकवाक्यतामापन्नं प्रधानवाक्यं हि हविषां समग्राणां विधायकमिति विधायकत्वेनैवास्त्यङ्गविधीनां हविस्सम्बन्ध इति न विशेष इत्याशयेनाह-ब्राह्मणशब्देति । अविशेष दिति । यस्त्वया विशेषोऽभिहितः स नास्तीत्यभिप्रायः ॥

## ॥ एककपालैन्द्र(टि)ाग्नयोः सार्थवादविध्यतिदेशाधिकरणम् ॥

## सू. एककपालैन्द्राग्नौ च तद्वत् ॥

(मू) वैश्वदेऽव्ये "द्यावापृथिव्य एककपाल" इत्येककपाल आम्नातः वरुणप्रघासेष्वपि कार्य एककपाल इति । तत्रापरे ऐन्द्राग्नः ऐन्द्राग्नो द्वादशकपालो मारुत्यामिक्षेति । साकमेधेषु पुनः एककपालैन्द्राग्नावाम्नातौ ऐन्द्राग्न एकादशकपालः इन्द्राय वृत्रघ्ने चरुः वैश्वकर्मण एककपाल इति । ततः श्रूयते "एतद्ब्राह्मणः ऐन्द्राग्नः एतद्ब्राह्मण एककपालः यद्ब्राह्मणावितरश्चेतरश्चेति ।

तत्र संशयः- किमर्थवादब्राह्मणमात्रस्यातिदेशः उत कृत्स्नस्य ब्राह्मणकाण्डस्येति । तत्र हविर्विधानैकवाक्यत्वेन सम्बद्धत्वात् ब्राह्मणमात्रस्येति प्राप्ते -

ब्रूमः। ब्राह्मणशब्दवाच्यत्वाविशेषात् कृत्स्नस्य ब्राह्मणकाण्डस्यातिदेशः । उत्तरचिन्तार्थं प्राप्त्यधिकरणमिदम् ॥

(टि) पौनरुक्तचमाशङ्क्याह - उत्तरचिन्तार्थमिति । अत्रापि ब्राह्मणकाण्डातिदेश इति सिद्धमेवेत्येतावदधिकरणतात्पर्यम् । अतो न पौनरुक्त्यदोष इत्याशयः ॥

## ॥ साकमेधे वारुणप्रघासिकैककपालातिदेशाधिकरणम् ॥

सू. एककपालानां वैश्वदेविकः प्रकृतिराग्रयणे सर्वहोमापरिवृत्तिदर्शनादवभृथे च सकृद्व्य वदानस्य वचनात् ॥

(मू) साकमेधे श्रूयते - "एतद्ब्राह्मण एककपाल" इति ।

तत्र संशयः - किंवैश्वदेविकस्य ब्राह्मणस्य अतिदेश उत वारुणप्रघासिकस्येति । तत्र वैश्वदेविकस्य बहु-धर्मकत्वात् तस्यैवातिदेश इति प्राप्ते -

ब्रूमः। अव्यवहितत्वात् वारुणप्रघासिकैककपालब्राह्मणस्यातिदेश इति ॥

॥ इति सप्तमाध्यायस्य प्रथमः पादः ॥

(टि) बहुधर्मकत्वादिति । स चैककपालानां प्रकृतिरिति बहुधर्मकत्वमिति । अव्यवहितत्वादिति । तृतीयपादे दशमाधिकरणे वक्ष्यमाणन्यायादेव वैश्वदेविक - धर्मप्राप्तिसिद्धेर्वचनानर्थक्याच्चेति द्रष्टव्यम् ॥

॥ इति केरलीये षोडशाध्यायोटिप्पणे

सप्तमस्याध्यायस्य प्रथमः पादः ॥

✣ ✣ ✣

॥ श्रीः ॥

## ॥ अथ सप्तमाध्यायस्य द्वितीयः पादः ॥

### ॥ रथन्तरादिशब्दानां गानविशेषार्थताधिकरणम् ॥

### सू. साम्नोऽभिधानशब्देन प्रवृत्तिः स्याद्यथाशिष्टम् ॥

(मू) इदं श्रूयते - "रथन्तरमुत्तर योर्गायति बृहदुत्तरयोर्गायति कवतीषु रथन्तरं गायती"त्यादि । "कयान" इति तिस्र ऋचः कवत्यः । तासु रथन्तरं सामाति-दिश्यते "कवतीषु रथन्तरमि"ति । तत्र संशयः - किं बृहद्रथन्तरादिशब्दानां गीतिविशिष्टत्वामिडामभित्वा शूरेत्याद्यृग्वाचकत्वात् गीतिविशिष्टर्चामतिदेश उत गीतिवाचकत्वात् गीत्यतिदेश इति ।

तत्र सस्तोभस्वरकालाभ्यासविकारायां हिङ्कारप्रणवप्रस्तावोद्गीथ-प्रतिहारोपद्रवनिधनाख्यसप्तभक्तिवत्यामृचि अभियुक्तप्रयोगदर्शनात् बृहद्र - थन्तरादिशब्दानां गीतिविशिष्टर्ग्वाचकत्वात् गीतिविशिष्टर्चामतिदेश इति प्राप्ते -

ब्रूमः। गीतिविशिष्टर्ग्वाचकत्वे आकृतिवचनत्वन्यायात् गीतिवाचकत्वात् गीत्यतिदेश इति । बृहद्रथन्तरादिशब्दानां गीतिवाचकत्वं दृढीकर्तुमिदम-धिकरणम् ॥

॥ इति सप्तमाध्यायस्य द्वितीयः पादः ॥

✣ ✣ ✣

॥ श्रीः ॥

## ॥ अथ सप्तमस्य द्वितीयः पादः ॥

(टि) अत्र रथन्तरादिशब्दाः किं गीतिविशिष्टर्ग्वाचका उत गीतिमात्रवाचका इति विचारः । स चातिदेशसिद्ध्यर्थ इति बोध्यम् । द्वैतीयीकेन पौनरुक्त्यमाशङ्क्याह-दृढीकरणार्थमिति । अयमाशयः यद्द्वितीये गीतिषु सामाख्येति लक्षणकथनादर्थात् गीतिवचनत्वमवगतं तदेवेदानीं न्यायेनाक्षेपपूर्वकं दृढीक्रियते वाचनिकातिदेशसिद्ध्यर्थतया इदानीं प्रयोजसम्भवात् द्वितीये तूभयथापि त्रैविध्यमुपपन्नमिति प्रयोजनाभावान्न न्यायतो निर्णीतमिति ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे

सप्तमस्याध्यायस्य द्वितीयः पादः ॥

✤ ✤ ✤

॥ श्रीः ॥

## ॥ अथ सप्तमाध्यायस्य तृतीयः पादः ॥

### ॥ अग्निहोत्रादिनाम्ना धर्मातिदेशाधिकरणम् ॥

### (मू) सू. उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात्

कुण्डपायिनामयने श्रूयते "मासमग्निहोत्रं जुहोति" (इति) । तन्नैयमिकाग्निहोत्रात् कर्मान्तरमित्युक्तम् ।

तत्र संशयः- किमिदमग्निहोत्रपदं नित्याग्निहोत्र - मासाग्निहोत्रयोः उभयोर्मुख्ये नामधेय इति न धर्मातिदेशिकं उत मासाग्निहोत्रे मासानामर्था - सम्भवात् सामानाधिकरण्यसत्वात् गौणत्वान्नैयमिकाग्निहोत्र-धर्मातिदेशिकमिति । तत्र नामधेयत्वनिमित्तभूत सामानाधिकरण्यस्योभयत्रा - विशेषात् उभयोर्नामधेयमिति न धर्मातिदेशकमिति प्राप्ते -

ब्रूमः। अग्निहोत्रपदस्य मासाग्निहोत्रेऽपि मुख्यनामत्वसम्भवात् सामानाधिकरण्यसत्वाच्चाग्निर्माणवक इतिवत् गौणत्वाद्धर्मातिदेशकमेवाग्नि - होत्रपदमिति धर्मातिदेश एव धर्मप्रदेश इत्युच्यते । अत्रेदमवधेयम् - अर्थान्तराभिधायिशब्दसामानाधिकरण्यबलात् विनापि वतिं वत्यर्थलाभात् वत्यध्याहारेण मासमग्निहोत्रवज्जुहोतिति नामधेयातिदेशो भविष्यतीति ॥

॥ श्रीः ॥

## ॥ अथ सप्तमस्य तृतीयः पादः ॥

(टि) गतो वाचनिकातिदेशविचारः । इदानीं नामातिदेशः प्रस्तूयते ।

मुख्यनामधेयत्व इति । सामानाधिकरण्यात् कल्प्यमान इति शेषः । द्रव्यदेवतालाभादिति । तथा सत्यग्नये हौत्रमित्यस्मिन्नित्येवं प्रवृत्तिनिमित्तासम्भवान्न मुख्यत्वमिति भावः। अनेन वैषम्यमपि दर्शितमिति न वैपरीत्यमापादनीयमिति कथं नाम्नातिदेशसिद्धिरित्यत्राह अत्रेदमित्यादिना ॥

## ॥ प्रायणीयनाम्ना धर्मानतिदेशाधिकरणम् ॥

## सू. अपि वा सत्रकर्मणि गुणार्थैषा श्रुतिः स्यात् ॥

(मू) गवामयने श्रूयते "वैश्वानरो ज्योतिष्टोमः प्रायणीयमेतदहर्भवती"ति । तत्र संशयः- किमयं द्वादशाहे प्रथमस्याह्नो नामधेयभूतः प्रायणीयशब्दो धर्मातिदेशक उत गावामयनिके प्रथमेऽह्न्यपि मुख्यनामत्वस्य सम्भवेन गौणत्वाभावा .......

तत्र पूर्वन्यायात् धर्मातिदेशक इति प्राप्ते -

ब्रूमः। प्रायणीयशब्दप्रवृत्तिनिमित्तस्य प्राथम्यस्य गवामयनिके प्रथमेऽह्न्यपि सत्वात् तत्रापि मुख्यनामत्वस्य सम्भवेन गौणत्वाभावान्न धर्मातिदेशकः प्रायणीयशब्द इति यत्र पञ्चमः षष्ठो प्रायणीयशब्देनोक्तः तत्र प्रायणीयशब्दो धर्मातिदेशक एवेति बोध्यम् ॥

(टि) पूर्वाधिकरणापवाद आरभ्यते - प्राथम्यस्येति प्रयन्ति प्रारभन्तेऽनेनेति प्रायणीयमिति योगस्येत्यर्थः। यत्र पञ्चम इति तत्र योगस्य प्रवृत्तिनिमित्तस्याभावान्न पूर्वाधिकरणापवादत्वं तादृशस्य प्रायणीयशब्द-स्येत्यर्थः ॥

## ॥ सर्वपृष्ठशब्देन षट्पृष्ठानामतिदेशाधिकरणम् ॥

सू. विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वात् ज्यौतिष्टोमिकानि पृष्ठानि, अस्ति च पृष्ठशब्दः ॥

(मू) "विश्वजित् सर्वपृष्ठ" इति श्रूयते । तत्र संशयः किमयं सर्वशब्दोऽनुवाद उत बृहद्रथन्तरयोश्चोदकेन विकल्पप्राप्तयोः समुच्चयविधिरथवा रथन्तरबृहद्वैरूप्यवैराजशाक्वररैवतानां षाडहिकानां पृष्ठानामतिदेशविधिरिति । तत्र माहेन्द्रादिचतुर्षु स्तोत्रेषु "सप्तदशानि पृष्ठानी"ति पृष्ठशब्दप्रयोगदर्शनात् तेषां चोदकप्राप्तानामनुवादोऽयं सर्वपृष्ठशब्द इति चेत् । उच्यते । पृष्ठशब्दस्य माहेन्द्रस्तोत्रमात्रवाचित्वात् समुच्चयविधिरिति ।

अत्र ब्रूमः। सर्वशब्दस्य बह्वपेक्षत्वात् षाडहिकानामतिदेशविधिरिति । अयं तु वाचनिकातिदेशः कर्मसमानाधिकरणपदनिमित्त इति बोध्यम् ॥

(टि) इदानीं कर्मसमानाधिकरणैकपदनिमित्तत्वान्नमधेयाधिकारे वाचनिकातिदेशश्चिन्त्यते । माहेन्द्रस्तोत्रमात्रवाचित्वादिति । अयमाशयः- उत्पत्तौ हि सामानाधिकरण्यान्नामधेयं विज्ञायते । तच्च "रथन्तरं पृष्ठं भवति बृहत् पृष्ठं भवती"ति बृहद्रथन्तरसाधनकमाहेन्द्रस्तोत्रमात्रस्यैव । छत्रिन्यायेन तु चतुर्षु प्रयोग इति बह्वपेक्षत्वादिति । अत एवात्र पृष्ठशब्दः पृष्ठसाधनभूतरथन्तरादिसामाभिधायी न तु स्तोत्राभिधायीति वेदितव्यम् । पादसङ्गतिं तावद्दर्शयति-अयं त्विति ।

## ॥ अवभृथनाम्ना सौमिकधर्मातिदेशाधिकरणम् ॥

सू. तथावभृथः सोमात् ॥

(मू) वरुणप्रघासेषु श्रूयते "वारुण्यैर्निष्कासेन तुषैश्च अवभृथं यन्ती"ति । निष्कासो लेपः। तत्र संशयः- किमयमवभृथशब्दः तुषनिष्कासगुणवि -

धानार्थोऽनुवादः उतात्र प्रकरणान्तरन्यायेन यन्तीत्यनेन कर्मान्तरं विधीयते । तत्र सौमिकावभृथाद्धर्मातिदेशकोऽवभृथशब्द इति । तत्र "प्राच्यां दिशि देवा" इत्यादिमन्त्रैः विहिते अपां व्युत्सेके "एष वै दर्शपूर्णमासयोरवभृथ" इत्यवभृथशब्दप्रयोगदर्शनात् तस्य चोदकप्राप्तस्य गुणविधानार्थोऽनुवाद इति प्राप्ते -

ब्रूमः। अवभृथशब्दस्य सौमिकावभृथनामधेयत्वात् अवभृथशब्दो यन्तीत्यनेन विहिते कर्मणि धर्मातिदेशक इति ।

अत्रानुवादस्य वैयर्थ्याभावात् पक्षद्वयेऽपि गौणत्वस्य तुल्यत्वात् अनुवादे च गौणत्वस्यादोषत्वादनुवाद इति शङ्का न गौण्याभिहितस्या न्यत्रानुवादः । नहि सिंहशब्दो गौण्या माणवकमभिहितवान् इत्यन्यत्र तमनुवदतीत्युत्तरमिति ॥

(टि) उत्तरमिति । न चात्रापां व्युत्सेकपरत्वेऽवभृथशब्दस्य प्रमाणमस्तीति भवतो गौणत्वं निष्प्रमाणकम् । मम तु प्रमाणवत् । यन्तीत्यनेन प्रकरणान्तरन्यायेन विहिते कर्मान्तरे प्रयुक्तत्वादित्यतो विधर्मातिदेशक इति ॥

## ॥ वारुणप्रघासिकावभृथस्य तुष - निष्कासद्रव्यकत्वाधिकरणम् ॥

## सू. द्रव्यादेशे तद्रव्यः श्रुतिसंयोगात् पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् ॥

(मू) वरुणप्रघासेषु श्रूयते - वारुण्यैर्निष्कासेन तुषैश्चावभृथं यन्ती"ति । तत्र कर्मान्तरं विधीयत इति स्थितम् । तत्र संशयः- किमिदं कर्मातिदेशात् पुरोडाशद्रव्यकं उत श्रुत्या तुषनिष्कासद्रव्यकमिति ।

तत्र विशिष्टविधिगौरवादतिदेशात् पुरोडाशद्रव्यकमेतत् कर्मेति प्राप्ते-

ब्रूमः। पुरोडाशद्रव्यकत्वे तु तुषनिष्कासग्रहणानर्थक्यप्रसङ्गात् श्रुत्यातिदेशिकं बाधित्वा तुषनिष्कासद्रव्यकमेवेदं कर्मेति ॥

(टि) प्रासङ्गिकमिदमधिकरणम् । विशिष्टविधीति । तुषनिष्कासशब्दस्तु यथा कथञ्चिन्नेय इति भावः । श्रुत्येति । नामातिदेशेन प्राप्ति स्त्वानुमानिकी । किञ्च नाम्ना नु सर्वावभृथधर्मसामान्येन पुरोडाशविधिः, श्रुत्या तु विशेषेणेत्यतोऽपि पुरोडाशबाध इति ॥

## ॥ वैष्णवशब्दादातिथ्ये धर्मानतिदेशाधिकरणम् ॥

## सू. गुणविधिस्तु न गृह्णीयात् समत्वात् ॥

(मू) आतिथ्येष्टौ श्रूयते - "वैष्णवो नवकपालो भवती"ति । तत्र चाश्ववालादयो धर्मा विहिताः । राजसूये च- "वैष्णवस्त्रिकपाल" इति श्रूयते । तत्र संशयः- किमयं वैष्णव-शब्दो ऽश्ववालाद्यातिथ्यधर्मातिदेशकः उत गौणत्वाभावान्नातिदेशक इति ।

तत्राग्निहोत्रन्यायादातिदेशक इति प्राप्ते -

ब्रूमः। वैष्णवशब्दस्य देवताविधायकत्वात् गौणत्वाभावान्नातिदेशको वैष्णवशब्द इति ॥

(टि) प्रायणीयादियौगिकं नामधेयं न धर्मातिदेशकमित्युक्तम् । इदानीं तु गुणविधीनामनतिदेशकत्वमुच्यते । न्यायस्तु स एव मुख्यार्थसम्भवे गौणतयातिदेशकत्वं न युक्तमिति । एतावत्येवात्र विशेषाशङ्का - प्रायणीये च योगवशेनानुवादत्वसम्भवान्न विधानार्थत्वं कल्प्यमिति युक्तं, इह तु

विधायकत्वावश्यम्भावात् बह्वर्थसमर्पकतया प्रयोजनभूयस्त्वाच्चातिदेशकत्वमेव युक्तमिति । तां निवर्तयितुमिदमारभ्यते - गौणत्वाभावादिति । नहि प्रयोजनभूयस्त्वलाभात् गौणत्वं सम्भवति, किन्तु मुख्यार्थानुपपत्तावेव, गौणत्वं विना च न वत्यर्थकल्पना सम्भवतीति कुतो ऽतिदेशकत्वसिद्धिरित्यभिप्रायः ॥

## ॥ निर्मन्थ्यादिशब्दैः धर्मानतिदेशाधिकरणम् ॥

## सू. निर्मन्थ्यादिषु चैवम् ॥

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ धर्मवान्निर्मन्थ्योऽग्निराम्नातः, तथा दर्शपूर्णमासयोश्च बर्हिराज्ये धर्मवति आम्नाते । अग्नौ च पुनः श्रूयते "निर्मन्थ्येनेष्टकाः पचन्ती"ति, पशौ च "बर्हिषा यूपवटमास्तृणाति आज्येन यूपमनक्तीति । तत्र संशयः - तत्र किं निर्मन्थ्यबर्हिराज्यशब्दा आतिदेशका उत श्रुत्यर्थविधिसम्भवेन गौणत्वाभावान्नातिदेशका इति । तत्रानतिदेशकत्वे इतिकर्तव्यत्वालाभात् आतिदेशका इति प्राप्ते -

ब्रूमः। लोकतो मथनादिप्रकारलाभात् श्रुत्यर्थविधिसम्भवेन गौणत्वासम्भवान्नातिदेशिका इति । श्रौतेतिकर्तव्यताया अलाभादातिदेशिकत्वशङ्का । तन्निरासार्थमिदमधिकरणम् ॥

(टि) पौनरुक्त्यमाशङ्क्याह-श्रौतेत्यादिना ॥

## ॥ प्रणयनशब्देन सौमिकधर्मानतिदेशाधिकरणम् ॥

## सू. प्रणयनं तु सौमिकमवाच्यं हीतरत् ॥

(मू.) अस्ति सौमिकं धर्मवदग्निप्रणयनं, दार्शपौर्ण - मासिकं चाधर्मकं, सन्ति च चातुर्मास्येषु चत्वारि पर्वाणि । तत्र श्रूयते - "द्वयोः प्रणयन्ति तस्मात् द्वाभ्यां यन्नी"ति।

तत्र संशयः- किं सौमिकमिदं प्रणयनं उत दार्शपौर्णमासिकमिति । तत्र दार्शपौर्णमासिकस्य चोदकप्राप्तस्य प्रणयनस्य प्रणयतिवाच्यत्वे वच - नानर्थक्यात् सौमिकं प्रणयनमिति प्राप्ते -

ब्रूमः। प्रणयतिशब्दस्य सौमिकनामधेयत्वाभावात् दार्शपौर्णमासिकमेव प्रणयनं चोदकप्राप्तं तन्न प्रणयतीत्यनुवादः, स चार्थवादार्थ इति ॥

(टि) सौमिकदार्शपौर्णमासिकयोर्विशेषप्रदर्शनायाह - अस्तीत्यादिना । तत्र भाष्यकारमतेनाधिकरणद्वयं रचयति - तत्र संशय इत्यादिना । स चार्थवादार्थ इति । अर्थवादस्य प्रयोजनं तूत्तरवेद्यामग्निविधानोपसंहार इत्युत्तराधिकरणे वक्ष्यतीति भावः ।

## ॥ मध्यमयोर्द्वयोरेव प्रणयनाधिकरणम् ॥

## सू. प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधात् ॥

(मू) "द्वयोः प्रणयन्ती"ति श्रूयते । स चानुवाद इति स्थितम् । तत्र संशयः- कतरयोर्द्वयोरिदं प्रणयनं किमनियम उत प्रथमोत्तमयोः अथवा मध्यमयोरिति । तत्र विशेषाभावादनियम इति चेत् , उच्यते। वैश्वदेव उत्तर समर्थ इति उपवपन्ति न शुनासीरीय इति प्रणयनाङ्गोत्तरवेदिप्रतिषेधस्य प्रथमोत्तमयोर्दर्शनात्तयोरेव प्रणयनमितीति प्राप्ते -

ब्रूमः। "द्वयोः प्रणयन्ती"ति दार्शपौर्णमासिकानुवादस्य "तस्माद् द्वाभ्यां यन्ती"ति गत्यर्थवादवाक्यशेषात् गतिसाधनभूतोरुत्वेन संस्कृतयोर्मध्यमयोरिदं प्रणयनमिति । तस्य प्राकृतस्यार्थवादार्थत्वमुखेन मध्यमयोरुत्तरवेद्यां विधानोपसंहारार्थं प्रणयन्तीत्यनुवाद इति ।

एवं वेदमधिकरणम् - "द्वयोः प्रणयन्ती"ति श्रूयते । तत्र संशयः-

किमिदं प्रणयनं प्राकृतं उत सौमिकमथवापूर्वमिति । तत्र प्रणयनमात्रश्रवणात् प्राकृतं, तच्च चोदकप्राप्तमनुवदतीति चेत्, उच्यते प्रथमोत्तमयोरुत्तरवेदिप्रतिषेधात्तयोः सौमिकं विधीयत इति प्राप्ते -

ब्रूमः। गत्यर्थवादवशात् मध्यमयोरपूर्वं आहवनीयाद्द्वितीयं प्रणयनं गार्हपत्यप्रणयनस्य प्राकृतस्य उत्तरकालं विधीयत इति ॥

(टि) प्रणयनाङ्गेति । अयमाशयः - प्रणयनाङ्गं ह्युत्तरवेदिः प्रणयने सत्येव प्राप्नोति, प्राप्तौ च सत्यां प्रतिषेधो घटते, नान्यथा । तस्मादुत्तरवेदिप्रतिषेधात् प्रथमोत्तमयोरेवेदं प्रणयनमिति गतिसाधनभूतोरुत्वेनेति । "ऊरू वा एतौ यज्ञस्य वरुणप्रघासः साकमेधश्चे"ति संस्तुतयोरित्यर्थः। अग्निविधानोपसंहारार्थ इति । "उत्तरवेद्यामग्निं निदधाती"ति विहितं तत्प्रकरणाविशेषात् चतुर्ष्वपि पर्वसु स्यात्, तन्माभूदित्येवमर्थ इत्यर्थः । "उपात्र वपन्ती"ति वचनान्तरेणविशेषविहितोत्तरवेदेः प्रतिषेधार्थं "न वैश्वदेव" इत्यादि वचनमिति भावः ।

एवं भाष्यकारमतं प्रदर्श्याधुना वार्तिककारमतं दर्शयति एकं वेत्यादिना । अयमत्राचार्याशयः "न वैश्वदेव" इति प्रतिषेधेन पर्युदासेन वा मध्यमयोरेवोत्तरवेदिरुत्पन्नेति तावत् सिद्धम् ।

उत्पत्त्यपेक्षश्च इत्युत्तरवेद्यामग्निं निदधाती"ति विधिरपि मध्यमयोरेव स्यात् । ततश्च "द्वयोः प्रणयन्तीत्येतद्व्यर्थमेव स्यात् । तस्मादिदमेकमधिकरणं वर्णयितव्यमि"ति ।

गत्यर्थवादवशादिति । नच प्रणयन्तीत्येतत् सौमिकस्य नामधेयं, प्राकृतस्यानुवादे च वचनं व्यर्थम् । अतो गत्यर्थवादवशात् मध्यमयोरपूर्वं प्रणयनं विधीयत इति भावः ।

किञ्च शाखान्तरे चाग्निप्रणयनोत्तरकालं "आह - वनीयाद् द्वावग्निं प्रणयत" इति श्रूयते । तदेकवाक्येनैव "द्वयोः प्रणयन्ती"त्यस्य न्याय्येत्यभिप्रेत्याह - आहवनीयादित्यादि । शाखान्तरीयवचने द्वावित्यस्याध्वर्युप्रतिप्रस्थातारावित्यर्थः ॥

॥ स्वरसामादिशब्देन धर्मातिदेशाधिकरणम् ॥

सू. स्वरसामैककपालामिक्षं च लिङ्गदर्शनात् ॥

(मू) गवामयने श्रूयते - "अभितो दिवाकीर्त्यं परस्सामानो भवन्ती"ति । अस्यार्थः- गवामयननामकं संवत्सरसत्रम् । तत्र द्वयोर्मासषट्कयोर्मध्ये अस्ति प्रधानभूतं विषुवन्नामकमेकमहः। तस्य ... थँ पुरस्तात् पश्चाच्च त्रयः स्वरसाम - नामकाः अहर्विशेषा इति तेषु स्वरसामसङ्गहसान्तत्यस्य सप्तदशस्तोमादयो धर्माः "सप्तदशा भवन्ति सन्ततयो ग्रहा गृह्यन्त" इत्येवमादयः श्रूयन्ते । तथा वैश्वदेवे श्रूयते - "द्यावापृथिव्य एक - कपाल" इति । तत्राहर्विशेषधर्माः "सर्वहुतं जुहोतीति, अपर्यावृत्तं जुहोती"त्येवमादयः सर्वहोमादय आम्नाताः । वैश्वदेव एवं श्रूयते - "वैश्वदेव्यामिक्षे"ति । तत्र "वाजिभ्यो वाजिन"मित्येवमादयो विशेषधर्मा आम्नाताः । एवं स्थिते ह्यन्यत्र श्रूयते - "पृष्ठ्यः षडहो द्वौ स्वरसामानावि"ति । तथा "वारुण्यामिक्षा, वारुण एककपाल" इति ।

तत्र संशयः - किमेते स्वरसामैककपालामिक्षाशब्दाः गावामायनिकवैश्वदेविकानां सप्तदशस्तोमत्वसर्वहोमामिक्षवाजिनेज्यादिधर्माणां ग्राहका उत नेति ।

तत्र गुणविधित्वाद्वैष्णवशब्दवन्न ग्राहका इति प्राप्ते -

ब्रूमः। चोदनासामान्यलिङ्गनिमित्तातिदेश - प्राप्तत्वात् गावामयनि-

कादिधर्माणां ग्राहका इति । अत्र नाम्नातिदेश इति न शङ्क्यमिति । इदं त्ववधेयम् अग्निहोत्रादिकर्मनाम्नां यूपादिसंस्कारनिमित्तनाम्नां च धर्मातिदेशकत्वं यौगिकानां प्रायणियादिशब्दानां गुणविधीनां वैष्णवादिशब्दानां च लिङ्गशून्यत्वे सति नास्त्यति - देशकत्वमिति स्थितमिति ॥

(टि) एवं गुणविधिषु नामातिदेशोऽपोदितः। तदपवाद - प्रसङ्गादिदमारभ्यते । दशाधिकरण्यां सिद्धमर्थं सुखग्रहणायाह - इदं त्वित्यादिना ॥

## ॥ "वासो ददाति" इत्यादौ वास आदिशब्दानां आकृतिनिमित्तताधिकरणम् ॥

## सू. कर्मजे कर्म यूपवत् ॥

(मू) "वासो ददाति, अनो ददाती"ति श्रूयते कस्मिंश्चित् कर्मविशेषे । तत्र संशयः - किंवासोऽनश्शाब्दयोः वानतक्षणसंस्कारक्रियानिमित्तत्वाद्वासो ऽनश्शाब्दौ वानतक्षाणयोर्यद्यतिदेशकौ तदा वानं तक्षणं चकृत्वा वासो ऽनश्च दातव्यं अथवा तयोर्जातिनिमित्तत्वात् तौ तयोर्नातिदेशकौ तथा यथासिद्धमेव दातव्यं नवानं तक्षणं च कर्तव्यमिति। तत्र वानतक्षणक्रियानिवृत्तेः प्राक् वासोऽनश्शब्द ... सूत्रे दारुणा ऋचा प्रयोगस्य न तक्षणक्रियानिवृत्त्यनन्तरं प्रयोगस्य च दर्शनात् वासो ऽनश्शब्दयोः यूपवत् संस्कारनिमित्तत्वात् तौ शब्दौ तयोरतिदेशकौ वानं तक्षणं च कृत्वा दातव्यमिति प्राप्ते -

ब्रूमः। जात्यन्वयव्यतिरेकातु विधानात् वासोऽनश्शाब्दयोः जातिनिमित्तत्वात्तौ वानतक्षणयोर्नातिदेशकौ यथा - सिद्धमेव वासेऽनश्च दातव्यमिति ॥

(टि) एवं तावत् कर्मनामधेयानां अग्निहोत्रादीनामतिदेशकत्वमुक्तम् । यौगिकानां प्रायणीयादिशब्दानां गुणविधीनां वैष्णवादिशब्दानां च लिङ्गविशेषशून्यानां नास्त्यतिदेशकत्वमिति चोक्तम् । कर्मनामवदेव संस्कारनाम्नां यूपादिशब्दानामप्यतिदेशनिमित्तत्वं सिद्धम् । इदानीं तु तत्प्रसङ्गेन वासः प्रभृतीनां संस्कारनिमित्तत्वमेवास्ति नास्तीति चिन्त्यते । तत्रान्वयव्यतिरेकाभ्यां संस्कार निमित्तत्वमवसीयत इत्याशयेन (आह) वानतक्षणेत्यादिना । जात्यन्वयेति । जातिस्तु क्रियाव्यङ्ग्येति तदुत्तरकाले शब्दप्रयोगः न तु शब्दस्य वानादि क्रियाप्रवृत्तिनिमित्तमित्यभिप्रायः ॥

## ॥ गर्गत्रिरात्रे लौकिकेऽग्नावुपनिधानाधिकरणम् ॥

## सू. विशये लौकिकः स्यात् सर्वार्थत्वात् ॥

(मू) गर्गत्रिरात्रे आज्यहोमसामानि प्रकृत्य श्रूयते - "अग्निमुपनिधाय स्तुवीते"ति । तत्र संशयः - किमाधानसंस्कृत आहवनीयादिः वैदिकोऽग्निरुपनिधेयः किं वा लौकिक इति । तत्र संस्कृतस्य प्रयोजनापेक्षिणः सकलवैदिकार्थत्वस्वीकारस्याचिततत्वादाधान संस्कृत एवाग्निरुपनिधेय इति प्राप्ते -

ब्रूमः। "यदाहवनीये जुह्वति गार्हपत्ये हवींषि श्रपयतीत्यादिभिराहवनीयादेर्निर्धारितहोम - पाकादिप्रयोजविशेषत्वादनिर्धारितप्रयोजनविशेषो लौकिकोऽग्निरुपनिधेयः, न त्वग्निशब्दः संस्कृताग्निविषयत्वेन गम्यमानमपि आधान उपनिधानाङ्गत्वेनातिदिशतीति ॥

(टि) जाति संस्कारनिमित्तत्वविचारप्रसङ्गादिदमारभ्यते । तत्र लिङ्गादाहवनीयादीनां लौकिकवैदिकसर्वकार्यार्थत्वं वचनेन निराकृत्य वैदिककर्ममात्रार्थत्वं द्वादशे स्थितम् । इह वैदिकेऽपि यत्राग्निसामान्यं

विनियुक्तं तत्र नाहवनीयादीनां ग्रहणमित्युच्यते । प्रयोजनापेक्षिण इति हेतुविशेषणम् । प्रयोजनापेक्षित्वादित्यर्थः । यत्तु "यदाहवनीये जुह्वती"त्यादि विशेषश्रवणं तद्व्यवस्थार्थमिति भावः । अनिर्धारितेति । किञ्चाहवनीयादयो होमादिर्निराकाङ्क्षा न प्रयोजनान्तरमपेक्षन्ते । अग्निशब्दश्च जातिमात्र-वचनस्तज्जातीय इति । अगम्यमान इति । यदि संस्कृतविषयत्वेनाग्नि-शब्दोऽवगम्यते तदाधानमतिदिशेत्, न तु तथावगम्यते । अतो नातिदिशतीत्यर्थः ॥

## ॥ यूपशब्दस्य संस्कारप्रयोजकाधिकरणम् ॥

## सू. संस्कृतं स्यात्तच्छब्दत्वात् ॥

(मू) यूपैकादशिन्यां श्रूयते "उपयशो [शयो] यूपो भवती"ति एकादशानामपि यो दक्षिणतो एकादशातिरिक्तो द्वादशः स उपशयः । तथा च श्रूयते "यद्दक्षिणत उपशय" इति । तत्र उपशये संशयः - किमुपशये परिव्याणादयः कर्तव्याः न वेति ।

तत्र यूपशब्दे उपशयप्रयुक्तेन संस्कारनिमित्तेन यूपशब्देन परिव्याणादीनां यूपसंस्काराणामतिदेशात्ते कर्तव्या इति प्राप्ते -

ब्रूमः। संस्कारप्रयोजनस्य पशुनियोजनस्योपशये अभावान्न संस्काराः कर्तव्याः ।

केचिच्छेदनादयो वाचनिकाः यूपधर्माः उपशये अनुष्ठीयन्ते । तान्निमित्तीकृत्योपशयस्तुत्यर्थो यूपो भवतीत्येषोऽनुवाद इति । केचित् संस्कारं निमित्तीकृत्य संस्कारशब्दप्रयोगोपपत्तौ न संस्कारशब्द - स्यातिदेशिकत्वमसति प्रयोजन इति स्थितम् ॥

(टि) इदानीं संस्कारशब्दापवादः क्रियते । वर्तमानापदेशादप्यनुवाद इति दर्शयितुमुपन्यस्तं यूपो भवतीति ॥

## ॥ पृष्ठशब्दस्य ऋग्वेदवाचित्वाधिकरणम् ॥

## सू. कर्मणः पृष्ठशब्दः स्यात्तथाभूतोपदेशात् ॥

(मू) अग्नौ श्रूयते "पृष्ठैरुपतिष्ठत" इति । तत्र संशयः किमयं पृष्ठशब्दो ज्यौतिष्टौमका [ना] पृष्ठधर्माणामतिदेशक उत नेति । तत्र कर्मनामधेयभूतः पृष्ठशब्दः अग्निहोत्रन्यायाज्ज्यौतिष्टौमिकः पृष्ठधर्माणामतिदेशाक इति प्राप्ते-

ब्रूमः। कर्मनामधेयस्यापि पृष्ठशब्दस्येह उपतिष्ठत इति मन्त्रकरणत्वनिमित्तात्मनेवदान्यथानुपपत्तिकल्पितायाः पृष्ठसाधनभूतरथन्तरादिमन्त्रेषु लक्षणायाः स्वीकारादकर्मपरस्सन् नापिदेशक इति । तस्मादयमर्थः

पृष्ठैः पृष्ठसाधनै रथन्तरादिभिः समीपे स्थित्वाग्निमभिदध्यादिति । अत्र मन्त्रकरणकनिमित्तानेकपदादेवाभिधानक्रिया लभ्यते, अन्यस्यामन्त्र - करणिकाया अभावादिति बोध्यम् ॥

## ॥ इति सप्तमाध्यायस्य तृतीयः पादः ॥

(टि) अग्निहोत्रन्यायादिति । अयमाशयः - पृष्ठैरितीत्थम्भूतलशणे तृतीया । उपतिष्ठतिश्च समुपस्थिति वचनः प्रत्ययो भावनावाची । तदयमर्थः पृष्ठसदृशैः कर्मभिरग्निमुपतिष्ठत इति । अग्निसमीपे तिष्ठन् पृष्ठसदृशानि कर्माणि कुर्यादिति यावत् । ततश्च प्रकरणान्तरन्यायात् कर्मान्तरे वर्तमानः पृष्ठशब्दो गौणस्सन् धर्मातिदेशको भवतीति । आत्मनेपदं तु

"व्यत्ययो बहुलमि"ति समाधेयमिति । किञ्चाभिधानविधाने उपतिष्ठतिः समीपं लक्षयेत् । पृष्ठशब्दश्च तत्साधनमित्युभयोर्लक्षणा स्यात् । अस्मत्पक्षे तु पृष्ठशब्दस्यैकस्यैव धर्मेण लक्षणेति ज्यायानयं पक्ष इति पृष्ठशब्दस्य जघन्यवृत्तिता तावदुभयोः समा । उपतिष्ठतेस्तु नास्मत्पक्षेऽपि लक्षणेति तुल्यम् । किञ्च त्वत्पक्षे तृतीयाया उपपदविभाक्तित्वं आत्मनेपदस्य बाहुलकत्वं च कल्पनीयमिति स एव पक्षो दुष्टः, मत्पक्षे तु पृष्ठशब्दस्य साधनलक्षणामात्रं कल्प्यं, तच्च प्रमाणवदित्ययमेव पक्षो ज्यायानित्याशयेनाह अत्रमन्त्रकरणकेत्यादिना । एवेति । नतु लक्षणयेत्यर्थः । अत्र श्रुतानुमितौ द्वौ धातू, उपतिष्ठतिः श्रुतः अभिद-धातिश्चानुमित इति न धातोर्लक्षणेति भावः ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥

॥ सप्तमाध्यायस्य तृतीयः पादः ॥

॥ समाप्तः ॥

✣ ✣ ✣

॥ श्रीः ॥

## ॥ अथ सप्तमाध्यायस्य चतुर्थः पादः ॥

## ॥ सौर्य चरौ इतिकर्तव्यतावत्वाधिकरणम् ॥

### सू. इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम् ॥

(मू) अनारभ्य किञ्चिच्छ्रूयते - "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इत्येवमादि । तत्र संशयः - किमत्र इतिकर्तव्यताया अभावात् कुतश्चित् सा नातिदिश्यते अथवा इतिकर्तव्यतायाः सत्वादनुपदेशाच्च सा कुतश्चिदतिदिश्यत इति । तत्र प्रमाणाभावादितिकर्तव्यताया एवाभावात् सा नातिदिश्यत इति प्राप्ते -

ब्रूमः। फलभावनाया इतिकर्तव्यतापेक्षानियमात् इहापीतिकर्तव्यतायां सत्वादनुपदेशाच्च कुतश्चित् सा निर्दिश्यते, इयं भावना कुतश्चिन्निर्दिष्टेतिकर्तव्यताकेत्यनुमीयते । यत्र निर्दिश्यते ततो निर्दिश्यत इति स्थितम् । इदं तु पूर्वपक्षस्यातिमन्दत्वात्नाधिकरणान्तरमिति पक्षोऽप्याकरे स्थितम् ॥

✣ ✣ ✣

॥ श्रीः ॥

## ॥ अथ सप्तमस्य चतुर्थः पादः ॥

(टि) एवं नाम्नातिदेशोभिहितः । इदानीमानुमानिकवचनेनातिदेश उच्यते । तत्र तावदुपोद्घातत्वे नेदमारभ्यते । फलभावनाया इति । यागेन ब्रह्मवर्चसं कुर्यादित्याद्युपदिष्टाया इत्यर्थः । अनुपदेशाच्चेति ।

श्रुतिलिङ्गादिभिस्समर्पणादित्यर्थः । नाधिकरणान्तरमिति । उत्तरवि - वक्षया प्राप्त्यर्थमिति ॥

## ॥ सौर्ये चरौ वैदिकेतिकर्तव्यताधिकरणम् ॥

## सू. स लौकिकः स्याददृष्टप्रवृत्तित्वात् ॥

(मू) तत्रातिदेशे संशयः किं लौकिदी वैदिकी वेतिकर्तव्यता निर्दिश्यते इत्यनियमः उत लौकिक्येवाहोस्वित् वैदिक्येवेति । (तत्राविशेषादनियम इति चेत्, उच्यते । लौकिक्या अनिबद्धायाः पार्वण - स्थालीपाकाष्टकादिषु बहुषु दृष्टायाः साधारणशास्त्रानुमापकत्वात् सैवात्रेतिकर्तव्यता न तु वैदिकी प्रत्यक्षेण शास्त्रेण दर्शपूर्णमासादिषु निबद्धा अन्यत्र नेतुमशक्येति प्राप्ते -

ब्रूमः। वैदिकत्वसामान्यात् शीघ्रमुपस्थिता वैदिक्येवातिदिश्यते, न तु विना कारणं तामतिक्रम्य लौकिकादिष्टा युक्तेति । अत्रेदमवधेयम् - अवघातप्रयाजादिजन्यदृष्टादृष्टात्मकोपकारवर्गाणामवघातप्रया-जादिपदार्थानां च प्रापकोऽतिदेशः तद्विधायकशास्त्रं च विकृतिचोदनानुमितं प्रकृतिवदित्येवंरूपं, अर्थात् सौर्यादिवाक्यशेषभावमुपगतं भवति । ततश्च सौर्यं चरुं निर्वपेत् प्रकृतिवत् इति स्यादिति इति विध्यन्त इति चेतिकर्तव्यताब्राह्मणमुच्यत इति ॥

(टि) अनिबद्धाया इति । वेदे दर्शपूर्णमासादिषु प्रकरणेषु प्रत्यक्षेणानिबद्धाया अनिबद्धत्वादित्यर्थः । दृष्टाया इति । इदमपि हेतुविशेषणम् । दृष्टत्वादित्यर्थः । निबद्धेति । निबद्धत्वादित्यर्थः । अशक्येति । अशक्यत्वादित्यर्थः। सकृच्छ्रुतमितिकर्तव्यता - ब्राह्मणं प्रकृतौ विकृतिषु च विदधातीति न सम्भवति नच साधारण्येन

विधानम् । प्रकरणेन व्यवस्थितत्वादिति भावः। वैदिकत्वसामान्यादिति । अयमाशयः, यत्र सौर्यादिचोदनायां कथम्भावापेक्षा व्यावृत्तिक्षमेतिकर्तव्यता नाम्नायते तत्र कथम्भावस्याव्यावृत्तत्वादियं चोदनास्वसदृशं वाक्यमुपमानेन बुद्धावुपस्थापयति । उपस्थितं च तद्वाक्यं सम्बन्धाद्वाक्यार्थमुपस्थापयति । स च वाक्यार्थः फलकरणेतिकर्तव्यतासंयुक्तभावनरूपः। तत्र फलकरण-भावनानामिह सौर्यादिचोदनायामनाकाङ्क्षितत्वात् न सम्बन्धः । इतिकर्तव्यता त्वपेक्षितत्वात् सम्बध्यते । तदुक्तं उपमितलक्षितप्रमाणेन सम्बध्यत इति । उपमितेन वाक्यान्तरेण लक्षितायेतिकर्तव्यता तत्प्रमाणेनेत्यर्थः ।

ननु लौकिक्यानुमितवेदप्रमाणकत्वात् वैदिक्येवेति कुत इत्याशङ्क्याह - शीघ्रमिति । प्रत्यक्षवेदप्रमाणकत्वसामान्यादिति हेत्वर्थ इत्यभिप्रायः । द्वेधात्रातिदेशः कार्यातिदेशः शास्त्रातिदेशश्चेति । तत्र शास्त्रातिदेश ऊहबाधौ न स्यातामिति कार्यातिदेश इति दशमाद्ये वक्ष्यति । तदेतदाह अत्रेदमित्यादिना । यथा शास्त्रातिदेश ऊहबाधासिद्धिः कार्यातिदेशे च तत्सिद्धिः तथा दशमाद्य एव वक्ष्यामः । ननु तर्हि कथमिह विध्यन्तातिदेश इत्याकर उक्त इति चेदुच्यते । उपकारेण तद्द्वारेण पदार्थानां चातिदेशे तद्विधायिशास्त्रं चार्थात् सौर्यादिवाक्यशेषत्वमुपगतं भवतीत्यनेनाभिप्रायेणात्र विध्यन्तातिदेश उक्त इति ।

अस्तु वा विध्यन्तस्यैवातिदेशस्तथापि स्त एवोह-बाधौ । तथाहि - शास्त्रस्य हि द्वे रूपे प्रकृतिसम्बान्धितया निरूपितरूपं यथापाठरूपं चेति। तत्राद्यं स्वविहित - पदार्थप्रयोजनद्वारा प्रकृतिसम्बन्धित्वं, द्वितीयं तु शब्दस्वरूपमेव । तत्र यदि यथापाठमेव शास्त्रं विकृतावतिदिश्येत तथा "अग्नये जुष्टं निर्वपामी"त्यनेनैव रूपेण मन्त्रोऽपि सौर्ये प्राप्येत । ततोऽग्निपदस्य देवतापदस्य चासम्प्रतिपन्नरूपत्वाद्देवतापदविवक्षयैतत् पठितम्, अतोऽग्निपदरूपं च विवक्षितमिति न शक्यमध्यवसातुं, प्रत्युत

अग्निपदरूपमेव विवक्षितमित्यापद्येत । ततो न सूर्यपदं प्रक्षिप्येत, नाप्यग्निपदं बाध्येतेत्यूहबाधौ न सिध्येताम् । यदा तु प्रकृतावग्निपदस्य देवतापदरूपसम्प्रतिपत्तेर्देवतापदरूपमत्र विवक्षितं नाग्निपदरूपं, अदृष्टार्थत्वात् देवतापदाधिजिगांसया नान्तरीयकत्वादग्निपदमधीतमिति निश्चीयते । ततः सौर्ये तादृग्रूपमन्त्रातिदेशादग्निपदस्य चातद्रूपत्वात् स्वरूपस्य चाविवक्षितत्वात् निवृत्तौ सत्यां देवतावाचिनः सूर्यपदस्य प्रक्षेपादूहबाधौ सिद्धौ भवत इति प्रकृतिनिरूपितरूपविध्यन्तस्यातिदेशे न कश्चिद् दोष इति विध्यन्तातिदेशोक्तिराकर इति ॥

## ॥ गवामयन ऐकाह्निकेतिकर्तव्यतानुष्ठानाधिकरणम् ॥

### सू. द्वादशाहिकमहर्गणे तत्प्रकृतित्वात् ऐकाहिवम - धिकागमात्तदाख्यं स्योदकाहवत् ॥

(मू) "प्रजाकामा गवामयनमुपेयुरि"ति सत्रं विधाय तत्र "ज्योति - र्गौरायु"रिति संज्ञायुक्ता यागा उत्पन्नाः । तेषामहर्गणान्तःपातित्वात् "गणेषु द्वादशाहस्ये"ति द्वादशाहिकविध्यन्तश्चोदकतः प्राप्तः । चोदकशब्देन चानुमानिकमतिदेशिकं प्रकृतिवदिति वचनमुच्यते। ज्योतिरादिनामधेयाच्च ज्योतिराद्येकाहविध्यन्तः प्राप्तः । तत्राविरुद्धा उभयेऽपि कर्तव्याः । विरुद्धेषु संशयः - किं चोदकनामधेययोस्तुल्यबलत्वात् द्वादशाहिका एकाहिका वा धर्माः स्युरिति अनियमः उत चोदकबलीयस्त्वात् द्वादशाहिका अथवा नामधेयबलीयस्त्वात् ऐकाहिका इति ।

तत्र प्रमाण्याविशेषात् चोदकनामधेययोस्तुल्यबलत्वादनियम इति चेत् । उच्यते, इतिकर्तव्यताप्रापणार्थमेव कल्पितत्वाच्चोदकस्य नामधेयात् बलीयस्त्वात् द्वादशाहिका इत्येवं प्राप्ते -

ब्रूमः। आनुमानिकाच्चोदकात् प्रत्यक्षश्रुतस्य नामधेयस्य प्रत्यक्षत्वात् बलीयस्त्वाद्विरुद्धष्वैकाहिका धर्माः कर्तव्या इति ॥

॥ इति सप्तमाध्यायस्य चतुर्थः पादः ॥

॥ अध्यायश्च समाप्तः ॥

(टि) इदानीमानुमानिकवचननामधेययोर्बलाबलं चिन्त्यते । चोदकस्य दुर्बलत्वं वक्तुमुपयोगिचोदकशब्दार्थमाह चोदकशब्देनेत्यादिना । चोदकस्यानन्यप्रयोजनवत्वं बलवत्वहेतुरस्तीत्याशयेनाह - इतिकर्तव्यतेति । प्रत्यक्षत्वादिति । शीघ्रप्रमापकत्वमेव प्रमाणानां बलवत्वहेतुः । अनन्य - प्रयोजनवत्त्वस्य तु वैयर्थ्यापादकत्वेन बलवत्वहेतुत्वं वैयर्थ्यं चात्र नास्तीति न तेन चोदकबलीयस्त्वसिद्धिरित्यभिप्रायः ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥

॥ सप्तमाध्यायस्य चतुर्थः पादस्समाप्तः ॥

॥ समाप्तश्चाध्यायः ॥

✣ ✣ ✣

॥ श्रीः ॥

## ॥ अथाष्टमाध्यायस्य प्रथमः पादः ॥

### ॥ विशेषचिन्ताधिकरणम् ॥

(मू) सू. अथ विशेषलक्षणम् ॥

"सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इत्याद्यश्रुतेतिकर्तव्यताकेषु सौर्यादिषु आनुमानिकेन चोदकवचनेन वैदिकीतिकर्तव्यतास्तीत्युक्तम् । तत्र संशयः - किं सौर्यादिष्वेकस्मिन् कर्मणि सर्वकर्मभ्यः सर्वधर्मातिदेशस्य च विकल्पेन । ततश्च विशेषातिदेशलक्षणमिदमष्टमं नारम्भणीयं, अथवा एकस्मादेकस्य धर्मातिदेश इति नियमः, ततश्च विशेषातिदेशलक्षणमारम्भणीयमिति ।

तत्राविशेषाद्विकल्पेन सर्वविध्यन्तादेशः, ततश्च विशेषातिदेशलक्षणं नारम्भणीयमिति प्राप्ते,

ब्रूमः। एवं सति शास्त्रार्थस्याव्यवस्थाप्रसङ्गात् नियमः। ततश्चारम्भणीयं विशेषातिदेशलक्षणमिति इदं न पृथक् ॥

✤ ✤ ✤

॥ श्रीः ॥

## ॥ अथाष्टमस्य प्रथमः पादः ॥

विध्यन्ताधिकरणे वैदिकीतिकर्तव्यता सौर्यादिषु सादृश्यात् प्रवर्तत इति सामान्येनोक्तम् । अधुना तद्विशेषश्चिन्त्यते । तत्र फलविचारत्वेन लक्षणानारम्भणारम्भणसंशय इति द्रष्टव्यम् ॥

### ॥ विशेषकर्मण्णो धर्मातिदेशाधिकरणम् ॥

### सू. यस्य लिङ्गमर्थसंयोगादभिधानवत् ॥

(मू) "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इत्यादिषु नियमेन विध्यन्तप्राप्तिरित्युक्तम् । तत्र संशयः- किं नियामकमस्ति वा नवेति । तत्र निर्वपतिचोदनादीनां नियामकत्वाभावान्न नियामकं किञ्चिदिति प्राप्ते -

ब्रूमः । निर्वपतिचोदनादीनां कर्मविशेषोपस्थापकानां कर्मविशेषविध्यन्तोपस्थापकत्वात् तान्येव नियामकानीति । तथाहि - यस्य कर्मण उपस्थापकं शब्दगतमर्थगतं वा यस्यां विकृतौ दृश्यते तस्य विध्यन्तः तस्यां प्रवर्तत इति शक्यत एव नियन्तुं यथाग्नेयस्य सौर्ये तत्र हविर्निर्वपति तद्धितान्तेन देवतानिर्देशः एकदेवताकत्वं औषधद्रव्य-कत्वमित्यादीनि आग्नेयचोदनाया दृष्टसमबन्धानि दृश्यन्ते । तत्र सौर्यस्य विध्यन्तापेक्षायां निर्वपतिचोदनासामान्यात् निर्वपतिर्दर्शपूर्णमास-विध्यन्तमित्यवगमयति । तत्रापि एकदेवताकत्वं औषधद्रव्यकत्वं वा आग्नेयविध्यन्तमिति गमयति । ततश्चेतादृशमिदं वाक्यं "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम आग्नेयवदि"ति यथा आग्नेयनिर्वापादीनि कृत्वा

स्वर्गः कृतः तथा सौर्येणापि निर्वापावघातादीनि कृत्वा ब्रह्मवर्चसं कुर्यादित्यर्थः । एवमनेकदेवतेष्वग्नीषोमीयैन्द्राग्नविध्यन्तः आज्यद्रव्यकेषु उपांशुयाजस्य पयोदध्यामिक्षादिषु पशौ च दैक्षे सान्नाय्यस्य पश्वन्तरेषु दैक्षस्य ऐकादशिनेषु सवनीयस्य पशुगणान्तरेषु ऐकादशिनस्य अव्यक्तेषु सोमस्य सत्रेष्वहीनेषु चाहर्गणेषु द्वादशाहस्य संवत्सरादिषु च गवामयनस्येत्यादि द्रष्टव्यम् । इदं नाधिकरणान्तरमिति पक्षान्तरम् ॥

(टि) विध्यन्तासम्बद्धानामिति हेतुविशेषणम् । विध्यन्तासम्बद्धत्वादित्यर्थः। विध्यन्तासम्बद्धाः कथं विध्यन्तं नियच्छन्तीति भावः। साक्षात्सम्बन्धाभा - वेऽपि परम्परासम्बन्धोऽस्तीत्याशयेनाह - निर्वपतीत्यादिना । दृष्टसम्बन्धानीति । आग्नेयचोदनायाश्च दार्शपौर्णमासिकविध्यन्तेन सम्बन्धोऽ स्तीति निर्विवादमिति परम्परासम्बन्धान्निर्वपत्यादीनां निया - मकत्वमित्यभिप्रायः। दृश्यन्त इति । सौर्य इत्यनुषञ्जनीयम् । तत्रेति । अयं भावः- निर्वपत्यादिसादृश्यावगमे सत्युपमानेनाग्नेयचोदनां बुद्धावुपस्थापयति सा च स्वार्थं त्र्यंशा च भावना तस्या अर्थः । तत्र साध्यसाधनांशाविहानपेक्षितत्वादनादृत्य तृतीय इत्थम्भावांशोऽ पेक्षासन्निधियोग्यत्वैः वाक्यशेषत्वेन सम्बध्यत इति । एवं सम्बन्धे या वचनव्यक्तिस्तां दर्शयति ततश्चेदृशमित्यादिना । विशेषातिदेशः कृत्स्नोऽत्रैव संक्षिप्तः। अध्यायसमाप्तेस्त्वस्यैव प्रपञ्च इति दर्शयन्नाह - एवमित्यादिना । अव्यक्तेष्विति । साक्षाद्देवताद्यविधानमव्यक्तत्वं, सोमे हि ग्रहणेष्वेव देवताविधिः ऐन्द्रवायवमित्यादिना न याग इत्यव्यक्तत्वम् सोमस्येति । इदं नाधिकरणान्तरमिति । तथा च तन्त्ररत्ने "संशयोऽस्मिन् पक्षे न कार्य" इत्युक्तमिति ॥

## ॥ सोम ऐष्टिकधर्मानतिदेशाधिकरणम् ॥

सू. प्रवृत्तित्वादिष्टेः सोमे प्रवृत्तिः स्यात् ॥

(मू) "ज्योतिष्टोमेन स्वर्गकामो यजेते"ति श्रूयते । तत्र संशयः - किमत्र सोमे ऐष्टिकविध्यन्तः स्यादुत नेति । तत्र दीक्षणीयाद्यवभृथान्तेष्टिषु पशुषु च दर्शपूर्णमासविध्यन्तस्य चोदकप्राप्तस्य दर्शनात् तन्मध्यवर्तिसोमेऽपि ऐष्टिकविध्यन्तः स्यादिति प्राप्ते -

ब्रूमः। कथम्भावकाङ्क्षापूरणसमर्थैः दृष्टार्थसन्निपत्योपकारभूताङ्गैः सन्निधौवाम्नातैरभिषवादिभिरेव निराकाङ्क्षीकरणात् नैष्टिकव्य [वि] ध्यन्त - सम्बन्ध इति । अत्रेदमवधेयम् - केचित् सन्निपत्योपकारकाः यथाग्निहोत्रे दोहनादयो दर्शपूर्णमासयोश्चावधातादयो ज्योतिष्टोमे चाभिषवादयः । केचिच्चारादुपकारकाः ये आरात् दूरसमीपयोः स्थित्वा उपकुर्वन्ति न तु क्रियानिवृत्तौ सन्निहितमिति । यथा प्रयाजादयो दृष्टार्थाः यथा प्रदीपादयः तत्र यत्र सन्निपत्योपकारकाः सर्वे सन्निधावाम्नाताः सा प्रकृतिः यथाग्निहोत्रदर्शपूर्णमासौ ज्योतिष्टोमश्च । तेषां प्रकृतित्वमेव, तेभ्योऽन्येषां केषाञ्चित् विकृतित्वं प्रकृतित्वं च, केषाञ्चित् विकृतित्वमेवेति विवेकः । इदं तु क्वचिद्वर्णकान्तरत्वेन स्थितमिति ॥

(टि) विध्यन्तासम्बन्धे कथम्भावाकाङ्क्षैव हेतुरित्याशयेनाह - कथम्भावेति । अत्रेदमित्यारभ्य यदुक्तं तदित्यर्थः । क्वचिदिति । न्यायमालादावित्यर्थः। तत्र किमिष्टयग्निहोत्रसोमानां मूलप्रकृतित्वं नास्त्युतास्तीति संशयः। तत्र लौकिकत्वेनेष्टश्राद्धीनामेतावद्भिरङ्गैः सम्पूर्ण उपकार इति निश्चेतुमशक्यत्वान्नास्ति मूलप्रकृतित्वमिति पूर्वः पक्षः । श्रुत्या निश्चयसम्भवादस्ति मूलप्रकृतित्वमिति सिद्धान्तः ॥

॥ ऐन्द्राग्नादावैष्टिकधर्मातिदेशाधिकरणम् ॥

सू. इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ॥

(मू) "ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः" "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इत्यादय इष्टय आम्नाताः । तत्र संशयः- किमत्र दर्शपौर्णमासिको वा सौमिको वा विध्यन्त इत्यनियम उत दार्शपौर्णमासिक एवेति नियम इति ।

तत्र दर्शपूर्णमासयोः सोमविध्यन्तसत्वाविशेषात् अनियम इति प्राप्ते -

ब्रूमः। तद्धिताद्यवगतदेवतासम्बन्धनिर्वपतिशब्दौषधद्रव्यकत्वकपालवत्तासामान्यादैन्द्राग्नसौर्यादिष्विष्टिषु दार्शपौर्णमासिकविध्यन्त एवेति ॥

(टि) इदानीं पूर्वोक्तप्रपञ्च आरभ्यते । तत्रेष्टिषु प्रथमं चिन्त्यते ऐन्द्राग्नमित्यादिना ॥

## ॥ अग्नीषोमीयपशौ दार्शपूर्णमासिवधर्मातिदेशाधिकरणम्

सू. पशौ च लिङ्गदर्शनात् ॥

(मू) ज्योतिष्टोमे अग्नीषोमीये पशौ संशयः - किं दार्शपौर्णमासिको वा सौमिको वेत्यनियमः उत दार्शपौर्णमासिक एवेति नियम इति ।

तत्र उभयत्र विध्यन्तसत्वादनियम इति प्राप्ते -

ब्रूमः। तद्धितान्तदेवतानिर्देशालभातिसादृश्यात् दार्शपौर्णमासिक एवेति ।

अत्रेदमवधेयम् - आवहनासादनादीनां सन्निपत्योपकारिणां सन्निधावनामनातत्वाच्च क्रयसन्निधावस्योत्पत्तिः। तत्र धर्मानाम्नानात् वा दृष्टार्थाङ्गसिद्धये अत्रातिदेशापेक्षेति ॥

(टि) पशौ दैक्षे इदानीं चिन्त्यते - आलभतीति । "ईषामालभेते" त्यालभतिर्दर्शपूर्णमासयोरस्तीत्यभिप्रायः । ननु कृत्स्नविधाने पशौ कथमतिदेश इत्याशङ्क्याह - अत्रेदमित्यादिना । दृष्टार्थाङ्गसिद्ध्य इति । केचित्त्वदृष्टार्थाङ्गानाम्नानात् तत्सिद्ध्येऽतिदेशापेक्षेत्याहुः, तन्न, "उपाकृत्य पञ्च जुहोती"त्यादिभिः बहूनामदृष्टार्थानां विधानात्तदर्थमतिदेशा - पेक्षायां वक्तुमशक्यत्वादिति भावः ॥

## ॥ सवनीयपशावग्नीषोमीय धर्मातिदेशाधिकरणम् ॥

## सू. दैक्षस्य चेतरेषु ॥

(मू) सवनीयनिरूढानुबन्ध्यादिष्वितरेषु पशुषु सन्देहः - किं दार्शपौर्णमासिको विध्यन्त उत दैक्षस्याग्नीषोमीयस्य पशोरिति । तत्र दर्शपूर्णमासयोः धर्मवत्त्वात् दार्शपौर्णमासिक एवेति प्राप्ते -

ब्रूमः । प्राणिद्रव्यकत्वविशेषसादृश्यात् दैक्षस्य विध्यन्त इति बोध्यम् ॥

(टि) धर्मवत्त्वादिति । अग्नीषोमीयो हि स्वयमधर्मकोऽन्यतो धर्मान् लभते । न ह्याढ्ये वदान्यप्रेष्ठेऽवतिष्ठमाने क्षुत्क्षामो भिक्षुकान्तरं याचयितुमर्हतीति भावः । प्राणिद्रव्यकत्वेति । अयमाशयः - प्राणिद्रव्यकत्वाद्विशसनादिकमपेक्षितम् । तच्च न दर्शपूर्णमासयोरिति यस्मादपेक्षितं लभ्यते स एव याचयितव्यः आढ्यो वा भिक्षुर्वेति नादरणीयमिति ॥

## ॥ ऐकादशिनपशौ समानधर्मातिदेशाधिकरणम् ॥

## सू. ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य दर्शनात् ॥

(मू) सन्त्येकादशिनः पशवः "आग्नेयं [कृष्णग्रीवम्] इत्यारभ्य आम्नाताः,

अन्येषां च अश्वमेधप्रकरणे आम्नाताः आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेवः ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः संहितोऽधो रामः सावित्रो वारुणः प्रेत्व "इति । ज्योतिष्टोमेऽप्येते "प्रैवाग्नेयेन वापनयति मिथुनं सारस्वत्या करोति रेतः सौम्येन दधाति प्रजनयति पौष्णेने"त्यादिभिर्विहिताः । तेषु सन्देहः - किमग्नीषोमीय विध्यन्त उत सवनीयविध्यन्त इति ।

तत्र सवनीयस्यैकादशिनानां च चोदनागतसादृश्य - विशेषाभावादग्नीषोमीयविध्यन्त इति प्राप्ते -

ब्रूमः। चोदनागतसादृश्यविशेषाभावेऽपि अर्थगतसुत्याकालत्वरूप-सादृश्यविशेषसत्वात् सवनीयविध्यन्त इति । सवनीय एव सौत्य इत्युच्यते ॥

(टि) सुत्याकालत्वरूपसादृश्येति ।" द्वे द्वे रशने यूपमृच्छत इति द्वैरशन्य-दर्शनाच्चेति द्रष्टव्यम् ॥

## ॥ पशुगणेष्वैकादशिनधर्मातिदेशाधिकरणम् ॥

## सू. तत्प्रवृत्तिर्गणेषु स्यात् प्रतिपशुयूपदर्शनात् ॥

(मू) काम्यपशुकाण्डे "वसन्ते ललामांस्त्रीन् वृषभानालभेते"ति श्रूयते, तथा "मैत्रं श्वेतमालभेत वारुणं कृष्णं अपां चौषधीनां च सन्धावन्नकाम" इति । एवमादयः पशुगणा अत्रोदाहरणम् ॥

तेषु संशयः - किमग्नीषोमीयस्य विध्यन्तः उत एकादशिनानामिति । तत्र सादृश्यविशेषादर्शनादग्नीषोमीयस्येति प्राप्ते -

ब्रूमः। गणत्वसामान्यादैकादशिनानां विध्यन्तः । पशुगणेष्विति गणत्वं न सादृश्यमित्यत्राशङ्का ॥

(टि) पूर्वपक्षशङ्काबीजं दर्शयति गणत्वं न सादृश्यमिति ।

## ॥ अव्यक्तपशौ सौमिकधर्मातिदेशाधिकरणम् ॥

## सू. अव्यक्तासु तु सोमस्य ॥

(मू) इदं श्रूयते - "विश्वजिता यजेत" "अभिजिता यजेतेन"ति तथा "द्वादशाहेन यजेते"ति । तत्र संशयः - किमेतेषु ऐकाहेषु द्वादशाहे च दार्शपौर्णमासिको वा सौमिको वा विध्यन्त इत्यनियमः उत दार्शपू [पौ] र्णमासिक एव अथवा सौमिक एवेति । तत्र विशेषाभावा [द] नियम इति चेत् । उच्यते । क्लृप्तप्रकृतिताकत्वात् दार्शपौर्णमासिक इति प्राप्ते -

ब्रूमः। तद्धितचतुर्थीमन्त्रवर्णान्यतमेन स्वार्थतया विनियुक्तदेवताकत्व-निरूहरूपाव्यक्तत्वसामान्यात् सौमिक इति । "सोमेनैन्द्रवायवं गृह्णीते"त्यादिभिर्ग्रहणदेवतात्वेन विहितानां इन्द्रवाय्वादीनां अर्थात् यागदेवतात्वं न तु यागार्थतया काश्चिद्देवता विधीयन्त इति ॥

(टि) नन्वैन्द्रवायवमित्यादिभिः तद्धितैरेव सोमदेवताविधिरिति कथमव्यक्ततेत्याशङ्क्याह-सोमेत्वित्यादिना ।

## ॥ अहर्गणेषु द्वादशाहिधर्मातिदेशाधिकरणम् ॥

## सू. गणेषु द्वादशाहस्य ॥

(मू) द्विरात्रादिशतरात्रपर्यन्तेषु गवामयने च संवत्सरसत्रे च संशयः - किं ज्यौतिष्टौमिको विध्यन्तः उत द्वादशाहस्येति ।

तत्राव्यक्तत्वात् ज्यौतिष्टौमिक इति प्राप्ते -

ब्रूमः। अव्यक्तत्वे सति गणत्वस्य विशेषसादृश्यस्य सत्वात् द्वादशाहस्येति ॥

(टि) अहर्गणेषु चिन्त्यते - द्विरात्रादीत्यादिना ॥

## ॥ संवत्सरसत्रेषु गवामयनिक धर्मातिदेशाधिकरणम् ॥

## सू. गव्यस्य च तदादिषु ॥

(मू) संवत्सरसत्रेषु आदित्यानामयनप्रभृतिषु संशयः - किं द्वादशाहिको विध्यन्त उत गावामयनिक इति ।

तत्र द्वादशाहस्याहर्गणप्रकृतित्वस्य कल्पितत्वात् द्वादशाहिकविध्यन्त इति प्राप्ते -

ब्रूमः। संवत्सरसत्रत्वसामान्यात् गावामयनिक इति ॥

(टि) पूर्व[वाप] वादोऽधुना क्रियते - संवत्सरेति ॥

## ॥ निकायिनामुत्तरेषु पूर्वनिकायिधर्मातिदेशाधिकरणम् ॥

## सू. निकायिनां च पूर्वोत्तरेषु प्रवृत्तिः स्यात् ॥

(मू) "साहस्रं साद्यस्काः" इत्येकनामधेयेन युगपत् प्रस्तुत्य पश्चात् क्रमेण विहिताः साहस्रसाद्यस्कसङ्घवर्तिनो यागा निकायिन इत्युच्यन्ते । तेषां प्रथमस्य साहस्रस्य साद्यस्कस्य च केचिद्धर्मा आम्नाताः उत्तरे त्वधर्मकाः । तेषूत्तरेषु संशयः- किं ज्यौतिष्टौमिको विध्यन्तः उत प्रथमस्य निकायिन इति । तत्राव्यक्तचोदनात्वसामान्यात् ज्यौतिष्टौमिक इति प्राप्ते -

ब्रूमः। एकनिकायवर्तित्वावान्तरसामान्यात् उत्तरेषु साहस्रेषु प्रथमसाहस्रस्य उत्तरेषु साद्यस्केषु प्रथमस्य साद्यस्कस्येति ॥

(टि) अथ निकायेषु चिन्त्यते साहस्रा इत्यादिना ॥

## ॥ फलादीनामनतिदेशाधिकरणम् ॥

## सू. कर्मणस्त्वप्रवृत्तित्वात् फलनियमकर्तृ - समुदायस्यानन्वयस्तद्बन्धनत्वात् ॥

(मू) दर्शपूर्णमासयोः फलं स्वर्गः, नियमो यावज्जीवकता कर्ता स्वर्गकामः, समुदाय आग्नेयादीनां षण्णां साहित्यम् । तत्र संशयः - किमेते फलनियमकर्तृसमुदायाः सौर्यादिषु विकृतिष्वतिदिश्यन्ते नवेति ।

तत्र प्रयाजाद्यङ्गवत् प्रकृतिभावनासम्बन्धाविशेषादेते अतिदिश्यन्त इति प्राप्ते-

ब्रूमः। अतिदेशस्य विकृतिभावनाकथम्भावापेक्षा - निबन्धनत्वात् प्रकृतिभावनायां इत्थम्भावेनान्वितानां प्रयाजाद्यङ्गानामेवातिदेशः न तु प्रधानकर्म तत्सम्बद्धा फलादयः च प्रकृतावित्थम्भावेनान्विता अक्रत्वर्था अनङ्गभूता अनपेक्षिता अतिदिश्यन्त इति । अत्र फलनियमौ पुरुषार्थौ कर्तापि न कर्मार्थः कर्म पुरुषार्थं आग्नेयादीनि षडपि नान्योन्यार्थानि किन्तु फलार्थानि पुरुषार्थानि वा । तस्मादक्रत्वर्थत्वादेतेषां नातिदेशतः प्राप्तिः, आग्नेयादीनां अप्रवृत्तौ तत्साहित्यमपि न प्रवर्तेत इति विवेकः ॥

(टि) इदानीं फलादीनामतिदेशोऽस्ति नास्तीति चिन्त्यते । फलादीनामक्रत्वर्थत्वमेव प्रतिपादयति - तत्र फलेत्यादिना ॥

## ॥ गुणकामानां गोदोहनादीनां अनतिदेशाधिकरणम् ॥

## सू. गुणकामेष्वाश्रितत्वात् प्रवृत्तिः स्यात् ॥

(मू) दर्शपूर्णमासयोः श्रूयते "गोदोहनेन पशुकामस्य प्रणयेदि"ति ।

एवमादिषु गुणफलेषु तत्साधनभूतेषु गोदोहनादिषु च संशयः - किमेतानि गुणफलानि तत्साधनभूतानि गोदोहनादीनि च विकृतिषु प्रवर्तन्ते उत नेति ।

तत्र गुणानामङ्गभूतप्रणयनादीनां प्रवृत्तेः तत्साधनभूतगोदोहनादीनि तत्साधनानि फलानि च प्रवर्तन्त इति प्राप्ते -

ब्रूमः। गुणफलानां तत्साधनभूतगोदोहनादीनां क्रत्वर्थत्वाभावात्ते न प्रवर्तन्त इति । ततश्च यदि विकृतिषु गोदोहनेन प्रणयेत् पशुकाम इन्द्रियादिकामश्च दध्यादिभिर्हुनेद्वा दानफलं सिद्धयेत् । किञ्च क्रतुफलमपि न सिद्धयेत् । विना शास्त्रेणेच्छामात्रेण चमसबाधात् क्रतुवैगुण्यप्रसङ्गादिति बोध्यम् ॥

(टि) गुणकामेष्वाश्रयप्रवृत्तेः फलप्रवृत्तिराशङ्क्य निराक्रियते- गोदोहनेनेत्पादिना ।

## ॥ सौर्ये चरावभिमर्शनद्वयस्य विकल्पाधिकरणम् ॥

## सू. एककर्माणि विकल्पोऽविभागो हि चोदनैकत्वात् ॥

(मू) "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इति श्रूयते । स च सौर्य आग्नेयविकार इति वक्ष्यते । आग्नेयश्च पौर्णमास्यमावास्ययोः उत्पन्नत्वादुभयसञ्जातस्य च कालभेदेन व्यवस्थया च "चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्रामावास्यामि"ति प्रकृतौ मन्त्रद्वयेनाभिशम [मर्श] नं विहितम् । तच्च मन्त्रद्वयं सौर्ये अतिदेशतः प्राप्तम् । तत्र संशयः- किं यदा सौर्यं पौर्णमास्यां प्रयुज्यते तदा चतुर्होत्राभिमर्ष्टव्यः, यदा मावास्यायां तदा पञ्चहोत्रेति मन्त्रव्यवस्था उत उभयत्र मन्त्रविकल्पः चतुर्होत्रा पञ्चहोत्रा वेति ।

तत्र प्रकृतौ व्यवस्थितत्वादिहापि व्यवस्थेति प्राप्ते -

ब्रूमः। मन्त्रयोराग्नेयाङ्गत्वाविशेषाद्विकल्प इति । इदं त्ववधेयम् - न कालद्वारेण मन्त्रयोराग्नेयसम्बन्ध-कालस्याप्रकृतत्वादिति कालस्य न व्यवस्थापकत्व मिति ॥

(टि) इदानीं विशेषातिदेशप्रसङ्गाददतिदिष्टयोर्मन्त्रयोर्व्यवस्था वा विकल्पो वेति चिन्त्यते । कालकृता व्यवस्था कुतो न स्यादित्याशङ्क्याह-इदं त्वित्यादिना ॥

## ॥ सौर्यचरावाग्नेयधर्मातिदेशाधिकरणम् ॥

## सू. लिङ्गसाधारण्याद्विकल्पः स्यात् ॥

(मू) "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम" इत्येवमादिषु विकृतिष्विष्टिषु दार्शपौर्णमासिको विध्यन्त इत्युक्तम् । सन्ति तु आग्नेयादीनि कर्माणि । तत्र संशयः- किं यस्य कस्यचिद्दार्शपौर्णमासिकस्याग्नेयादिकर्मणो विध्यन्तः सौर्यादिषु स्यादित्यनियम उत एकदैवत्येषु एकदेवत्यस्याग्नेयस्य अनेकदेवत्येषु अनेकदेवत्ययोरग्नीषोममैन्द्राग्नयोराज्यद्रव्यदेषु उपांशुयाजस्य पय आदिद्रव्यकेषु सान्नाय्यस्येति नियम इति ।

तत्र विशेषाभावादनियम इति प्राप्ते -

ब्रूमः। एकानेकदेवत्यत्वद्रव्यविशेषत्वादिसादृश्यविशेषादुक्तरूपनियम इति । तस्मादेकदेवत्यत्वसामान्यात् सौर्य आग्नेयविकार इत्यादि द्रष्टव्यम् ॥

(टि) प्रासङ्गिकं समाप्य विशेषातिदेश एव चिन्त्यते सौर्यमित्यादिना ॥

## ॥ हविर्देवतयोः सन्निपाते हविः सामान्यस्य बलीयस्त्वाधिकरणम् ॥

सू. विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपास्यत्वात् ॥

(मू) इदं श्रूयते "ऐन्द्राग्नमेकादशकपालं निर्वपे"दिति तथा"ग्नेयं पय" इति । तत्र संशयः - किं देवताहविःसामान्ययोः तुल्यबलत्वादतोऽनियम उत देवतासामान्यं बलवत्त्वात्तस्माद्देवतासामान्यादैन्द्रे पुरोडाशे सान्नाय्यविध्यन्तः आग्नेये पयसि चौषधस्य, अथवा हविःसामान्यं बलीयः, तस्मात् हविःसामान्यादैन्द्रे पुरोडाशे औषधस्य पयस्याग्नेये सान्नाय्यस्येति ।

तत्राविशेषादतुल्यबलत्वादनियम इति चेत्, उच्यते । देवताया मुख्यत्वाज्जघन्यत्वाद्धविषः प्रबलतरत्वात् देवतासामान्यं बलवत् । तस्माद्देवतासामान्यात् ऐन्द्रे सान्नाय्यस्याग्नेये औषधस्य च विध्यन्त इतीति प्राप्ते -

ब्रूमः। त्यज्यमानस्य हविषः त्यागरूपकर्मणः प्रत्यासन्नत्वाद्धविः सामान्यं बलीयः । तस्माद्धविः सामान्यं बलीयः । तस्माद्धविः सामान्यात् ऐन्द्रपुरोडाशे औषधस्याग्नेये पयसि सान्नाय्यस्य च विध्यन्त इति ॥

(टि) इदानीं देवताहविस्सामान्ययोः बलाबलत्वं चिन्त्यते मुख्यत्वादिति । देवतायाः प्रातिपदिकार्थत्वान्मुख्यत्वं तद्धितप्रत्ययार्थत्वाच्च द्रव्यस्य जघन्यत्वमिति भावः। प्रत्यासन्नत्वादिति । देवतायाश्चोद्देश्य-मात्रत्वाद्विप्रकर्षः, यद्यपि प्रातिपदिकार्थत्वात् पदार्थवेलायां देवता मुख्या तथापि वाक्यार्थवेलायां हविर्द्वारेण त्यागक्रियासम्बन्धाद्विप्र-कृष्टवाक्यार्थभूतकर्मविध्युत्तरकालं चेतिकर्तव्यतापेक्षेत्यतिदेशः तदा च हविस्सामान्यस्य सन्निकृष्टत्वाद्बलीयस्त्वमिति हविस्सामान्यादेव विध्यन्तनियमो युक्त इत्यभिप्रायः ॥

## ॥ शतकृष्णलाख्यहिरण्य औषधधर्मातिदेशाधिकरणम् ।

## सू. हिरण्यमाज्यधर्म तेजस्त्वात् ॥

(मू) "प्राजापत्यं घृते चरुं निर्वपेत् शतकृष्णलमायुष्काम" इति श्रूयते । तत्र हिरण्यशकले कृष्णले संशयः किमत्राज्यविध्यन्त उत औषधविध्यन्त इति । तत्र उज्ज्वलत्वसामान्यात् आज्यविध्यन्त इति प्राप्ते -

ब्रूमः। विशदत्वसामान्यादौषधविध्यन्त इति ॥

(टि) अथ विशेषातिदेश एव चिन्त्यते - प्राजापत्यमित्यादिना ॥

## ॥ मधूदक उपांशुयाजीयाज्यधर्मातिदेशाधिकरणम् ॥

## सू. मधूदके द्रव्यसामान्यात् पयोविकारः स्यात् ॥

(मू) चित्रायामिष्टौ श्रूयते - "दधि मधु घृतमापो धानाः तण्डुलाः तत्संसृष्ट प्राजापत्यं भवती"ति । तत्र मधूदकयोः संशयः - किं मधु उदकं च पयोविकारः उत आज्यविकार इति ।

तत्र सांसिद्धिकद्रव्यत्वसामान्यात् पयो विकार इति प्राप्ते -

ब्रूमः। वर्णसामान्यादाज्यविकार इति । अत्र बहुयागत्वमेकयागत्वं चेति पक्षद्वयमाकरे स्थितम् ॥

## ॥ इति अष्टमाध्यायस्य प्रथमः पादः ॥

(टि) अत्राचार्यैः प्रसङ्गाद्विचार्य निर्णितमर्थं दर्शयति - अत्र बहुयागमित्यादिना । तत्र यदा "तत् संसृष्टं प्रजापत्यमि"त्यत्र तदित्यनेन दध्यादीनां प्रत्येकं परामृश्य प्राजापत्यमिति देवतासम्बन्धः क्रियते संसृष्टमिति

चैकप्रधानत्वात् प्रधानमनूद्यते तदा बहवो यागाः, यदा नु तदित्यनेन संसृष्टमित्येत् परामृत्य प्राजापत्यमिति देवतासम्बन्धः क्रियते तदैको यागा इति । तत्र बहुयागपक्ष एव ज्यायानिति द्वादशाद्य आचार्या एव वक्ष्यन्ति । तत्तत्रैव वक्ष्यामः ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥

॥ अष्टमाध्यायस्य प्रथमः पादः ॥

✣ ✣ ✣

॥ श्रीः ॥

## ॥ अथ अष्टमाध्यायस्य द्वितीयः पादः ॥

### ॥ ऐष्टिकसौत्रामण्ययोरैष्टिकधर्मातिदेशाधिकरणम् ॥

### सू. वाजिने सोमपूर्वत्वं सौत्रामण्यां च ग्रहेषु ताच्छब्द्यात् ॥

(मू) चातुर्मास्येषु वाजिनेज्या श्रुता "वाजिभ्यो वाजिनमि"ति, सौत्रामण्यां च सुराग्रहाः श्रुताः "आश्विनं ग्रहं गृह्णाति, सारस्वतं गृह्णाति ऐन्द्रं गृह्णाती"ति । तत्र संशयः किं वाजिनयागे सौत्रामण्यङ्गभूतेपु सुराग्रहेषु च सौमिको विध्यन्त उत हविस्सामान्यादैष्टिक इति । तत्र "सोमो वाजिनं सुरा सोम" इति असोमे सोमशब्दस्य सोमधर्मातिदेशार्थत्वात् सौमिकविध्यन्त इति प्राप्ते-

ब्रूमः। असोमे श्रूयमाणस्य सोमशब्दस्य प्रशंसार्थत्वान्न तन्निमित्तः सौमिकविध्यन्तः किन्तु हविस्सामान्यादैष्टिक इति । तत्र वाजिने पयो-

विध्यन्तः सुराग्रहेषु चौषध इति ॥

(टि) ॥ श्रीः ॥

## ॥ अथाष्टमस्य द्वितीयः पादः ॥

सोमधर्मातिदेशार्थत्वादिति । अग्निहोत्रशब्दवदिति भावः ।

### । पशौ सान्नाय्यधर्मातिदेशाधिकरणम् ॥

सू. पशुः पुरोडाशविकारः स्यात् देवतासामान्यात् ॥

(मू) अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः "यो दीक्षितो यदग्नीषोमीयं पशुमालभते" इति । स च दर्शपूर्णमासविकार इत्युक्तम् । तत्र संशयः - किं पशुरग्नीषोमीयविकार उत सान्नाय्यविकार इति। तत्र देवतासामान्यादग्नीषोमीयपुरोडाशविकार इति प्राप्ते -

ब्रूमः। घनत्वपशुप्रभवत्वोभयात्मकहविस्सामान्यात् सान्नाय्यविकार इति । अत्र हविस्सामान्याभावशङ्का ॥

(टि) देक्ष एव विशेषश्चिन्त्यते अस्तीत्यादिना ॥

## ॥ पशौ पयोधर्मातिदेशाधिकरणम् ॥

सू. दध्नः स्यान्मूर्तिसामान्यात् ॥

(मू) पशुस्सान्नाय्यविकार इति स्थितम् । तत्र संशयः - किमनियमः किं वा दधिविकार उत पयोविकार इति । तत्राविशेषादनियम इति चेदुच्यते । घनत्वसामान्याद्दधिकार इति एवं प्राप्ते -

ब्रूमः। साक्षात् पशुप्रभवत्वसामान्यात् पयोविकार इति ।

(टि) सान्नाय्ययोर्मध्ये कस्येति चिन्त्यते - पशुरित्यादिना ॥

## ॥ आमिक्षायां पयोधर्मातिदेशाधिकरणम् ॥

सू. आमिक्षोभयभाव्यत्वादुभयविकारः स्यात् ॥

(मू) आमिक्षा सान्नाय्यविकार इति स्थितम् । तत्र संशयः - किमामिक्षा उभयविकारः उत दधिविकारः अथवा पयोविकार इति । तत्र

दधिपयोरूपोभयभाव्यत्वादुभयविकार इति चेदुच्यते । संहतत्वसामान्यादधि विकार इति प्राप्ते -

ब्रूमः। दधिसंसृष्टघनीभूतपयस एवामिक्षात्वात् पयोविकार इति पयस आमिक्षाहविष्ट्वं चतुर्थ उक्तमिति ॥

(टि) कुतः पयस आमिक्षात्वमित्यत्राह - पयस आमिक्षाहविष्ट्वमिति । तथाहि - "तप्ते पयसि दध्यानयती"ति संस्कारवाक्ये आनयनक्रियां प्रति दध्नः प्राधान्यम्, द्वितीयानिर्देशात् दध्नापि व्याप्यमानत्वात् पयसः कर्मीभूताद्दध्नोऽपि प्राधान्यं सम्प्रदानवत् । ततश्च "सा वैश्वदेव्यामिक्षे"त्युत्तरवाक्ये कर्मविधायके सति तच्छब्देन पयः परामृश्यते, तच्छब्दस्य प्रकृतप्रधानपरामर्शित्वात्, तच्छब्दपरामृष्टस्यैव हि वैश्वदेवीति सामानाधिकरण्येन देवतासम्बन्धः क्रियते यस्य हि देवतासम्बन्धस्तद्धविरिति निर्विवादम् । अतः पयसो हविष्ट्वमित्यतोऽपि पयोविकार आमिक्षेत्यभिप्रायः॥

## ॥ द्वादशाहे सत्राहीनयोर्व्यवस्थया धर्मातिदेशाधिकरणम् ॥

### सू. सत्रमहीनश्च द्वादशाहः तस्योभयथा प्रवृत्तिरैककर्म्यात् ॥

(मू) अस्ति द्वादशाहोऽहर्गणः प्रायणीयोऽतिरात्रः पृष्ठ्यः षडहः त्रयश्छन्दोमा अविवाक्यमहः उदयनीयोऽतिरात्र इति । सोऽहीनसत्रोभयात्मा, अहर्गणेषु च द्वादशाहविध्यन्त इत्युक्तम् । द्विविधाश्चाहर्गणाः अहीना सत्राणि चेति । तत्र संशयः - किमहीनेषु सत्रेषु चाहीनस्य सत्रस्य च द्वादशाहस्यानियमेन प्रवृत्तिरुताहीनेष्वहीनस्य द्वादशाहस्य सत्रेषु सत्रस्य द्वादशाहस्येति व्यवस्थया प्रवृत्तिरिति । तत्र विशेषाभावादनियमेन प्रवृत्तिरिति प्राप्ते -

ब्रूमः। अहीनस्य सत्रत्वस्य च सादृश्यविशेषस्य सत्वात् व्यवस्थया प्रवृत्तिरिति, अहीनत्वसामान्यात् अहीनेष्वहीनद्वादशाहस्य विध्यन्तसत्रत्व-सामान्यात् सत्रेषु सत्रात्मकद्वादशाहस्य विध्यन्त इति विवेकः ॥

(टि) इदानीं द्वादशाहविकारेषु विशेष उच्यते - अस्तीत्यादिना ॥

## ॥ पञ्चदशरात्रादिषु सत्रधर्मातिदेशाधिकरणम् ॥

## सू. अन्यतरतोऽतिरात्रत्वात् पञ्चदशरात्रस्याहीनत्वं कुण्डपायिनामयनस्य च तद्भूतेष्वहीनस्य दर्शनात् ॥

(मू) पञ्चदशरात्रः श्रूयते - "त्रिवृदग्निष्टुदग्निष्टोमः त्रिरात्रः दशरात्रः उदयनीयोऽतिरात्र" इति । कुण्डपायिनामयनमपि "मासमग्निहोत्रं जुहोती"त्यारभ्य यावद्दशरात्रे महाप्रलय उदयनीयोऽतिरात्र "इति श्रुतम् । तयोः पञ्चदशरात्रकुण्डपायिनामयनयोरादाव .... नास्ति अन्ते त्वस्ति, अतोऽनयोरन्यतरोऽतिरात्रत्वरूपमहीनलक्षणमस्ति । तथा च श्रूयते" यद्यन्यतरातिरात्रः तेन .... ति। यस्मादादावन्ततो .... तिरात्रः विहीन इत्यर्थः । अहर्गणेषु यजतिचोदनत्वमहीनलक्षणं, आसनोपायि .... त्वं सत्रलक्षणं, आसत आसीरन्नित्यादिचोदिताः आसनचोदिता, उपेयुरिति चोदिता उपायिचोदना। एवं स्थिते पञ्चदशरात्रकुण्डपायिनामयनयोः संशयः - किमनयोरहीनत्वलिङ्गस्यान्यतोऽतिरात्रस्य बलवत्वादहीनत्वं ततश्चाहीनविकारत्वमुत, वचनस्यान्यतरतोऽतिरात्रत्वस्याहीनलक्षणत्वे तात्पर्याभावाद् इत्थं, कामामिच्छन्ति त एनं पञ्चदशरात्रमुपेयुः, भूतिकामा उपेयुरिति उपायिचोदनत्वस्य अप्रसिद्धस्य सत्रलक्षणस्य सत्वात् सत्रत्वम् । तत्र सत्रविकारत्वमिति । तत्र शास्त्रत्वादहीनलिङ्गस्य बलवत्वादहीनवच्चम् । ततश्चाहीनविकारत्वमिति प्राप्ते -

ब्रूमः। वचनस्य स्तुत्यर्थत्वादहीनलक्षणत्वे तात्पर्याभावाय चोदनत्वसत्वात् सत्रत्वं । तत सत्रविकार इति । अत्रायं विवेकः - द्विरात्रादयः एकादशरात्रपर्यन्ताः अहीनाः, द्वादशाहोऽहीनः सत्रा च त्रयोदशरात्रादीनि सत्राणीति ॥

॥ इति अष्टमाध्यायस्य द्वितीयः पादः ॥

(टि) इदानीं सत्राहीनौ विचिन्त्येते पञ्चदशेत्यादिना ।

॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥

॥ अष्टमस्याध्यायस्य ॥

॥ द्वितीयः पादः ॥

✤ ✤ ✤

TAMIL NADU STATE DEPARTMENT OF ARCHAEOLOGY
LIBRARY
MADRAS-28.

## ॥ अथ अष्टमाध्यायस्य तृतीयः पादः ॥

### ॥ शुचिदेवक आग्नेयस्य, आग्नावैष्णवे चाग्नीषोमीयस्य धर्मातिदेशाधिकरणम् ॥

### सू. हविर्गणे परमुत्तरस्य देशसामान्यात् ॥

(भू) हविर्गणः श्रूयते - "अग्नये पावकायाग्नये शुचये अष्टाकपालं निर्वपेदि"ति, तथाग नावैष्णवमेकादशकपालं निर्वपेत् सरस्वत्यै चरुं बार्हस्पत्यं चरुमि"ति, तथा"ग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन् सरस्वतीमाज्येन यजेत बार्हस्पत्यश्च"रुरिति । प्रकृतौ चाग्नेयः प्रथमः, उपांशुयाजो द्वितीयः, अग्नीषोमीयः तृतीयः । तत्राग्नीषोमीयस्य तृतीयत्वं औषध द्रव्ययोः द्वितीयत्वं चेति । एवं स्थिते शुचिदेवत्यबार्हस्पत्ययोराग्नावैष्णवे च संशयः - किं गणत्वसामान्यात् स्वगणविकारत्वे क्रमदेवतासामान्ययोस्तुल्यबलत्वादनियमः उत क्रमसामान्यस्य बलवत्वेन द्वितीयत्वरूपक्रमसामान्यात् द्वितीयः, शुचिदेवत्ययोरोषधद्रव्यकयोः द्वितीयस्याग्नीषोमीयस्य विकारः तृतीयत्वरूपक्रमसामान्यात् तृतीयो बार्हस्पत्यः तृतीयस्याग्नीषोमीयस्य विकारः प्राथम्यरूपः क्रमः सामान्यात् प्रथमः आग्नावैष्णवः प्रथमस्याग्नेयस्य विकारः, अथवा देवतासामान्यस्य बलवत्तरत्वेन गणत्वसामान्यात् गणत्व .... एकदेवत्यत्वरूपदेवतासामान्यात् शुचिदेवत्यो बार्हस्पत्यश्चैकदैवत्यः एकदेवत्यस्याग्नेयस्य विकारात् द्विदेवत्यत्वरूपदेवता (सामान्यात्) वा द्विदेवत्य आग्नावैष्णवो द्विदेवत्यस्याग्नीषोमीयस्य विकार इति । तत्र प्रमाणत्वाविशेषात् बलवत्वेन क्रमसामान्यात् शुचिदेवत्यो बार्हस्पत्यश्चाग्नीषोमीयविकारः आग्नावैष्णवश्चाग्नेयस्येति, एवं प्राप्ते,

ब्रूमः। देवतायां शाब्दत्वादशाब्दगणक्रमसम्बन्धिसा ... श्शाब्ददेवतासामान्यस्य बलवत्तरत्वेन गणत्वसामान्यात् गणस्य गणविकारत्वं, किं तु देवतासामान्यात् शुचिदेवत्यो बार्हस्पत्यश्चैकदेवत्यः आग्नेयस्यैकदेवत्यस्य विकारः, द्विदेवत्य आग्नावैष्णवश्च द्विदेवत्यस्याग्नीषोमीयस्य विकार इति ।

इदं त्ववधेयम् - सारस्वते चरावपि क्रमादाज्यधर्माः श्रौतहविस्सामान्यादौषधधर्मा इत्यपि सिद्धमिति ॥

(टि) ॥ श्रीः ॥

## ॥ अथाष्टमस्य तृतीयः पादः ॥

इदानीं बलाबलचिन्ता । तत्र किं प्रथमस्याग्नेयविध्यन्तः तृतीयस्याग्नीषोमीयविध्यन्त उत विपरीतमित्यधिकरणशरीरम् । तदर्थं च किं देवतासामान्याद्गणत्वसामान्यं क्रमसामान्यं च बलवदुत विपरीतमिति विचारणीयम् । तत्र गणस्य गणविकारत्वे सत्येव क्रमसामान्यप्राप्तिरिति गणत्वसामान्यबलाबलविचारः क्रमसामान्यबलाबलविचारार्थ इति बोध्यम् । शाब्दत्वादिति । अयं भावः - देवता सामान्यमुत्पत्तिवेलायामेव शीघ्रं गम्यत इति बलवद् गणस्य प्रचयावगम्यत्वात् दुर्बलक्रमसामान्यस्य चाशाब्दत्वादन्यापेक्षत्वाच्च दुर्बलत्वमिति ॥

### ॥ जनकसप्तरात्रे त्रिवृत्स्वहस्सु द्वादशाह - धर्मातिदेशाधिकरणम् ॥

सू. गणेचोदनायां यस्य लिङ्गं तदावृत्तिः प्रतीयेताग्नेयवत् ॥

(मू) जनकसप्तरात्रे श्रूयते "चत्वारि त्रिवृन्त्यहानि अग्निष्टोममुखानी"ति चत्वारि त्रिवृन्त्यहानि भवन्ती"ति । तथान्यत्र श्रूयते "नव त्रिवृन्त्यहानि भवन्ती"ति । तत्र संशयः, किं यथाग्नेयविध्यन्तस्य देवतासामान्यात् पावकदेवत्ये शुचिदेवत्ये चावृत्तिः, तथात्र चतुर्षु नवसु त्रिवृत्सु त्रिवृत्वसामान्यात् पार्ष्टिकस्य प्रथमस्य त्रिवृतो होमान्तस्यावृत्तिः अथवा त्रिवृत्त्वसामान्यतः सङ्घातसामान्यस्य बलवत्त्वात् सङ्घातसामान्यात् क्रतुषु नवसु च क्रमेण पाष्टिकानामाद्यानां चतुर्णां पृष्ठ्यच्छन्दोमानां च विध्यन्तः पञ्चदशत्वादयश्च तेषां त्रिवृत्वेन वचनात् साध्यन्त इति । तत्र पूर्ववत् सङ्घातत्वसामान्यस्य दुर्बलत्वात् त्रिवृत्त्वसामान्याच्चतुर्षु नवसु च पार्ष्ठिकस्य प्रथमस्य विध्यन्तस्यावृत्तिरिति प्राप्ते,

ब्रूमः । सहचोदितेषु सङ्घातत्वस्य शाब्दत्वात् प्रधानगतसङ्घातसामान्यस्याङ्गभूतस्तोत्रीयगतत्रिवृत्त्वसामान्यतो बलवत्त्वात् चतुर्षु नवसु च क्रमेण पृष्ठाद्यानां चतुर्णां पृष्ठ्यच्छन्दोमानां च विध्यन्तः पञ्चदशत्वादयश्च त्रिवृत्त्वेन वचनाद्बाध्यन्त इति पूर्वत्र गणत्वमशाब्दं इह तु शाब्दमिति विवेकः ॥

(टि) पूर्वापवाद इदानीं क्रियते । ननु त्रिवृत्त्वमपि शाब्दं तत्र किं विनिगमकमित्यत्राह - अङ्गभूतेति । विध्यन्त इति । एवं च अग्निष्टोममुखानीत्येष वादो युज्यते अन्यथाद्यस्याग्निष्टोमत्वात् सर्वेषामग्निष्टोमत्वं स्यादित्यग्निष्टोममुखानीति नोपपद्यत इति ॥

## ॥ षट्त्रिंशद्रात्रे षडहधर्मातिदेशाधिकरणम् ॥

## सू. कालाभ्यासेऽपि बादरिः कर्मभेदात् ॥

(मू) षट्त्रिंशद्रात्रे शूयते "षडहा भवन्ति चत्वरो भवन्ती"ति तथा "पञ्चाहा

भवन्ति पञ्च भवन्ती"ति । तत्र संशयः किं चत्वारः षडहा इति चोदितानां चतुर्विंशतिसङ्ख्याकैकगुणत्वात् सामान्यद्वादशाहिकस्य दशरात्रस्य चतुर्विंशत्यामहस्सु प्रवृत्तिरुत "षडहश्चत्वार" इति षट्सङ्ख्याकाश्चत्वारो गणाः, ततश्च अवान्तरषडहत्वरूपसामान्यात् पार्ष्ठिकस्याभिप्लविकस्य वा षडहविध्यन्तस्य चतुरावृत्तिरिति ।

तत्र "चत्वारः षडहा" इत्यनेन गणस्य चतुर्विंशतिसङ्ख्यात्वप्रतीतेः एकगणत्वाद्द्वादशाहिकस्य दशरात्रस्य चतुर्विंशत्यामहस्सु प्रवृत्तिरिति प्राप्ते-

ब्रूमः। आनुमानिकचतुर्विंशतिसङ्ख्यातः प्रत्यक्षषट्सङ्ख्याकस्य षडहत्वसामान्यस्य बलवत्त्वात् षडहत्वसामान्यात् प्रसिद्धस्य पार्ष्ठिकस्याभिप्लविकस्य वा विध्यन्तस्य चतुरावृत्तिरिति ॥

(टि) बलवत्त्वादिति । षडहविध्यन्तः शीघ्रमवगम्यते । तेन च निराकाङ्क्षः प्रयोगवचन इति ॥

## ॥ संस्थाशब्देषु द्वादशाहिधर्मातिदेशाधिकरणम् ॥

## सू. संस्थागणेषु तदभ्यासः प्रतीयते कृतलक्षणग्रहणात् ॥

(मू) "पञ्चाग्निष्टोमः पञ्चोक्थ्यः शतोक्थ्यः शतातिरात्रं भवती"त्येवमादयः सन्ति संस्थागणाः । तत्र सांशयः - किमत्र नाम्ना ज्योतिष्टोमिकस्य विध्यन्तस्यावृत्तिरुत सङ्घत्वसामा [न्यात् द्वादशा] हिकविध्यन्त इति । पूर्वपक्षे ज्योतिष्टोमानुवादेन चतुराद्यभ्यासविधिः सिद्धान्ते संस्थाविशिष्टगणचोदनेति विवेकः ।

(टि) इदानीं संस्थागणे चिन्ता । ज्योतिष्टोमानुवादेनेति । उक्थ्यादिशब्दानां ज्योतिष्टोमनामत्वाद्दूरस्थमपि तमनूद्य शताभ्यासादिरूपो गुणो विधीयत इत्यभिप्रायः ॥

## ॥ शतोक्थ्यादौ ज्योतिष्टोमात् स्तोत्रोपचयाधिकरणम् ॥

### सू. गुणादुपचयस्तत्प्रकृतित्वात् ॥

(मू) "शतोक्थ्यं भवति शतातिशत्रं भवती"ति श्रूयते । तत्र द्वादशाहिकस्य दशरात्रस्य प्रवृत्तिरित्युक्तम् । तत्र दशकृत्वः प्रवर्तते । तस्य च दशरात्रस्याभितो द्वावग्निष्टोमौ । तयोरुक्थ्यसंस्थत्वमतिरात्रसंस्थत्वं च सम्पादयितुमुक्थ्यस्तोत्राणां रात्रिपर्यायस्तोत्राणां चागमः कर्तव्यः । तेषु आगम्यमानेषु संशयः - किं द्वादशाहिकान्युक्थ्यस्तोत्राणि रात्रिपर्यायस्तोत्राण्यागमयितव्यानि किं वा ज्यौतिष्टोमिकानीति । तत्र गणस्य द्वादशाहिकविकारत्वात् द्वादशाहिकान्यागमयितव्यानीति प्राप्ते -

ब्रूमः। उक्थ्यादिस्तोत्राणां ज्योतिष्टोम उत्पन्नत्वात् ज्यौतिष्टोमान्येवागमयितव्यानीति ।

अत्रायं लौकिको न्यायः - न ह्याढ्ये वदान्यप्रेष्ठेऽर्थिने तिष्ठमाने क्षुत्क्षामेण भिक्षुणा अन्यो भिक्षुः भिक्षां याचयितव्य इति ॥

(टि) इदानीं स्तोमवृद्धौ चिन्त्यते - द्वादशाहिकानीति । तेषु हि केचिद्विशेषाः प्रकृतीभ्यः स्तोमेभ्यो विद्यन्त इति संशय इति । वदान्यप्रष्ठ इति । प्रष्ठोऽग्रगामी अग्रगण्य इत्यर्थः । प्रष्ठोऽग्रगामिनीति निपातनात् साधुः । अर्थिन इति । श्लाघह्नुङ्स्थाशपां ज्ञीप्सभान इति सम्प्रदानत्वम् । तिष्ठमान इति । प्रकाशनस्थेयाख्ययोश्चेत्यात्मनेपदम् । याचयितव्य इति । अर्हेकृत्यतृचश्चेत्यर्हार्थे कृत्यः । स चाप्रधाने दुहादीनामित्यप्रधानकर्मणीति ॥

## ॥ गायत्रीषूत्पत्तिगायत्रीणामतिदेशाधिकरणम् ॥

सू. गायत्रीषु प्राकृतीनामवच्छेदः प्रवृत्त्यधि - कारात्, संख्यात्वादग्निष्टोमवत् अन्यति - रेकात्तदाख्यत्वम् ॥

(मू) इदं श्रूयते "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेते"ति । तत्र बृहस्पतिसवे प्रकृतितो गायत्रीत्रिष्टुबादिषु नानाछन्दस्सु प्राप्तेषु "गायत्रमेतदहर्भवती"ति नियम्यते । तत्र संशयः - किं प्राप्तेषु त्रिष्टुबादिषु अक्षरलोपं कृत्वा गायत्री सम्पाद्या किं वा दाशतयीभ्य उत्पत्तिगायत्र्य आम्नातव्या इति । तत्र गायत्रीशब्दस्य चतुर्विंशतिसङ्ख्यावाचित्वात् अक्षरलोपं कृत्वा गायत्री सम्पाद्येति प्राप्ते -

ब्रूमः। गायत्रीशब्दस्य अष्टाक्षरैः त्रिभिः पादैः युक्ता या ऋक् तद्वाचकत्वात् आ [दा] शतयीभ्या आनेतव्या इति । अत्रेदमवधेयम् - पूर्वाधिकरण उपचयश्चिन्तितः अत्रापचय इति ॥

॥ इति अष्टमाध्यायस्य तृतीयः पादः ॥

(टि) एवमुपचयं चिन्तयित्वाधुनापचयश्चिन्त्यते । गायत्रीशब्दस्य सङ्ख्यामात्राभिधायित्वे सर्वत्रमन्त्रान्तरे घटादौ च गायत्रीशब्दप्रसङ्गः स्यादित्याश येनाह - गायत्रीशब्दस्याष्टाक्षरैरिति ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥

॥ अष्टमाध्यायस्य ॥

॥ तृतीयः पादः ॥

✣ ✣ ✣

॥ श्रीः ॥

## ॥ अथाष्टमाध्यायस्य चतुर्थः पादः ॥

### ॥ दर्विहोमस्य लौकिकवैदिकोभयकर्मनामधेयताधिकरणम् ॥

सू. स लौकिकानां स्यात् कर्तुस्तदाख्यत्वात् ॥

(मू) "यदत्न्या जुहयात्तद्दर्विहोमं जुहुयादि"ति । तत्र संशयः - किं गुणविधिरुत दर्वीहोमशब्दस्य कर्मनामधेयमिति । दर्विहोमशब्दस्य होमशब्दवाच्योत्तरपदार्थभूतकर्मप्रधानत्वात् कर्मनामधेयं दर्वीहोमशब्द इति ॥

(टि) ॥ श्रीः ॥

## ॥ अथाष्टमस्य चतुर्थः पादः ॥

एवं त्रिविधेनातिदेशेनाविहितेतिकर्तव्यताकेषु कर्मस्वितिकर्तव्यताप्राप्तिमुक्त्वा इदानीमपवादः क्रियते दर्वीहोमेषु नास्त्यतिदे[श] इति । तत्प्रसङ्गाच्च गुणविधि नामधेयादिविचारः । तत्र सिद्धान्तैकदेशेनोपक्रमते दर्वीहोमेत्यादिना ॥

### ॥ दर्विहोमस्य लौकिकवैदिकोभयकर्मनामधेयताधिकरणम् ॥

सू. स लौकिकानां स्यात् कर्तुस्तदाख्यत्वात् ॥

(मू) अत्रान्तराचिन्ता - यद्दर्विहोमशब्दो लौकिकानामेव नामधेयं उत वैदिकानामपीति । तत्र लौकिकस्थालीपाकादीनां कर्तरि होमिकशब्दप्रयोगात् लौकिकानामेवेति प्राप्ते -

ब्रूमः । वैदिकवास्तुहोमे दर्वीहोमशब्दप्र[योगदर्शना]त् वैदिकानामपि नामधेयं दर्विहोमशब्द इति ॥

(टि) अन्तराचिन्तात्वमुत्तरयोर्दर्शयितुमेवमुपक्रान्तमिति ॥

## ॥ दर्विहोमशब्दस्य होमनामधेयताधिकरणम् ॥

### सू. जुहोतिचोदनायां वा तत्संयोगात् ॥

(मू) तत्र संशयः किं यजतिचोदितानां जुहोतिचोदितानां नामधेयं दर्विहोमशब्द उत जुहोतिचोदितानामेवेति ।

तत्र होमत्वाविशेषात् यजतिचोदितानां जुहोतिचोदितानां च नामधेयं दर्वीहोमशब्द इति प्राप्ते -

ब्रूमः । होमशब्दसम्बन्धात् जुहोतिचोदितानां अग्निहोत्रादिवैदिकानां पार्वणस्थालीपाकादिलौकिकानां च नामधेयं दर्विहोमशब्द इति ।

स्थितादुत्तरं "यदेकया ... दर्विरूपगुणविधिः लौकिकवैदिकानां होमानां ... च न वचनान्तरैर्होमसम्पन्नस्य प्राप्तत्वादि"ति । तस्मादग्निहोत्रादीना-मिष्टकादीनां च होमानां नामधेयमेव दर्विहोमशब्द इति स्थितम् । एकं वेदमधिकरणम् ॥

(टि) अत इति । गुणविधानासम्भवात् तत्प्रख्यन्यायाच्चेत्यर्थः ॥

## ॥ दर्विहोमशब्दस्यापूर्वताधिकरणम् ॥

### सू. तस्मिन् सोमः प्रवर्तेताव्यक्तत्वात् ॥

(मू) दर्विहोमेषु संशयः - दर्विहोमः अविहितेऽपि कर्तव्यत्वात् अविहितेतिकर्तव्यताकत्वात् पूर्वपर्यन्तविकाराः । तेषु च सौमिकविध्यन्त उता पूर्वा अविकारा इति ।

तत्राविहितेतिकर्तव्यतात्वात् पूर्वपर्यन्तेषु अव्यक्तत्वात् सौमिको विध्यन्त इति प्राप्ते -

ब्रूमः। स्वाहाकाराम्नानादिसामर्थ्यात् कुतश्चिदपि विध्यन्ताप्राप्तेः अपूर्वा दर्विहोमा इति ।

अत्र दर्विहोमानामग्निहोत्रादित्रिकारत्वं नारिष्टविकारत्वं पत्नीसंयाजविकारत्वं पिष्टलेपफलीकरणहोमविकारत्वमिति पूर्वपक्षा आकरे स्थिताः । शास्त्रभृतामुद्वाहकर्मसु वचनादतिदेशः, असति वचने त्वपूर्वा दर्विहोमा इति चाकरे स्थितमिति

॥ इति अष्टमाध्यायस्य चतुर्थः पादः ॥

॥ अध्यायश्च समाप्तः ॥

(टि) प्रासङ्गिकं समाप्यापवाद आरभ्यते । तत्र किं पूर्ववन्त उतापूर्वा इत्येतावदधिकरणशरीरम् । अपूर्वा दर्विहोमा इति । नन्वविहितेतिकर्तव्यताकेषु दर्विहोमेषु कुतश्चिदपीतिकर्तव्यता न प्राप्स्यतीति चेत् साकाङ्क्षत्वादप्रमाणं स्यात् दर्विहोमविधिवाक्यमिति चेदुच्यते । करणविषयककर्तृव्यापारविशेष एव हीतिकर्तव्यता । सा च उपदेशातिदेशान्यतरात्मकशास्त्रेण वा प्रमाणान्तरेण वावगम्यते चेन्निराकाङ्क्षं विधिवाक्यं तत्र यद्यपि शास्त्रान्नावगम्यते तथापि अनुत्पन्नस्य करणस्य असाधनत्वादुत्पादनं तावद्व्यापारोऽर्थापत्तिप्रमाणेनावगम्यते । तेन द्रव्यदेवतोत्पादनमेवेतिकर्तव्यता भविष्यतीति निराकाङ्क्षमिति तद्वाक्यं प्रमाणमेवेति ॥

॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥

॥ अष्टमस्याध्यायस्य चतुर्थः पादः ॥

॥ समाप्तश्चाध्यायः ॥

✤ ✤ ✤

॥ श्रीः ॥

## (मू) ॥ अथ नवमाध्यायस्य प्रथमः पादः ॥

### ॥ अग्निहोत्रादिषूक्तानां धर्माणामपूर्वप्रयुक्तत्वाधिकरणम्

सू. यज्ञकर्म प्रधानं, तद्धि चोदनाभूतम्, तस्य द्रव्येषु संस्कारास्तत्प्रयुक्तस्तदर्थत्वात् ॥

अग्निहोत्रे दर्शपूर्णमासयोः ज्योतिष्टोमे च दोहनादयोऽवघातादयोऽभिषवादश्च पृथक् धर्मा आम्नाताः । तत्र संशयः - किमेते धर्मा यजिप्रयुक्ताः । ततश्च प्रकरणपठिते मन्त्रादीनामपि सर्वत्रोपदिष्टत्वान्मन्त्रादीनामन्यथाकर्तुमशक्यादूहासिद्धेः इदं नवममूहलक्षणं नारब्धव्यम् अथवापूर्वप्रयुक्ताः, ततश्च प्रयोजनवशेनातिदिष्टानां देवताप्रकाशप्रयोजकानां मन्त्रादीनां देवतादिभेदवशादूहसिद्धेः ऊहलक्षणमारब्धव्यमिति । तत्र यज्युद्देशेन धर्मविधानात् यजिप्रयुक्ताः । ततश्च सर्वत्रोपदिष्टत्वात् प्रकरणपठितमन्त्रादीनामपि सर्वत्रोपदिष्टत्वात् अन्यथाकर्तुमशक्यत्वादूहासिद्धेरूहलक्षणमिदमारब्धव्यमिति प्राप्ते -

कथम्भावापेक्षिप्रकृतापूर्वभावनार्थत्वेन विधानादपूर्वप्रयुक्ताः । ततश्च प्रयोजनवशेनातिदिष्टानां देवताप्रकाशनादिप्रयोजनान्तानां मन्त्रादीनां .... दिभेदवशादूहसिद्धेरूहलक्षणमारब्धव्यमिति । धर्माणां अपूर्वप्रयुक्तत्वं सप्तमाद्ये उक्तमपि ऊहसिद्ध्यर्थमिदं .... रितमिति बोध्यम् । ऊहो नामेहान्यथाभावात्मकः । स चातिदिष्टानां पदार्थानां मन्त्रसामसंस्कारेषु द्वारान्तरसम्बन्ध निमित्तकः स च मन्त्रसामसंस्काररूपविषयभेदात् त्रिविध इत्युच्यते ।

अथवा सप्तमाद्ये प्रयोजनाभावादविचारितनिर्णीतमेवात्रापूर्वप्रयुक्तत्वं

विचार्य किं धर्माणापूर्वप्रयुक्तत्वं द्वेधा धर्मिस्वरूपविषयविशिष्टापूर्वसाधनस्वरूपद्वारा केवलापूर्वसाधनत्वरूपद्वारा चेति । तत्रावघातादिसंस्काराणां यदि व्रीह्यादिस्वरूपद्वारापूर्वप्रयुक्तत्वं तदा नीवारादिषु द्वाराभावादप्राप्तेः नोहसिद्धिः । अथापूर्वसाधनस्वरूपद्वारा तेषां अपूर्वप्रयुक्तत्वं तथा नीवारादिष्वपि अपूर्वसाधनत्वरूपद्वारसम्भवात् अवघातप्राप्तावूहसिद्धिरिति द्वारगतप्रयुक्तिविशेषोऽत्र चिन्त्यते । स चातिदेशेऽनुपयोगीति सप्तमाद्ये न चिन्तितः । एवं मन्त्राणामपि यदि अग्न्यादिस्वरूपद्वारापूर्वप्रयुक्तत्वं तदा सौर्ये द्वाराभावादप्राप्तेरूहासिद्धिः । अथ देवतास्वरूपद्वारा तदा सौर्येऽपि सत्वात् मन्त्रप्राप्तावूहः सिध्यतीति । तदयमत्र संशयः - किं अवघातादिसंस्काराणां "अग्नये जुष्टमि"त्यादिमन्त्राणां च विवक्षितव्रीह्यादिस्वरूपद्वारा विवक्षिताग्न्यादिस्वरूपद्वारा चापूर्वत्वादपूर्वप्रयुक्तत्वं ततः नीवारादिषु सौर्यादिषु चाप्राप्तत्वादूहासिद्धेरूहलक्षणं नारम्भणीयं अथवा विवक्षित व्रीह्यादिस्वसाधनविशेषमात्रद्वारा अविवक्षिताग्न्यादिस्वरूपमेव देवताविशेषरूपमात्रद्वारा चापूर्वार्थादपूर्वप्रयुक्तत्वं, तथा नीवारादिषु सौर्यादिषु च द्वारसम्भवादवघातादीनां प्राप्तिसम्भवादूहसिद्धेरारम्भणी-यमूहलक्षणमिति । तत्र व्रीह्यादीनामग्न्यादीनां च श्रुतानां स्वरूपाविवक्षाकारणाभावात् विवक्षितत्वात् विवक्षितस्वरूपद्वारापूर्वार्थत्वात् अपूर्वप्रयुक्तत्वम् । ततो नीवारादिषु सौर्यादिषु च द्वारासत्वादप्राप्तत्वा-दूहा[illegible]नारम्भणीय-मूहलक्षणमिति प्राप्ते -

ब्रूमः । लाघवादविवक्षितव्रीह्यग्न्यादिस्वरूपाव[illegible]नविशेषदेवताविशेषरूपमात्रद्वारापूर्वार्थत्वादपूर्वप्रयुक्तत्वम् । ततो नीवारादिषु सौर्यादिषु च द्वारसत्वादवघातादीनां प्राप्तिसम्भवात् ऊहसिद्धेरूहलक्षणमारम्भणीयमिति ।

अथवा धर्माणामपूर्वनिमित्तकत्वेन अपूर्वार्थत्वेन चेति द्वेधापूर्वप्रयुक्तत्वं सम्भवति। तथा यजतिप्रयुक्तत्वमपि यजिनिमित्तकत्वेन यज्यर्थत्वेन चेति द्वेधा सम्भवति । तत्र प्रकृतापूर्वप्रयुक्तत्वमात्रेण व्यवस्थासिद्धेरतिदेशः सिध्यतीति तावन्मात्रं सप्तमाद्येऽपि चिन्तितम् । न तु किमपूर्वनिमित्तकत्वेनापूर्वप्रयुक्तत्वमुतापूर्वार्थत्वेनेति विशेषश्चिन्तितः प्रयोजनाभावादिह सिध्यर्थं स विशेषश्चिन्त्यते । तत्र संशयः - किं धर्माणामपूर्वनिमित्तकत्वेनापूर्वप्रयुक्तत्वं यागस्वरूपार्थत्वं च तावता अवघातादिसंस्काराणां "अग्नये जुष्टमि"ति मन्त्राणां च तद्वदेव व्रीह्यादिस्वरूपार्थत्वमग्न्यादिस्वरूपार्थत्वं चेति नीवारादिषु व्रीह्यादिस्वरूपाभावात् सौर्यादिषु अग्न्यादिस्वरूपाभावात्तदप्राप्तेरूहासिद्धेः ऊहलक्षणं नारम्भणीयम्।

अथवाधर्माणामपूर्वार्थत्वेनापूर्वप्रयुक्तत्वं ततश्चावघातादिसंस्काराणामग्नय इत्यादिमन्त्राणामपि तद्वदेवापूर्वार्थत्वेन अपूर्वप्रयुक्तत्वमिति नीवारादिषु सौर्यादिषु चापूर्वस्य सत्वादवघातादीनां मन्त्राणां च प्राप्तिसम्भवादूहसिद्धेरारम्भणीयमूहलक्षणमिति ।

तत्र यागं कुर्यादिति विधिवाक्ये प्रधानभूतयागोद्देशेन धर्मविधानात् यार्वास्वरूपार्थत्वं ततश्चावघातादीनामपि तद्वत् व्रीह्यादिस्वरूपार्थत्वमिति नीवारादिषु व्रीह्यादिस्वरूपाभावात् अवघाताद्यप्राप्तेरूहासिद्धेः नारम्भणीयमूहलक्षणमिति प्राप्ते -

ब्रूमः। "यागेनापूर्वं कुर्या"दिति वाक्यार्थे प्रधानभूतप्रकृतापूर्वोद्देशेन धर्मविधानादपूर्वार्थत्वेन धर्माणामपूर्वप्रयुक्तत्वं, ततश्चावघातादीनामपि तद्वदेव अपूर्वार्थत्वेनापूर्वप्रयुक्तत्वमिति नीवारादिष्वपूर्वसत्वादवघातादीनां प्राप्तिसम्भवादूहसिद्धेरारम्भणीयमूहलक्षणमिति ।

अथवा आरादुपकारकाणामपूर्वप्रयुक्तत्वं सप्तमाद्ये प्रतिपादितम् । इहतु संनिपातिनामपूर्वप्रयुक्तत्वं प्रतिपाद्यते । तत्र संशयः - किं संनिपातिनामवघातादीनां व्रीह्याद्यर्थत्वं मन्त्राणां चाग्न्यादिस्वरूपप्रकाशनार्थत्वं, ततो नीवारादिषु सौर्यादिषु च व्रीह्याद्यग्न्याद्यभावात् तेषामवघातादीनां मन्त्राणां च प्राप्तेरूहासिद्धेः नारम्भणीयमूहलक्षणमुत व्रीह्यादिद्वारेण देवतास्वरूपप्रकाशनद्वारेण चापूर्वार्थत्वं, ततो नीवारादिषु सौर्यादिषु च अपूर्वसत्वादवघातादीनां मन्त्राणां च प्राप्तिसम्भवादूहसिद्धेः आरम्भणीयमूहलक्षणमिति ।

तत्रावघातादीनां मन्त्राणां च द्वितीयाश्रुत्यग्न्यादिशब्दमुख्यार्थत्व-रूपप्रमाणाभावात् व्रीह्याद्यर्थत्वं अग्न्यादिस्वरूपप्रकाशनार्थत्वं च । ततो नीवारादिषु सौर्यादिषु च व्रीह्यग्न्याद्यभावात् अवघातादीनां मन्त्राणां चाप्राप्तेः ऊहासिद्धेर्नारम्भणीयमूहलक्षणमिति प्राप्ते -

ब्रूमः । व्रीह्याद्यग्न्यादिस्वरूपमात्रार्थत्वे आनर्थक्यप्रसङ्गात् व्रीह्यादिद्वारेण देवतास्वरूपादिप्रकाशनद्वारेण चापूर्वार्थत्वम् । ततश्च नीवारादिषु सौर्यादिषु चापूर्वसत्वादवघातादीनां मन्त्राणां च प्राप्तिसम्भवादूहसिद्धेः - आरम्भणीयमूहलक्षणमिति ।

अथवा सप्तमान्त्ये धर्माणामपूर्वार्थत्वेनापूर्वप्रयुक्तत्वमुक्तम् । इह तु अपुर्वनिमित्तकत्वेनाप्यपूर्वार्थत्वप्रयुक्तत्वमुच्यते । तत्र संशयः - किमपूर्वार्थत्वेनापूर्वप्रयुक्त यजिर्निमित्तं ततश्चावघातादीनां मन्त्राणां च तत्तुल्यन्यायत्वाद् व्रीह्यादिस्वरूपमग्न्यादिस्वरूपं च निमित्तमिति नीवारादिषु सौर्यादिषु च निमित्ताभावादप्राप्तेरूहासिद्धेर्नारम्भणीयमूहलक्षणम् ।

अथवा धर्माणां निमित्तमप्यपूर्वमेव । ततश्चावघातादीनां मन्त्राणां च तत्तुल्यन्यायत्वादपूर्वमेव निमित्तमिति नीवारादिषु सौर्यादिषु च

निमित्तसत्वात् प्राप्तिसम्भवात् ऊहसिद्धेरारम्भणीयमूहलक्षणमिति । तत्र यागेनापूर्वं कुर्यादिति तत्र साध्यभूतस्यापूर्वस्य निमित्तत्वायुक्तत्वात् यजिरेव निमित्तम् । ततश्च अवघातादीनां तत्तुल्यन्यायत्वात् व्रीह्यादिस्वरूपादिकमेव निमित्तमिति नीवारादिषु निमित्ताभावात् अप्राप्तेरूहासिद्धेर्नारम्भणीय-मूहलक्षणमिति प्राप्ते -

ब्रूमः। यजेर्निमित्तवाचकशब्दाभावात् न यजिर्निमित्तं, किन्तु साध्यभूतमपूर्वमेवार्थिकनिमित्तमपि । ततश्चावघातादीनां च तत्तुल्यन्यायत्वादपूर्वत्वमेव निमित्तमपीति नीवारादिषु निमित्तसत्वात् प्राप्तिसम्भवात् ऊहसिद्धेर्नारम्भणीयमूहलक्षणमिति ॥

(टि) ॥ श्रीः ॥

## ॥ अथ नवमस्य प्रथमः पादः ॥

एवं सिद्धेऽतिदेशेऽधुना अतिदिष्टानां पदार्थानां मन्त्रसामसंस्काराणां द्वारान्तरसम्बन्धनिमित्तान्यथाभावात्मक ऊहश्चिन्त्यते । तत्रातिदेशाधीनत्वमेवोहस्य दर्शयितुं सप्तमाद्यसिद्धमेवापूर्वप्रयुक्तत्वं धर्माणां स्मारयितुमिदमारभ्यते । तदत्र यजिप्रयुक्ता धर्मा उतापूर्वप्रयुक्ता इत्यधिकरणशरीरम् । ततश्चेत्यादयः फलविचारत्वेनोपन्यस्ता इति पौनरुक्त्यमाशङ्क्याह - धर्माणामिति । ऊहस्वरूपं तत्त्रैविध्यं च दर्शयति ऊहो नामेत्यादिना ।

स्मरणार्थत्वेऽधिकरणस्य मन्दप्रयोजनत्वमित्यस्वरसाद्वर्णकान्तरमारभ्यते अथवेत्यादिना । सर्वथा तावदपूर्वसाधनविशेषत्वं देवतास्वरूपविशे-षत्वमवश्यमङ्गीकर्तव्यम् अन्यथानर्थक्यप्रसङ्गादित्याशयेन सिद्धान्तमाह लाघवादित्यादिना ।

द्वितीयमेव वर्णकमन्यथा वर्ण्यते - अथवेत्यादिना । विधिवाक्य इति । दर्शपूर्णमासाभ्यामित्यादिप्रयोगवाक्य इति वा प्रकरणानुमितवाक्य इति वार्थः । धर्मविधानादिति । यथा यागोद्देशेन धर्मविधानं तथा प्रतिपादितं सप्तमाद्य इति नात्र प्रतिपाद्यते एवमपूर्वोद्देशेन धर्मविधानमपि ।

द्वितीयवर्णकमेव पुनरप्यन्यथा वर्ण्यते - अथवेत्यादिना । सप्तमाद्ये प्रतिपादितमिति । तावतैवातिदेशसिद्धेरिति भावः । सन्निपातिनामपूर्वप्रयुक्तत्वे सत्येवोहसिद्धिरिति तदत्र विचार्यत इत्याशयेनाह - इहेति । द्वितीयाश्रुत्याग्न्यादिशब्देति । अयमाशयः - भवत्वारादुपकारणामपूर्वार्थत्वं प्रकरणात् , सन्निपातिनां तु द्वितीयाश्रुत्या लिङ्गेन च प्रकरणं बाधित्वा स्वरूपार्थत्वं स्यादिति ।

तृतीयं वर्णकमारभते अथवेत्यादिना । साध्यभूतस्येति । सिद्धं धर्मो हि निमित्तत्वमिति भावः। साध्यभूतमिति । साध्यं हि साधनानुष्ठाने अनिष्पन्नमपि साध्यतया मनसि विपरिवर्तमानमर्थान्निमित्तं भवत्येवेति भावः ।

## ॥ प्रोक्षणस्यापूर्वप्रयुक्तत्वाधिकरणम् ॥

### सू. संस्कारे युज्यमानानां तादर्थ्यात्तत्प्रयुक्तं स्यात् ॥

(मू) दर्शपूर्णमासयोः श्रूयते "प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति प्रोक्षिताभ्यां दृषदुपलाभ्यां पिनष्टी"ति । तत्र संशयः किमिदमुलूखलमुसलार्थं दृषदुपलार्थं च प्रोक्षणं उलूखलमुसलयोर्धर्मसाधनत्वं यच्च दृषदुपलयोः पिषिसाधनत्वं तदर्थं सत् हन्तिपिष्यर्थत्वात् हन्तिपिषिप्रयुक्तमुत प्रकरणात् यदुलूखलादीनां अपूर्वसाधनत्वं तदर्थं सदपूर्वार्थत्वादपूर्वप्रयुक्तमिति । तत्र पिषिसाधनभूतोलूखलमुसलदृषदुपलानुवादेन प्रोक्षिताभ्यामिति पदान्तरेण

तत्समानाधिकरणेन विधीयमानः प्रोक्षणं वाक्यात् प्रकरणं बाधित्वा हन्तिपिषिसाधनत्वार्थं सत् हन्तिपिष्यर्थत्वात् हन्तिपिषिप्रयुक्तमिति प्राप्ते-

ब्रूमः। अपूर्वार्थत्वाभावे प्रोक्षणस्यानर्थक्यप्रसङ्गात् प्रकरणादपूर्वसाधनत्वार्थं सत् अपूर्वार्थत्वादपूर्वप्रयुक्तमिति । यत्तु उलूखलमुसलयोः दृषदुपलयोश्च स्वरूपं तच्च यच्च हन्तिसाधनत्वं पिषिसाधनत्वं च तच्च विनापि प्रोक्षणेन सिध्यतीति तदर्थत्वे प्रोक्षणस्य वैयर्थ्यमिति अपूर्वसाधनत्वसम्पत्त्यर्थमेव प्रोक्षणमवसीयत इति नखेषु प्रोक्षणमूहितव्यमिति स्थितम् । तदयमत्र वाक्यार्थः हन्त्यादिना लक्षितलक्षणयापूर्वं लक्षयति उलूखलादिशब्देन च साधनम् । ततश्च येन व्यापारेण तण्डुलनिवृत्तिप्रणाड्यापूर्वं क्रियते तं व्यापारं प्रोक्षितेन साधनेन कुर्यादिति।

एवं वा । ज्योतिष्टोमे श्रूयते - "यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात् मन्द्रं प्रायणीयायां मन्द्रतरमातिथ्यायां उपांशूपसत्सु उच्चैरग्नीषोमीय" इति । तत्र संशयः - किमेते स्वरविशेषा ज्योतिष्टोमापूर्वप्रयुक्ता उत दीक्षणीयाद्यपूर्वप्रयुक्ता इति ।

तत्र परमापूर्वस्य ज्यौतिष्टोमिकस्यैव फलवत्त्वात् ज्योतिष्टोमापूर्वप्रयुक्ता इति प्राप्ते -

ब्रूमः। तथा सति दीक्षणीयादिशब्दानां लक्षितलक्षणा-प्रसङ्गाद्दीक्षणीयाद्यवान्तरापूर्वप्रयुक्ताः स्वरविशेषा इति । इदं त्ववधेयम् - दीक्षणीयादिशब्दैः स्वजन्यापूर्वं लक्षयित्वा पुनस्तज्जन्ये परमापूर्वे लक्षणा कल्प्येति लक्षितलक्षणा । सा चागतिकगतिः । इह च लक्षणामात्रेणार्थवत्वलाभात् सा नाश्रयणीयेति प्रोक्षणोत्पवनाद्यङ्गानां च तदपूर्वप्रयुक्तत्वमस्तीति सिद्धमिति ॥

(टि) एवं पूर्वाधिकरणे धर्मापूर्वाणामर्थत्वं सप्तमाद्यसिद्धं स्मारितम् । तत एव द्रव्यसंस्कारोऽप्यपूर्वप्रयुक्त इति संक्षेपेण प्रतिज्ञामात्रेण दर्शितम् । इदानीं तदेव श्रुत्यादिविरोधान्न सम्भवतीत्याशङ्क्य प्रतिपाद्यते त्रिभिरधिकरणैरूहोपाद्धातत्वेन । तत्रेह वाक्यसंयुक्तानामपूर्वार्थत्वं प्रतिपाद्यते । प्रोक्षितशब्दो हि विशेषणप्रधान इत्याशयेनाह - विधीयमानं प्रोक्षणमिति । यत्त्विति । उलूखलादिषु त्रीणि रूपाणि उलूखलत्वादिकं हन्त्यादिसाधनत्वमपूर्वसाधनत्वं चेति । तत्रापूर्वसाधनत्वनिष्पत्त्यर्थमेव प्रोक्षणमितरयोः प्रोक्षणं विनापि सिद्धेरित्यपूर्वप्रयुक्तत्वमित्यभिप्रायः ।

वर्णकान्तरं दर्शयति एवं वेत्यादिना । फलवत्वादिति । फलवच्छेषता युक्ता न तु निष्फलशेषता निष्फलत्वापत्तेरेवेति भावः । अवान्तरापूर्वेति । अयमाशयः - फलवत्परमापूर्वोपयोगित्वात् यजमानसंस्कारादिरूपं दीक्षणीयाद्यपूर्वं फलवदेवेति न तादर्थ्येऽप्यानर्थक्यम् । किञ्च दीक्षणीयादयो हि केनात्मना धर्मान् गृह्णन्तीत्यपेक्षायां स्वापूर्वसाधनत्वं शीघ्रमवगम्यते, तद्द्वारं तु परमापूर्वसाधनत्वं विलम्बितम् । तस्मात् अवान्तरापूर्वप्रयुक्ता एवंजातीयका इति । प्रोक्षणोत्पवनाद्यङ्गानामिति । येषां दृष्टोपकारेण परमापूर्वोपकारकत्वं तेषां न स्वापूर्वप्रयुक्तत्वं नीवारादिषु व्रीह्यादिकार्यापत्त्यैव धर्मप्राप्तेः, येषां त्वदृष्टोपकारेण परमापूर्वोपकारकत्वं तेषां स्वापूर्वप्रयुक्तत्वं न परमापूर्वप्रयुक्तत्वमित्यर्थः ॥

## ॥ फलदेवतासम्बद्धधर्माणामपि अपूर्वप्रयुक्तताधिकरणम् ॥

## सू. फलदेवतयोश्च ॥

(मू) दर्शपूर्णमासयोः फलसम्बद्धो मन्त्रः श्रूयते "अगन्मसुवस्सुवरगन्म संज्योतिषाभूव"मिति, तथा देवतासम्बद्धोऽपि "अग्नेरहमुज्जितिमनूज्जेषं सोमस्याहमुज्जितिमनूज्जेषं" इत्येवमादिः । तत्र संशयः - किं लिङ्गात्

स्वरूपप्रकाशनार्थत्वात् स्वर्गाग्न्यादिस्वरूपार्थत्वेन फलसम्बद्धो मन्त्रः स्वर्गस्वरूपप्रयुक्तः देवतासम्बन्धद्धश्चाग्न्यादिस्वरूपप्रयुक्तः उतोभावपूर्वप्रयुक्ताविति । तत्र लिङ्गात् स्वर्गादिस्वरूपप्रयुक्ताविति प्राप्ते-

ब्रूमः। पूर्ववदेव स्वरूपासत्वे वैयर्थ्यप्रसङ्गात् प्रकरणात् यद्दर्शपूर्णमासापूर्वसाध्यत्वं फलस्याग्न्यादेश्च तदीयदेवतास्वरूपत्वं तदर्थौ सन्तौ अपूर्वार्थावपूर्वप्रयुक्तौ चेति । ततश्च अगन्म ब्रह्मवर्चसं ब्रह्मवर्चसम गन्मेति सूर्यस्याहमुज्जितिमित्येवमूहितव्यमिति सिद्धम् ॥

(टि) एवं वाक्ययुक्तानामपूर्वप्रयुक्तत्वमुक्त्वेदानीं लिङ्गयुक्तानामपूर्वप्रयुक्तत्वमुच्यते - लिङ्गादिति । फलस्य सर्वस्मात् प्राधान्यात् देवतायाश्च फलदातृत्वेन प्रधान्याच्च फलदेवतार्थत्वं मन्त्रयोरिति च द्रष्टव्यमिति । वैयर्थ्यप्रसङ्गादिति । नहि मन्त्रेण प्रकाशितमात्रेण देवतायाः फलदातृत्वेऽपि याचितमात्रेण च फलं सिध्यतीति प्रमाणमस्तीति भावः। यद्दर्शपूर्णमासेति क्रत्वनन्वययित्वेनैव प्रकाश्यत्वमङ्गीकर्तव्यं तस्मादेवं द्रष्टव्यम् । मन्त्रप्रकाशितफलदेवतः क्रतुः स्वापूर्वं साधयतीत्यभिप्रायः । पूर्ववर्णकापवादश्चायमिति द्रष्टव्यम् ।

## ॥ धर्माणामदेवताप्रयुक्तत्वाधिकरणम् ॥

## सू. देवता वा प्रयोजयेदतिथिवत् भोजनस्य तदर्थत्वात् ॥

(मू) अग्नेरहमित्यादिषु देवताप्रयुक्तत्वमित्युक्तम् । तत्र संशयः - किं यागो देवताराधनार्थः, सा चाराधितायाः फलमिति सर्वेषां धर्माणां देवता प्रयोजिका किं अपूर्वं द्वारकं यागस्य फलसाधनत्वं ततो धर्माणामपूर्वं प्रयोजकमिति । तत्र देवतायाः सम्प्रदानत्वात् पूजारूपो यागोऽतिथिभोजनादिवत् प्रधानभूतदेवताराधनार्थः । सा चाराधिता

आराधयित्रे फलं ददातीति सर्वेषां धर्माणां देवता प्रयोजिकेति प्राप्ते,

ब्रूमः । फलश्रुत्या यागस्य फलसाधनत्वावगमात् तदन्यथानुपपत्तिकल्पितापूर्वद्वारकमेव यागस्य फलसाधनत्वम् । नतु मन्त्रवर्णाद्यवगतदेवतातृप्तिद्वारकम् । ततो धर्माणामपूर्वमेव प्रयोजकमिति । अत्रेदं बोध्यम् - यागनिर्वृत्त्यर्था देवता न तु देवताराधनार्थो यागः । यद्यपि देवता विग्रहवती प्रतिगृह्यमुक्त्वा तृप्यति प्रसीदति च, तथापि ततो न फलं किन्तु यागादेव अन्यथा अचेतनौषधिवनस्पत्यादिदेवताकस्य निष्फलत्वापत्तेः । किञ्चैवमनेकोपप्लवापत्तिरिति यागादेव फलम् ।

वस्तुतस्तु इन्द्रादयः केचिद्विग्रहवन्तः सन्तु वा न वा सन्ति चेदपि न ते यागदेवताः नापि फलदातारः नापि तेभ्योऽपि दीयते नापि ते प्रतिगाह्य भुञ्जते तृप्यन्ति प्रसीदन्ति च किन्तु यज्येकदेशभूतोद्दे- शनिवृत्त्युपयोग्यं उद्देश्यदेवतामात्रं देवतायामिति ॥

(टि) एवं देवतायाः फलदातृत्वं प्रधान्यं चाङ्गीकृत्य न प्रयोजकत्वमित्युक्तम् । इदानीं तु न देवतायाः फलदायित्वं नापि प्राधान्यमिति प्रतिपाद्यते । सर्वपूर्वोक्ताक्षेपेण चेदमारभ्यते अपूर्वापह्नवादिति ।सर्वोपोद्धातत्वमप्यस्या- धिकरणस्येति द्रष्टव्यम् । सम्प्रदानत्वादिति । कर्मकारकं हि क्रिययेप्सिततमं क्रियां प्रति साधनं, तेनापि व्याप्यमानं सम्प्रदानं ततोऽपि प्रधानं भवति । किञ्च "कर्मणा यमभिप्रैति स सम्प्रदा"नमिति स्मृतौ कर्मणेति शेषविभक्त्या द्वितीयया निर्देशात् सम्प्रदानस्य शेषित्वं चावगम्यत इति सम्प्रदानस्य प्राधान्यम् । सम्प्रदानं च देवता । तस्मात् सा प्रधानमित्य- भिप्रायः । किञ्च "यजदेवपूजासङ्गतिकरणदानेष्वि"ति अभियुक्तप्रसिद्धिरपि अनुगृहीता भवतीत्याह पूजारूप इति । देवतापूजारूप इत्यर्थः । अपि चैवंलोकप्रसिद्धपदार्थस्वभावः अनतिक्रान्तो भवतीत्याह-सा चाराधितेति ।

सर्वेषामिति । अयमभिप्रायः - यद्यपि यागस्य फलसाधनत्वं श्रुत्यावगतं तथापि तस्य स्वरूपस्य भङ्गुरत्वादवश्यं तावत् केनचिद् द्वारेण फलसाधनत्वमाश्रयितव्यम् । तत्र रात्रिसत्रन्यायेन वाक्यशेषमन्त्रवर्णाद्यवगतदेवतातृप्तिरेव द्वारं कल्पयितुं युक्तं, न त्वत्यन्ताप्रणीतमपूर्वम् । श्रूयते हि वाक्यशेषे देवतातृप्तिः "तृप्तएवैनमिन्द्रः प्रजया पशुभिस्तर्पयती"ति, मन्त्रे च "दधत् पोषं रयिं मयीती"ति । पदश्रुत्येति । अयमाशयः,

यजेतेति प्रत्ययाभिहिता भावना प्रथमं भाव्यमपेक्ष्यमाणा अपुरुषार्थस्य यागस्य भाव्यत्वे पुरुषं प्रवर्तयितुमशक्नुवन्ती स्वपदगतमपि यागमयोग्यत्वादेवोपेक्ष्य वाक्यादुपनीतमपि स्वर्गादिकं योग्यत्वाद् गृहीत्वा पुनस्तस्य फलस्य साधनमाकाङ्क्षन्ती समानपदश्रुत्युपनीतं यागमविरोधात् करणं गृहीत्वा पुनः कथम्भावापेक्षायां द्रव्यदेवतमित्थम्भूतं असाधितस्य करणत्वासम्भवेनार्थाक्षिप्तभाव्ययागनिर्वर्तनसमर्थं यागनिर्वृत्त्यर्थत्वेन गृह्णन्ती देवतां यागार्थां करोतीति, एवं द्रव्यदेवतस्य यागार्थत्वेनान्वयानन्तरमेव यागस्य भङ्गुरत्वात् साधनत्वानुपपत्त्यवगतिः ततो द्वारकल्पनमिति कुतो यागशेषभूतदेवताप्रसादस्य द्वारत्वकल्पनमित्याशयेनाह - तदन्यथानुपपत्तीति । फलसाधनत्वं तच्छब्दार्थः । प्रत्यक्षविरुद्धश्च हविषोदेवतया भोग इति स न कल्पयितुं युक्तः । न चाभुञ्जाना प्रसीदतीत्यपि युक्तम् । अतो न देवतातृप्तिर्द्वारं कल्पयितुं युक्तमित्याह - नत्विति ।

यत्तु देवताया यागसाधनद्वारा फलनिर्वृत्युपयोगित्वं तदभिप्रायेण वाक्यशेषमन्त्रादय इति भावः । किञ्च नहि देवतायां फलदातृत्वं देवतात्वेन यागसम्बन्धात् प्राक् प्रमाणान्तरेणावगतं येन तदाराधनाय यागविधिः स्यात् । अपि च मन्त्रार्थवादेतिहासपुराणेष्वपि देवतानां क्रत्वनुष्ठानादिकं समीहितसिद्ध्यर्थमनुकीर्त्यते । तच्च न देवतायां फलदातृत्वे

यागस्य च तदाराधनार्थत्वेनोपपद्यते । तस्मादपि कर्मण एव फलमित्यवसीयते । अपि च गोमण्डूकादीनां तिरश्चामचेतनानामोषधि वनस्पत्यादीनां च देवतात्वेन होमेषु श्रूयमाणानां को नाम फलदायित्वं श्रद्दधीत । किञ्च यावकभोजनानशनादिभिः किमिति देवास्तृप्यन्ति किमिति वा सुरापानादिभिः क्रुध्यन्ति येनाभ्युदयं प्रत्यवायं च पत्युः कुर्वन्ति । अथैवमादिषु कर्मण एवापूर्वद्वारेण फलं तथा सर्वस्याप्यस्त्वैकरूप्यायेति । यत्त्वभियुक्तप्रसिद्ध्यनुग्रह इति तत्तुल्यम् । सङ्कतकरणं नामोद्देशत्याग इति । तस्मान्न देवताराधनार्थो यागः, न च देवता फलदायिनीति । ये तु मन्दधियः श्रद्धालवस्तात्पर्यमजानाना देवता फलदात्रीति ते भ्राम्यन्तु नाम । न तथा तत्वमिति दिक् ॥

## ॥ प्रोक्षणादीनां अपूर्वप्रयुक्तताधिकरणम् ॥

## सू. द्रव्यसङ्ख्याहेतुसमुदायं वा श्रुतिसंयोगात् ॥

(मू) दर्शपूर्णमासयोरामनन्ति - "व्रीहीन् प्रोक्षती"ति । तत्रैव त्रीन् परिधीन् तिस्रस्समिध" इति मन्त्रः, "चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्रामावास्या"मिति, चातुर्मास्यानां द्वितीये पर्वणि वरुणप्रघासेष्वाम्नायते "शूर्पेण जुहोति तेन ह्यन्नं क्रियत" इति, तन्मन्त्रे लिङ्गकल्पितं, त्रीनिति मन्त्रेण त्रीन् परिधीन् प्रकाशयेदिति वाक्यमुदाहरणम् । अथवा यत्सङ्ख्यया प्रधानं वाक्यं तदुदाहर्तव्यम् । "तेन हीत्य"त्र श्रुत्यान्नकरणस्य हेतु-त्वेन व्याप्यत्वात् प्राधान्यं होमश्चाङ्गमिति ईदृशं वाक्यं कल्प्यं "यद्यदन्नकरणं तत्तद्धोमेन संस्कर्तव्यमि"ति । एवं हिशब्दस्य प्राधान्यावगमकत्वम् । तत्र संशयः - किं व्रीहीनिति द्वितीयाश्रुत्या प्रोक्षणस्य व्रीहिद्रव्यार्थत्वावगमात् प्रोक्षणं व्रीहिद्रव्यप्रयुक्तम् । कल्पिते वा तादृशे प्रत्यक्षे वाक्ये त्रीनिति द्वितीयाश्रुत्या मन्त्रस्य त्रित्वसङ्ख्याप्रकाशनार्थत्वावगमात् मन्त्रः

त्रित्वसङ्ख्याप्रयुक्तः, पौर्णमासीममावास्यामिति द्वितीयाश्रुत्याभिमर्शनस्य पौर्णमासीत्रिकामावास्यात्रिकसमुदायार्थत्वावगमात् अभिमर्शनं पौर्णमास्यमावास्यासमुदायप्रयुक्तं, हि श्रुत्या होमस्य शूर्पदर्वीपिठराद्यन्नकरणार्थत्वावगमात् होमः अन्नकरणप्रयुक्तः । अथवा प्रकरणात् प्रोक्षणं व्रीहिशब्दलक्षितापूर्वसाधनविशेषार्थं सत् अपूर्वप्रयुक्तम्, मन्त्रश्चापूर्वीयपरिधिसङ्ख्याप्रकाशनार्थस्सन् अपूर्वप्रयुक्तः, अभिमर्शनमपि समुदायगतयागलक्षितापूर्वसाधनविशेषार्थत्वं सदपूर्वप्रयुक्तं, शूर्प .... होमश्च तृतीयानिर्दिष्टद्रव्यकत्वात् द्रव्यप्रयुक्तत्वासम्भवादपेक्षितारादुपकारकापूर्वार्थस्सन्नपूर्वप्रयुक्त इति । तत्र श्रुतेर्बलीयस्त्वात् प्रकरणं बाधित्वा प्रोक्षणं व्रीहिद्रव्यस्वरूपप्रयुक्तं होमश्चान्नकरणप्रयुक्त इति प्राप्ते -

ब्रूमः । तथा सत्युलूखलादिप्रोक्षणवत् व्रीहिप्रोक्षणादीनामप्यानर्थक्यप्रसङ्गात् प्रकरणात् प्रोक्षणं मन्त्रोऽभिमर्शनं शूर्प होमकारी शूर्पहोमश्च शूर्पहोमापूर्वप्रयुक्तमिति । नन्वेवं स्वरूपातिक्रमे प्रोक्षणादीनां द्रव्यादिष्वतिप्रसङ्गः स्यात्, तेषामपि अपूर्वसाधनत्वादिति शङ्कानिवृत्त्यर्थमिदमधिकरणमिति पक्षान्तरम् । तत्पक्षे मन्त्रोऽप्युदाहरणमेव अहविरादिसाधनविशेषपरत्वेनातिप्रसङ्गनिरास इति । एवं च "व्रीहिभिर्यजेते"त्यस्यायमर्थः - प्रोक्षितैः व्रीहिभिः साध्यमानेन यागेनापूर्वं कुर्यादिति । ततश्च नीवारेष्वपि प्रोक्षणसिद्धिरिति । तत्रैषोऽर्थः - प्रोक्षितैर्नीवारैः साध्यमानेन यागेनापूर्वं कुर्यादिति । तस्मात् सर्वे संस्कारा मन्त्राश्चापूर्वप्रयुक्ता इति स्थितम् ॥

(टि) एवं वाक्यसंयुक्तानां लिङ्गसंयुक्तानां च प्रकरणादपूर्वप्रयुक्तिरुक्ता । अधुना यदत्यन्तबलीयस्या श्रुत्या संयुक्तं तस्य प्रकरणान्नपूर्वार्थत्वमिति मन्यमानान् प्रति श्रुतिसंयुक्तानामप्यपूर्वार्थत्वं

प्रतिपाद्यते । अथवा स्वरूपातिक्रमेण साधनसम्बन्धे स्रुवादिष्वतिप्रसङ्गमाशङ्क्य निराक्रियते । अत्र द्रव्यं सङ्ख्या समुदायो हेतुश्चोदहरणम् । तत्रापि "व्रीहीन् प्रोक्षती"ति द्रव्योदाहरणं "त्रीनि"ति सङ्ख्योदाहरणं "चतुर्होत्रे"ति समुदायोदाहरणं, "तेन ही"ति हेतूदाहरणम् । तत्र मन्त्रस्याविधायकत्वात् लिङ्गविनियुक्तत्वाच्चानुदाहरणत्वमित्यत्राह तत्र मन्त्रेत्यादिना । अतिप्रसङ्गनिराकरणपक्षे तु मन्त्र एवोदाहरणमिति ध्येयम् । "तेन ही"त्यत्र हिशब्देन हिप्राधान्यावगतिर्विवक्षिता तत् कथमित्यत्राह - तेन हीत्यत्रेत्यारम्य प्राधान्यावगमकत्वमित्यन्तेन । व्रीहिद्रव्यस्वरूपेति । अयमाशयः, यद् व्रीहिपदाभिहितं स्वरूपं तन्मात्रपर्यवसितं प्रोक्षणं "व्रीहीन् प्रोक्षती"त्यनेन विधीयते । ततश्च प्रधानविधिविशेषणत्वाभावात् अतद्विशेषणस्य च तद्विकारेष्वतिदेशाभावान्न प्रोक्षणस्य विकृतिष्वतिदेशः, व्रीहिमात्रं त्वतिदिश्यते । तच्चातिदिष्टं स्वाङ्गभूतं प्रोक्षणमनुष्ठापयतीति विकृतिष्वपि सत्सु व्रीहिषु प्रोक्षणं स्यादेव । नीवारादिभिर्निर्वर्तितेषु व्रीहिषु उपदेशातिदेशयोः अभावान्नीवारेषु न प्रोक्षणमनुष्ठेयमिति ।

उलूखलादिप्रोक्षणवदिति । एतच्च द्वितीयाधिकरणन्याय एव अत्रापि, किन्त्वत्यन्तबलीयस्या श्रुत्या संयुक्तं न प्रकरणादपूर्वार्थं कल्पयितुं युक्तमिति शङ्कानिरासार्थमिदमधिकरणमिति सूचयितुमुक्तम् । अपूर्वप्रयुक्तत्वमिति । शक्नुवन्ति हि व्रीह्यादयः शास्त्रान्तरावगतमात्मीयमपूर्वसाधनत्वं लक्षणया गमयितुं न स्यात्तेन रूपेण प्रोक्षणादिकं गृह्णन्तीत्यपूर्वप्रयुक्तत्वमित्यभिप्रायः । एवं सति मन्दप्रयोजनं स्यादित्यस्वरसात् पक्षान्तरमाकरेषूक्तम् । तद्दर्शयति नन्वित्यादिना । यद्युलूखलादिस्वरूपातिक्रमस्तदा प्रोक्षणादीनां स्रुवादिष्वतिप्रसङ्ग इत्यर्थः । हविरादीति । श्रुत्युपात्ता उलूखलादय आदिशब्दार्थः । यथा "ग्रहंसंमार्ष्टी"त्यत्र ग्रहत्वस्य विवक्षितत्वात् संमार्गस्य चमसेषु नातिप्रसङ्गः एवमत्रापि श्रुत्युपात्तहविरादिसाधनविशेषस्य

विवक्षितत्वात् प्रोक्षणादीनां स्रुवादिषु नातिप्रसङ्ग इत्यभिप्रायः । एवं चेति । प्रोक्षणादेरपूर्वप्रयुक्तत्व इत्यर्थः ।

अयमाशयः - अप्रधानविधिशेषत्वे प्रोक्षणस्यानर्थक्यप्रसङ्गात् साधनविशेषद्वारेण प्रधानविधेरेव विशेषणं प्रोक्षणमिति । तथा सति यो वाक्यार्थस्तं दर्शयति प्रोक्षितैरित्यादिना । ततश्चेति । अयमभिप्रायः - एवंवाक्यार्थे नैवारहविष्कायां भावनायां तच्छब्देन प्राकृतभावनेत्थम्भावे सकले ऽतिदिश्यमाने नीवारैर्व्रीहिमात्रे निवर्तिते सिद्धं प्रोक्षणमिति । एवमपि कथं नीवारेषु प्रोक्षणसिद्धिरित्यत्राह - तत्रैषोऽर्थ इति । योऽयं निवर्त्यते तस्य तत्स्थाने निवेश इति तत्र नैवारे नीवारैर्व्रीहीणां निवर्तितत्वाद्व्रीहिस्थाने नीवाराणां निवेशादेष वक्ष्यमाणोऽर्थो भवति, तस्मादित्यर्थः । अधिकरणत्रयलब्धमर्थमुपसंहरति - तस्मादिति । प्रोक्षणादीनां व्रीह्यादिस्वरूपार्थत्वे आनर्थक्यप्रसङ्गादित्यर्थः । नन्वेवं साधनसंस्कारविधिषु स्वपदेनोपात्तत्वात् परस्परनिरपेक्षेषु साधनविधिलब्ध साधनत्वरूपं संस्कारविधौ संस्कार्यसमर्पकेण लक्षयित्वा तद्रूपेण संस्कारस्य प्रोक्षणादेः सम्बन्धो विधीयत इत्यस्तु । यत्र तु संस्कारवाक्ये द्रव्यं निर्दिश्य सर्वनाम्ना च तद्द्रव्यं परामृश्य यागो विनियुज्यते । यथा "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षे"त्यादि । तत्र विनियोगवाक्यगतस्य सेति तच्छब्दस्य प्रकृतापेक्षित्वेन संस्कारवाक्यार्थावगत्युत्तरकालमेव विनियोगवाक्यार्थावगतिः । विनियोगवाक्यार्थावगतिवेलायां हि साधनत्वावगतिरिति संस्कारवेलायां न साधनत्वं विदितमिति कथं संस्कार्यसमर्पकेण साधनत्वं लक्षयित्वा तद्रूपे संस्कारविधिरिति चेदुच्यते । प्रथमं पयश्शब्दः स्वार्थस्य संस्कारान्वयितारूपं वाक्यार्थं प्रतिपादयति तद्रूपस्य च कार्यान्तरौपयिकतामन्तरेणानुपपत्तेस्तदाकाङ्क्षायामुपरितनेन विनियोगवाक्येन संस्कारविशिष्टस्यैव पयसस्तच्छब्दपरामृष्टस्य यागे

विनियोगः क्रियते । तदर्थं च पूर्वविहितः संस्कार इति पश्चादवगम्यते तदा साधनस्वरूपे पर्यवस्यतीति । तदयमत्र वाक्यार्थः, दध्यानयनसंस्कृतं पयो वैश्वदेवमिति । न ह्यवश्यं पूर्वलक्षित एव साधनरूपे संस्कारो विधातव्यः, किन्तु साधनरूपार्थाः संस्कारा इत्येतावत् प्रतिपाद्यम् । न चैवंविधेष्वयमर्थो न सिद्ध्यतीति न काचिदनुपपत्तिः । तस्मात् सर्वेषामेव भूतभवद्भाविविनियोगानां द्रव्यादीनां संस्कारा अपूर्वभावनाशेषभूतास्तद्विकृतिषु प्राकृतार्थकरेषु द्रव्यान्तरेषु कार्येषूहितव्या इति । शूर्पहोमस्तु "शूर्पेण जुहोती"ति तृतीयानिर्दिष्टद्रव्यकत्वादारादुपकारक इति दूरापास्तम् । तस्य द्रव्यप्रयुक्तत्वं अन्नकरणत्वं त्वर्थवादो न हेतुरित्युक्तम् इहान्नकरणसंस्कारार्थत्वनिराकरणेन होमस्यापूर्वार्थत्वे स्थिते प्रथमेऽध्याये किं शूर्पेणेति होमसाधनत्वेनान्नकरण विधीयते शूर्पं तु प्रदर्शनार्थमेकदेशानुवाद उत शूर्पं विधीयते तस्यान्नकरणत्वं स्तुतिरिति विचार इत्यपौनरुक्त्यमिति ॥

## ॥अग्निष्टोम उपांशुत्वस्य प्राचीनपदार्थ-प्रयुक्तत्वाधिकरणम्॥

## सू. देवताबद्धमुपांशुत्वं तेषां स्यात् श्रुतिनिवेशात् तस्य च तत्र भावात् ॥

(मू) ज्योतिष्टोमे श्रूयते - "त्सरा वा एषा यज्ञस्य तस्मात् यत्किञ्चित् प्राचीनं अग्नीषोमीयात् तेनोपांशु चरन्ती"ति । तत्र संशायः - किमिदं उपांशुत्वं यस्सोमयागस्य प्राग्भागः तद्धर्मस्सन् सोमयागपरमापूर्वप्रयुक्तं, ततश्च विकृतिषु कुण्डपायिनामयनादिषु प्राग्भागारम्भकाः प्राकृतमासाग्निपदार्थेषूपांशुत्वमूहितव्यमुताग्नीषोमीयात् पशोः ये प्राचीनाः पदार्थाः दीक्षणीयादयः तेषां धर्मस्सन्नुपांशुत्वं दीक्षणीयाद्यवान्तरापूर्वप्रयुक्तं,

ततश्च मासाग्निहोत्रादिषु प्रयोजकापूर्वाभावात् उपांशुत्वं नोहितव्यमिति । तत्र यज्ञस्य यत् प्राचीनं तदुपांश्वित्यन्वयात् सोमयागप्राग्भावधर्मस्सन्नुपांशुत्वं परमापूर्वप्रयुक्तम् ततश्च मासाग्निहोत्रादिषु ऊहितव्यमिति स्थितेऽन्तराचिन्ता ॥

(टि) इदानीं समुदायप्रसङ्गात् स्वरोऽग्नीषोमीयप्राग्भागपदार्थसमुदायप्रयुक्त उत वादार्थप्रययुक्त इति चिन्यते । सोमयागेत्यादिस्तु फलविचारः । अथवायमप्युपोद्धात एव सोमयागेत्यादि विचारसिद्ध्यर्थ इति ।

नोहितव्यमिति । यूपावटस्तरणबर्हिषु यथा बर्हिर्धर्मो नोह्यते तथेति भावः। व्यवहितोऽपि यज्ञस्येति शब्दः प्राचीनशब्दस्य विशेषणम् । विधिशेषत्वेन प्रवृत्तिविशेषकरत्वसम्भवात्, त्सरशब्दविशेषणत्वे च तदसम्भवादित्याशयेनाह - यज्ञस्य यत् प्राचीनमिति ॥

(मू) दर्शपूर्णमासयोः श्रूयते - "यज्ञं तन्विष्यन्तावध्वर्युयजमानौ वाचं यच्छतः तत् प्रजापतेर्हृदयं गत्वा यज्ञं तन्वाते तस्मात् प्रणिताः प्रणेष्यन् वाचं यच्छति तां हविष्कृता वाचं विसृजती"ति । तत्र संशयः- किमयं वाग्यमः प्रणीताप्रणयनादूर्ध्वं हविष्कृदाह्वानात् प्राग् यो यज्ञभागः तद्धर्मः सन् परमापूर्वप्रयुक्तः किं वा वाग्यमस्य यज्ञस्य वा सम्बन्धाभावात् प्रणीताप्रणयनहविष्कृदाह्वानयोः मध्ये ये पदार्थाः प्रोक्षणादयः तद्धर्मस्सन् प्रोक्षणाद्यवान्तरापूर्वप्रयुक्त इति ।

तत्र वाग्यमस्य परम्परया यज्ञसंयोगात् उक्तयज्ञभागधर्मस्सन् वाग्यमः परमापूर्वप्रयुक्त इति प्राप्ते,

ब्रूमः। यज्ञं तन्विष्यन्तो यज्ञं तनितुं वाचं यच्छतः यच्छेतामिति यज्ञस्य विस्तारेण सम्बन्धाद्वाग्यमस्य यज्ञसम्बन्धाभावात् प्रोक्षणादिपदार्थ

धर्मस्सन् वाग्यमस्तदवान्तरापूर्वप्रयुक्त इति । इदं नाधिकरणान्तरमिति पक्षान्तरम् ॥

स्थितादुत्तरम् । यज्ञशब्दस्य व्यवहितप्राचीनपदेनान्वयस्यान्याय्यत्वादुपांशुत्वं दीक्षणीयादिपदार्थधर्मस्सन् तदवान्तरापूर्वप्रयुक्तम् । ततश्च मासाग्निहोत्रादिषु नोहितव्यमिति ।

अत्रेदं बोध्यम् । यज्ञस्य त्सरा इत्यन्वयः यदुपांशुत्वं तद्यज्ञस्य त्सरा छदनगतिः यथा शकुनिं जिघृक्षतीत्युपांशुत्वस्तुत्यर्थोऽयमर्थवादः । ततश्चाग्नीषोमीयात् प्राचीनं यत्किञ्चित् तेनोपांशु चरन्तीत्यन्वयाद्दीक्षणीयाद्यवान्तरापूर्वार्थत्वमुपांशुत्वमिति ॥

(टि) इदानीं प्रस्तुताधिकरणसिद्धान्तस्य दृष्टान्तसिद्ध्यर्थं तदीयपूर्वपक्षेण च पूर्वपक्षं वक्तुमन्तरागर्भिणीन्यायेन विचार्यतेयज्ञसम्बन्धाभावादिति । साक्षात्सम्बन्धभावादित्यर्थः। परम्परासम्बन्धस्तु वाग्यमस्याङ्गार्थत्वेऽप्युपपद्यत इति भावः। कथं प्राचीनपदेनानन्वये पदार्थधर्मत्वमुपांशुत्वस्येत्यत्राह अत्रेदमित्यादिना । किञ्च भागस्यैकत्वाद्यत्किञ्चिदित्यनेकापेक्षः शब्दो नावकल्पते । तस्मादप्यग्नीषोमीयात् प्राचीनानामङ्गानामुपांशुत्वं न यज्ञभागस्येति ॥

## ॥ इष्टकासु सकृद्विकर्षणाद्यनुष्ठानाधिकरणम् ॥

## सू. अग्निगर्भः प्रतीष्टकं सङ्घातात् पौर्णमासीवत् ॥

(मू) अस्त्यग्निः "य एवं विद्वानग्निं चिनुत" इति "इष्टकाभिरग्निं चिनुत" इति । तत्रेदमाम्नायते - "हिरण्यशकलेनाग्निं प्रोक्षति दध्ना मधुमिश्रेणाग्निं प्रोक्षति वेतसशाखयावकाभिश्चाग्निं विकर्षति मण्डूकेनाग्निं

विकर्षती"ति। तत्र संशयः - किं प्रतीष्टकं प्रोक्षणं विकर्षणं च कर्तव्यं उत सकृदेवेति।

तत्र इष्टकाभ्यः पृथगग्निशब्दवाच्यस्य कस्यचिदवयविद्रव्यस्याभावात् प्रतीष्टकं कर्तव्यं तद्वयमिति प्राप्ते,

ब्रूमः। उपहिताभिरिष्टकाभिः संयुक्तस्य चित्यात्मकस्याग्न्याधारभूतस्य अवयविद्रव्यस्याग्निशब्दाभिधेयत्वात् तदवयविद्रव्यार्थं सत् प्रोक्षणं विकर्षणं च सकृदेव कर्तव्यमिति ॥

(टि) प्रासङ्गिकमिदमधिकरणं समुदायप्रसङ्गादारभ्यत इति । अवयविद्रव्यस्याभावादिति । एकावयवाकर्षणे कृत्स्ना कर्षणं सन्ध्यदर्शनं चावयविसद्भावे प्रमाणं, यथा देवदत्तादिषु घटादिषु च । तदुभयमिह नास्ति। न ह्येकेष्टकाकर्षणे अन्यासामाकर्षणं सन्धिश्च दृश्यते। अत इष्टका एव संहता अग्निधारणार्थत्वेनावस्थापिता अग्निशब्देनाभिधीयन्त इति भावः। एकत्वबुद्धिरेवावयविसद्भावे प्रमाणं नाकर्षणं नापि सन्ध्यदर्शनं, तयोरेकबुद्धिप्रत्यक्षेण बलवता बाधात् सन्ध्यदर्शनस्य पटादौ व्यभिचाराच्च । कथं तर्हि क्वचिदाकर्षणं क्वचिन्नेति वैचित्र्यमिति चेत् तत्रापि प्रत्यक्षमेव प्रमाणं, तदेतत् सकलमभिप्रेत्याह - उपहिताभिरित्यादिना ॥

## ॥ उत्तमान्यानामह्नां पत्नीसंयाजसंस्थाधिकरणम् ॥

## सू. पत्नीसंयाजान्तत्वं सर्वेषामविशेषात् ॥

(मू) अस्त्यहर्गणो द्वादशाहः "द्वादशाहेन प्रजाकामं याजयेदि"ति। तत्र श्रूयते "पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्ते न च बर्हिरनुप्रहरति असंस्थितो हि यज्ञः" इति। तत्र संशयः- किं दशममहर्वर्जयित्वा सर्वेषामह्नां पत्नीसंयाजान्तत्वं उत दशमोत्तमवर्जं सर्वेषामिति ।

तत्राविशेषां दशमं वर्जयित्वा सर्वेषां पत्नीसंयाजान्तत्वमिति प्राप्ते,

ब्रूमः। "असंस्थितो हि यज्ञ" इति यज्ञासंस्थायाः पत्नीसंयाजान्तत्वे हेतुत्वेन व्यपदेशात् दशमोत्तमवर्जं पत्नीसंयाजान्तत्वमिति । तस्मात् व्यहादिषु द्वितीयादीनामुत्तमानामह्नां । प्रकृतौ पत्नीसंयाजान्तानामूहित्वा सकलानुष्ठानमिति ॥

(मू) इदमपि समुदायप्रसङ्गादारभ्यते। यद्वोहस्योपोद्धातोऽयं विचारः । दशमस्याह्नो मानसग्रहेण समापनस्य वाचनिकस्य सत्वान्न तत्र संशय इत्याशयेनाह - दशममहर्वर्जयित्वेति । अविशेषादिति । अयं भावः- असंस्थितशब्दस्य चिरसंस्थाभिप्रायत्वेनोपपत्तेर्न तदनुरोधेनाविशेषप्रवृत्तो विधिः सङ्कोचमर्हति। यथा लोके यश्चिरेण भुङ्क्ते तत्र वक्तारो भवन्ति नास्य भोजनं समाप्यत इति, तथेहापि दीर्घकालोऽसौ यज्ञो न समाप्यते चिरेण समाप्यत इत्यर्थ इति । अविशेषप्रवृत्तोऽपि विधिर्वाक्यशेषस्य मुख्यत्वाय विशेषे स्थाप्यते अञ्जनमिव घृतमित्याशयेनाह - असंस्थित इति । उत्तमस्तु समाप्यत इति । तत्र हेत्वभावान्न पत्नीसंयाजान्तता दशमस्य तु यद्यपि न्यायात् पत्नीसंयाजान्तता प्राप्ते तथापि वचनेन बाध्यत इत्यभिप्रायेणोक्तं दशमोत्तमवर्जमिति ।

किञ्चात्र न्यायादपि विशेषविषयत्वम् । तथाहि, "सङ्ख्यया कर्मभेद" इति न्यायेन "द्वादशाहेन याजयेदि"त्यत्र द्वादशयागाः। ते च सहकर्तव्याः संहत्य फले विधानात् । तत्र पूर्वमहः कस्मिंश्चित् पदार्थे व्यवस्थाप्यापरमुपक्रमयितव्यम् । तत्र कस्मिन् पदार्थे अवस्थातव्यमित्यपेक्षायां पत्नीसंयाजान्तानि पूर्वाण्यहानि कृत्वोत्तरोत्तरमारभेतेत्येवं विधीयमानेऽपेक्षितविधिर्भवति चोदकश्च न बाध्यत इति तथैव कल्पनं न्याय्यम् । शेषलोपस्तु चोदकबाधेनानपेक्षितश्च विधीयत इति सो न्याय इति । ततश्चायं श्रुत्यर्थः - पत्नीसंयाजान्तानि सर्वाण्यहानि कृत्वा हार्योजनाद्यहश्शेषं

तन्त्रेण सर्वेषामुपरिष्टादनुष्ठेयमिति । अस्योपोद्घातत्वं दर्शयति तस्मादित्यादिना।

## ॥ सामिधेनीनामभ्यासस्य स्थानधर्मताधिकरणम् ॥

## सू. अभ्यासः सामिधेनीनां प्राथम्यात् स्थानधर्मः स्यात् ॥

(मू) दर्शपूर्णमासयोः "पञ्चदशानुब्रूया"दिति पञ्चदशसामिधेनीर्विधाय एकादशर्चः "प्रवो वाजा इत्याद्या होतान्ताः पठित्वाम्नायते "त्रिः प्रथमामन्वाह त्रिरुत्तमां ताः पञ्चदश सम्पद्यन्त" इति। तत्र संशयः - किमयं त्रिरभ्यासः ऋग्यमः यत्रतत्रस्थापि प्रवो वाजाः त्रिरभ्यसितव्याः उत स्थानधर्मा याः प्रवो वाजीया या अन्यापि प्रथममुच्यते सावित्रिरभ्यसितव्येति । एवमाजुहोतायामपि संशयो द्रष्टव्यः। प्रथमाशब्देन ऋगभिधानात् ऋग्धर्म इति यत्रतत्रस्थापि प्रवोवाजाः त्रिरभ्यसितव्येति प्राप्ते -

ब्रूमः। तत्र प्रथमशब्देन मुख्यया वृत्त्या प्राथम्यस्थानाभिधानात् स्थानधर्मा याः प्रवो वाजा या अन्या प्रथममुच्यते साप्यूहेन त्रिरभ्यासितव्येति। "गुणवचनानामाश्रयतो लिङ्गवचनानि" भवन्तीत्यनुवादस्त्रीलिङ्गनिर्देश इति। एवं योत्तममुच्यते सोहेन त्रिरभ्यासितव्येति द्रष्टव्यम् ।

(टि) इदमप्यधिकरणं पूर्वाधिकरणवत् प्रासङ्गिकमौपोद्घातिकं वा । उपोद्घातत्वमेव दर्शयन्नुपन्यस्यति - ऊहेनेति। स्त्रीलिङ्गोपपत्तिमाह - गुणवचनानामिति। अयमाशयः, अनुवचनसमर्थाया ऋच एव वचनतः प्राप्तिः। अतो न वर्णस्य वा पदस्य वा प्राथम्यात्त्रिरभ्यासप्राप्त्या स्त्रीलिङ्गस्यानुवादकत्वेनाप्यसम्भवादानर्थक्यं स्यात् । तत्परिहाराय ऋग्धर्म एवाभ्यास इत्यभ्युपेयमित्यापादनीयमिति।

॥ अन्वारम्भणीयेष्टयधिकरणम् ॥

सू. इष्टयावृत्तौ प्रयाजवदावर्तेत आरम्भणीया ॥

(मू) दर्शपूर्णमासयोरन्वारम्भणीयनामेष्टिः समाम्नाता "आग्नावैष्णवमेकादशकपालं निर्वपेत् दर्शपूर्णमासावारप्स्यमानः, सरस्वत्यै चरुं, सरस्वते चरुमि"ति । क्वचित्तु "सरस्वते द्वादशकपाल"मिति दृश्यते । "अग्नये भगिनेऽष्टाकपालं निर्वपेत् यः कामयेत भाग्यन्नादः स्यामि"तीति । नित्यवदेके भगिनमामनन्ति, तथावृत्तिश्च दर्शपूर्णमासयोः श्रूयते "यावज्जीवं दर्शपूर्णमासाभ्यां यजेते"ति। तत्र संशयः - किमियमिष्टिर्दर्शपूर्णमासावृत्तावावर्तेत उत नेति । अस्या दर्शपूर्णमासाङ्गत्वात् प्रयाजादिवदावर्तेतेति प्राप्ते -

ब्रूमः। अस्यारम्भाङ्गत्वात् नावर्तेतेति। इदं तु वृत्तिकारमतम् । किमियमिष्टिः प्रथमस्याग्न्याधानात्मकस्य पदार्थस्याङ्गमुत दर्शपूर्णमासौ प्रथमं प्रवर्तमानस्याङ्गमिति । तत्र पुरुषार्थत्वे फलकल्पनागौरवप्रसङ्गात् प्रथमस्याग्न्यन्वाधानपदार्थस्याङ्गं तदावृत्तौ .. त्तेनेति प्राप्ते -

ब्रूमः। क्रियार्थक्रियोपपदे विधीयमानेन लृट्प्रत्ययेन स्वप्रकृतिभूतधात्वर्था प्रवृत्तकर्तृप्रथमप्रवृत्त्यात्मकारम्भार्थत्वाभिधानात् दर्शपूर्णमासौ प्रथमं प्रवर्तमानस्याङ्गमियमिष्टिरिति। तस्मात् सकृदेव प्रथमप्रवर्तनमिति नावर्तेतेति सिद्धम्। न वा वृत्तिकारमतं पृथगधिकरणम् ॥

(टि) इदानीमावृत्तिप्रसङ्गादन्वारम्भणीयावृत्तिश्चिन्त्यते। आरम्भाङ्गत्वादिति । अयं भावः - आरप्स्यमानसंयोगादारम्भाङ्गमारम्भद्वारेणैव दर्शपूर्णमासाङ्गम् । आरम्भश्च साधारण इति ।

भाष्यकारेण तु तत्रापरितोषाद्व्याख्यानान्तरं कृतम् । तद्दर्शयति किमित्यादिना। तत्रायमपरितोषे हेतुः - वृत्तिकारेण हि इदं मया

कर्तव्यमित्यध्यवास आरम्भः, स च सर्वप्रयोगाणां साधारण इत्युक्तम् । तत्रारम्भशब्दो नाध्यवसायवचनः । प्रथमप्रवृत्तिवाची हि लोके प्रसिद्धः । अध्यवसायवाचित्वेऽपि उपस्थितस्यैवाध्यवसायः। उपस्थानं च प्रतिप्रयोगं भेदेनेति प्रतिप्रयोगमध्यवसायभेदात्तदङ्गमारम्भणीयात्यावर्तनीयेति सिद्धान्तासिद्धिरिति ।

फलकल्पनेति। अयमाशयः। यद्यप्यारप्स्यमान इति शानचाभिहितस्य दर्शपूर्णमासारम्भकर्तुः पुरुषस्य संस्कारिकेयमिष्टिरिति वाक्यादवगम्यते तथापि फलकल्पनागौरवप्रसङ्गात् आरभतिनारम्भविषयमन्यन्वाधानं लक्षणयानूद्य तदङ्गत्वेन विधीयत इत्यभ्युपगन्तव्यमिति श्रुतिसम्भवेन लक्षणा युक्तेत्याशयेनाह क्रियार्थेत्यादिना। निर्वपेद्दर्शपूर्णमासावारप्स्यमान इत्यत्र निर्वपेदित्यन्वारम्भणीया क्रियोच्यते। सा च दर्शपूर्णमासारम्भक्रियार्थेति लृटा प्रतिपाद्यते। तथा च न पुरुषार्थत्वेऽपि फलकल्पना फलवदारम्भार्थत्वादित्यभिप्रायः। स्वप्रकृतीति । स्वस्य लृट्प्रत्ययस्य प्रकृतिभूतो यो धातुरारभतिस्तस्य योऽर्थः अप्रवृत्तस्य कर्तुं प्रथमा प्रवृत्तिस्तदात्मक आरम्भः सः अर्थः प्रयोजनं यस्य तत्त्वस्याभिधानादारम्भणीयाया इत्यर्थः। अत्राप्रवृत्तत्वं प्राथम्यं चावृच्यभावे हेतुत्वेनोपात्तमिति द्रष्टवयम्। प्रवर्तमानस्याङ्गमिति । अन्वारम्भणीया तावदारम्भार्थेति लृटा प्रतिपाद्यते। आरम्भस्य च प्रकृत्यर्थत्वादप्राधान्यम्। कर्तुश्च प्रत्ययार्थत्वात् प्राधान्यम् । अतः पुरुषस्याङ्गमित्युच्यते आरम्भाङ्गमिति चेति भावः ॥

## ॥ निर्वापमन्त्रे सावित्रादिपदानामनूहाधिकरणम् ॥

### ॥ अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्तत्राचोदितमप्राप्तं चोदिताभिधानात् ॥

(मू) दर्शपूर्णमासयोर्निर्वापमन्त्रः "देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अग्नये जुष्टं निर्वपा"मीति । तत्र संशयः - किं

सवित्रश्विपूषञ्छब्दाः कर्मसमवेतदेवताप्रकाशनार्थाः। ततश्च विकृतावूहितव्याः इति। तत्र दृष्टार्थत्वलाभात् कर्मसमवेतदेवताप्रकाशनार्थाः। तत्र लक्षणायां काञ्चिदपि व्युत्पत्तिं वाश्रित्याग्निप्रकाशनार्था अग्निना सह सवित्रादयो मान्त्रवर्णिका विकल्पेरन् वा। ततश्चोहितव्या इति प्राप्ते -

ब्रूमः। देवताप्रकाशनार्थत्वे मन्त्ररूपवाक्यभेदलक्षणाप्रसिद्धव्युत्पत्तिकल्पनविशिष्टविकल्पानां दोषाणां प्रसङ्गात् न कर्मसमवेतदेवताप्रकाशनार्थाः, किं तु स्तुत्यर्थं निर्वापप्रकाशनार्थाः। ततश्च पूषञ्छब्द विकृतौ नोहितव्या इति ॥

(टि) एवमुपोद्घातप्रसक्तानुप्रसक्ते गते अधुनोहश्चिन्त्यते । इत आरभ्योहितव्यो न वेत्येवाधिकरणशरीरम् । समवेतवचनासमवेतवचनत्वादिचिन्ता तदर्थेति। दृष्टार्थत्वेति । निर्वापप्रशंसार्थत्वें त्वदृष्टार्थता स्यादिति भावः। अग्निना सहेति। अयमाशयः - देवस्य त्वा सवितुः इत्यादि प्रतिदेवतं मन्त्रभेदः। तेषु च जुष्टं निर्वपामीत्यनुषङ्गः "देवस्य त्वा सवितुः प्रसवे जुष्टं निर्वपामि अश्विनोर्बाहुभ्यां जुष्टं निर्वपामि पूष्णो हस्ताभ्यां जुष्टं निर्वपामि अग्नये जुष्टं निर्वपामी"ति । तथा च, मान्त्रवर्णिकदेवताविधय इति लक्षणेति। किञ्चात्र लक्षणापि न सम्भवति । गुणनिमित्तेन ह्यत्र लक्षणा वाच्या। सा च परशब्दसामानाधिकरणये सत्येव स्यात् । न चेह सवित्रादिशब्दानामग्निशब्दसामानाधिकरण्यमस्ति भिन्न विभक्तिकत्वादिति। विषमविशिष्टेति। अग्निरुत्पत्तौ तद्धितेन विधीयते । सवित्रादयस्तूत्पन्ने मन्त्रवर्णेनेति द्वेधात्र वैषम्यमिति द्रष्टव्यम् ॥

॥ विकृतावग्निशब्दोहप्रदर्शकं तथा तण्डुल - निर्वापमन्त्रे धान्यशब्दोहप्रदर्शकं इति वर्णक - द्वयसहिताधिकरणम् ॥

## सू. गुणशब्दस्तयेति चेत् ॥

(मू) तस्मिन्नेव मन्त्रे "अग्नये जुष्टं निर्वपामी"त्यत्र संशयः किमयमग्निशब्दोऽसमवेतवचनो निर्वापप्रशंसार्थः ततश्च विकृतौ नोहितव्य उत समवेतवचनः ततश्चोहितव्य इति। तत्राग्निसेवितद्रव्यनिर्वापाभावादग्निशब्दोऽसमवेतवचनः सवित्रादिशब्दवन्निर्वापप्रशंसार्थः ततश्च विकृतौ नोहितव्य इति प्राप्ते -

ब्रूमः। निर्वापेणाग्नये जुष्टं करोमि यथाग्निना जुष्टं भवति तथा निर्वापेण करोमि इत्येवमर्थकस्यास्य मन्त्रस्याग्निसेवितद्रव्यनिर्वापप्रकाशकत्वाभावात् अग्निशब्दः कर्मसमवेताग्निवचनः ततश्च विकृतावूहितव्य इति । तस्मात् सौर्ये "सूर्याय जुष्टं निर्वपामी"ति प्रयोक्तव्यमिति । एवमन्यत्रापि द्रष्टव्यम् ॥

अथवा दर्शपूर्णमासयोरिदं समामनन्ति "धान्यमसि धिनुहि देवानिति दृषदि तण्डुलानावप"तीति । तत्र धान्यमसि धिनुहि देवानिति तण्डुलावापमन्त्रे यो धान्यशब्दः स तुषद्रव्यवचनः। स मुख्यया वृत्त्या प्रकृतावेव कर्मसमवेततण्डुलान्न वदति किन्तु लक्षणया । तत्र संशयः- किमयं धान्यशब्दः समवेतवचनो नोहितव्यः उत समवेतवचन ऊहितव्य इति । तत्र समवेततण्डुलप्रकाशकत्वेन सामर्थ्याभावादसमवेतवचनो नोहयितव्य इति प्राप्ते -

ब्रूमः। दृष्टार्थलाभाय लक्षणया कर्मसमवेततण्डुलप्रकाशनार्थत्वाभ्युपगमात् समवेतवचन ऊहितव्य इति । तस्मात् शाक्यानामयनेतरसमये हविषि मांसमसीत्यूहितव्यमिति ।

इदं त्ववधेयम् - प्रकृतौ धान्यशब्दाम्नानसामर्थ्यात् लक्षणा विकृतौ तु आम्नानरूपलक्षणाकारणाभावात् मुख्य एव मांसशब्दः प्रयोक्तव्य इति ॥

(टि) सवित्रादिप्रत्युदाहरणेनेदमारभ्यते। अग्निसेवितद्रव्यनिर्वापाभावादिति। अयमाशयः - न चात्राग्नय इत्येषा सम्प्रदानचतुर्थी । सम्प्रदीयतेऽस्मा इति व्युत्पत्त्या ददातिकर्मणाभिप्रेयमाणस्य सम्प्रदानत्वात् । न चेह दानमस्ति। तस्मात्तादर्थ्यचतुर्थ्येषा । सा च जुष्ट शब्दविशेषणम् । जुष्टमिति च भूते निष्ठा । तदयमर्थः - अग्न्यर्थं यत्तेव जुष्टं सेवितं द्रव्यं तन्निर्वपामीति। ततश्च यद्यप्यस्मिन् कर्मणि समवेतोऽग्निस्तथापि येन निर्वप्तव्य सेवितं सोऽग्निर्निर्वापकाले न समवेतोऽस्ति तथाविध-श्चानेन अग्निशब्देनोच्यत इत्यभिप्रेत्याह - अग्निशब्दोऽसमवेतवचन इति । नहि त्वदभिमतो वाक्यार्थः, अदृष्टार्थत्वापत्तेरित्याशयेनाभिमतं वाक्यार्थं दर्शयन् सिद्धान्तयति निर्वापेनेत्यादिना । एवं वाक्यार्थे सत्यग्निना सेविष्यमाणमेव द्रव्यं निरूप्यत इति तादृशश्चाग्निः कर्मसमवेत एवेत्याशयेनाह - अग्निशब्दः कर्मसमवेताग्निवचन इति।

अस्मिन्नधिकरणे द्वितीयं वर्णकमारचयति अथवेत्यादिना । प्रयोजनमाह तस्मादित्यादिना । ननु प्रकृतौ प्रकृतिश्ब्देन धान्यशब्देन लक्षणया तण्डुलाः प्रकाशितास्तथेहापि चोदकप्राप्तेः प्रकृतिशब्देन मृगशब्देन प्रकाशयितव्यं मृगोऽसीतीत्याशङ्क्याह इदं त्वित्यादिना ।

## ॥ इडोपह्वानमन्त्रे यज्ञपतिशब्दस्यानूहाधिकरणम् ॥

## सू. चोदिते तु परार्थत्वात् विधिवदविकारः स्यात् ॥

(मू) दर्शपूर्णमासयो"रिडोपहूते"त्यादि इडानिगदे इदमाम्नायते "दैव्या अध्वर्यव उपहूता मनुष्या य इमं यज्ञमवान् ये च यज्ञपतिं वर्धानि"ति ये इमं यज्ञं अवान् अवन्ति ते दैव्या अध्वर्यवः उपहूताः ये यज्ञपतिं वर्धान् वर्धयन्ति ते मनुष्या अध्वर्यवश्चोपहूता इत्यर्थः। तत्र संशयः, किमिदं यज्ञपतिं वर्धानित्येतत् यज्ञपतिवृद्धिप्रकाशनेन तत्प्रोत्साहकरणेन

यजमानसंस्कारार्थं सत् यज्ञपतिशब्दः समवेतवचनं सन् बहुयजमानके ऊहितव्यः उत इडास्तुत्यर्थो यज्ञपतिवचनः, ततश्चोहितव्य इति ।

तत्र लिङ्गात् यज्ञपतिसंस्कारार्थं सत् यज्ञपतिशब्दः कर्मसमवेतयज्ञवचनः सन् बहुयजमानकेषूहितव्यः यज्ञपतीन् वर्धानिति प्राप्ते -

ब्रूमः। प्रत्यक्षश्रुत्या अस्य कृत्स्नस्य मन्त्रस्य इडोपाह्वाने विनियुक्तत्वात् इडास्तुत्यर्थं सत् यज्ञपतिशब्दो.... क्तम् । अतश्च नोहितव्य इति ॥

(टि) लिङ्गादिति । इडामन्त्रैकवाक्याद्धि इडास्तुत्यर्थता वाक्याच्च लिङ्गं बलीय इति भावः। प्रत्यक्षश्रुत्येति । "स यो हैवं विद्वानिडया चरती"त्यनयेत्यर्थः। असमवेतवचन इति । इडास्तुत्यर्थत्वेन पारार्थ्यादेव असमवेतवचनत्वम् । एतच्च भाष्ये स्पष्टम् । नोहितव्य इति। सत्रेषु- एकयजमानवृद्धिप्रकाशनेनेडा स्तुतिसिद्धेर्नोह इत्यर्थः ॥

## ॥ प्रस्तरप्रहरणकरणासूक्तवाके यजमानपदस्य ऊहाधिकरणम् ॥

## सू. विकारस्तत्प्रधाने स्यात् ॥

(मू) "दर्शपूर्णमासयोः "सूक्तवाकेन प्रस्तरं प्रहरती"ति प्रत्यक्षश्रुत्या प्रस्तरप्रहरणे करणत्वेन विनियुक्ते सूक्तवाकनिगदे आम्नायते "अयं यजमानः आयुराशास्त" इति । तत्र संशयः - किमिदं प्रहरणस्तुत्यर्थं सत् यजमानशब्दः असमवेतार्थवचनः सन् नोहितव्य उत प्रहरणेन यजमानस्य यत् फलं तत्फलप्रकाशनार्थं सत् यजमानशब्दः कर्मसमवेतयजमानवचनः सन् बहुयजमानकेषूहितव्य इति । तत्र कृत्स्नस्य सूक्तवाकस्य प्रहरणे विनियुक्तत्वात् पूर्ववत् स्तुत्यर्थं सत् यजमानशब्दोऽसमवेतार्थवचनः सन्नोहितव्य इति प्राप्ते,

ब्रूमः। सकलस्य सूक्तवाकस्य प्रहरणकरणत्वसम्पादनार्थं अयं यजमान इत्यादेः फलप्रकाशकत्वाभ्युपगमात् फलप्रकाशनार्थं सत् यजमानशब्दः समवेतवचनः सन् बहुयजमानकेषु बहुवचनान्त ऊहितव्य इति ।

अत्रेदमवधेयम् - मन्त्राणां कर्मकरणत्वं द्वेधा सम्भवति कर्म प्रकाशनेन वा तत्सम्बन्धिफलादिप्रकाशनेन वा, कृत्स्नस्य सूक्त वाकस्य प्रहरणकरणत्वं च श्रुत्यावगतम्। तत्रायमित्याद्यवान्तर वाक्येन न प्रहरणं प्रकाश्यते । ततश्च श्रुतकरणत्वान्यथानुप पत्त्यायुरादिकं प्रहरणफलमिति कल्प्यते यत् प्रकाश्यकरणा स्यात् तत् फलं च यजमानस्यैवेति न यजमानग्रहणस्य पारार्थ्यमित्यूहः। पूर्वत्र तु पारार्थ्यात् यज्ञपतिशब्दस्य नोह इति वैषम्यमिति। प्रत्युदाहरणमात्रमिदं नाधिकरणान्तरमिति पक्षान्तरम् ॥

(टि) पारार्थ्यप्रत्युदाहरणमिदम्। कथं फलप्रकाशकार्थत्व ऊहसिद्धिरित्यत्राह अत्रेदमित्यादिना । न यजमानग्रहणस्य पारार्थ्यमिति । अत एव समवेतवचनमिति ध्येयम् । ऊह इति । प्रहरणयजमानफलप्रकाशनं ह्यस्य कार्यम् । सत्रेषु च यस्यैव यजमानस्य फलं नोच्यते तस्यैव न सूक्तवाकः करणं स्यात् । न च फलं प्राप्नुयात्, तस्मादूह इत्यभिप्रायः। पारार्थ्यादिति । इडास्तुत्यर्थत्वेन वा ये यज्ञपतिं वर्धान् ते मनुष्या अध्वर्यव इति मनुष्यविशेषणार्थत्वेन पारार्थ्यमिति द्रष्टव्यम् ॥

॥ सुब्रह्मण्याह्वाननिगदे हरिवच्छब्दस्यानुहप्रदर्शकं

सोमक्रयसाधनसाण्डे 'तस्मै शृतं इत्याद्यनुहप्रदर्शकं

इति वर्णकद्वयोपेतमधिकरणम् ॥

सू. असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥

(मू) ज्योतिष्टोमे सुब्रह्मण्यनिगद आम्नातः "इन्द्र आगच्छ हरिव आगच्छ मेधातिथे मेषवृषण श्वस्य मेने गौरावस्कन्दिन्नहल्यायै जारे"ति । सोऽग्निष्टुत्यतिदिष्टः। तत्र चाग्निष्टुति श्रूयते "आग्नेयी सुब्रह्मण्या भवति" इति। तेन वचनेन इन्द्रशब्दस्य स्थाने अग्ने आगच्छेत्यूहः क्रियते । एवं स्थिते संशयः - किं हरिवदादिशब्दाः समवेतवचना ऊहितव्याः उतासमवेतवचना नोहितव्या इति । तत्र "पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी" इत्यादिभिर्वचनैः हर्यादयो गुणा इन्द्रे सन्तीत्यवगमात् तद्वारा समवेतेन्द्रवचना ऊहितव्याः अग्न आगच्छ रोहितव आगच्छेतीति प्राप्ते,

ब्रूमः। पूर्वपक्षेत्यादिवाक्यानां स्तुतिपराणां इन्द्रस्य हर्यादिगुणसत्वे प्रमाणत्वाभावात् अविद्यमानैरेव गुणैरिन्द्रप्रकाशका हरीन्द्रादिशब्दा असमवेतवचना नोहितव्या इति ।

इदं त्ववधेयम् - प्रकृतावविद्यमानगुणद्वारा प्रकाशनात् शब्दनियमो न विवक्षित इति याज्ञिका ऊहं कुर्वन्ति "अग्न आगच्छ रोहिताभ्यां हरिताभ्यां बृहद्भानो धूमकेतो जातवेदो विचक्षणे" [ति] अथवा साद्यस्के आमनन्ति "साण्डः त्रिवत्सः सोमक्रयण" इति ज्योतिष्टोमे च एकहायन्या मन्त्र आम्नातः "इयं गौः सोमक्रयणी तया ते क्रीणामि तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्या आञ्जनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनमि"ति। स साद्यस्केऽतिदिष्टः। तत्र संशयः - गोशब्दस्य स्थाने ऊहं कृत्वा अवशिष्टानां शृतादिपदानां ऊहः उत सर्वेषामूह इति । तत्र शृतादिपदानां भाविशृतादिगुणद्वारा सोमक्रयणीप्रकाशकत्वात् समवेतवचनानामेषामूह इति प्राप्ते,

ब्रूमः। कर्माङ्गभूतायामेकहायन्यवस्थायां शृतादीनामभावाद-समवेतवचनानां शृतादिपदानामनूह इति । इदं त्ववधेयम् - एकहायन्यां भाविशृतादिमत्वमपि अनेकान्तिकंमरणसम्भवात् साण्डादपि या गोर्जनिष्यते तस्याः शृतादिकमपि भविष्यतीति भाविशृतादिमत्वमपि तुल्यमित्यनूह इति ॥ ज्योतिष्टोमे सन्ति सवनीयाः पशवः आग्नेयः पशुरग्निष्टोम आलभ्यते ऐन्द्राग्नः पशुरुक्थ्ये ऐन्द्रो वृष्णिः षोडशिनि सारस्वती मेष्यतिरात्र इति । आग्नेयमजमग्निमग्निष्टोम आलभते ऐन्द्राग्नमुक्थ्ये द्वितीयं ऐन्द्रं वृष्णिं षोडशिनं तृतीयं सारस्वतीं मेषीं चतुर्थीमतिरात्र इति वा।

(टि) अविद्यमानैरित्यादि हेतुविशेषणम् । अस्मिन्नधिकरणे द्वितीयं वर्णकमारचयति अथवेत्यादिना ॥

## ॥ सारस्वत्यां मेष्यामध्रिगुवचनानूहाधिकरणम् ॥

## सू. लिङ्गविशेषनिर्देशात् समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वात् ॥

(सू) अस्ति त्वग्नीषोमीयेऽध्रिगुप्रैषः। तत्र सर्वेषां सामानो विधिरिति कृत्वाचिन्तेयम् । तत्र संशयः - किमियमध्रीयप्रैषा मेष्यां भवति वा न वेति ।

प्रकरणविशेषाद् भवति प्रैष इति प्राप्ते,

ब्रूमः। "प्रास्मा अग्निमि"ति पुंलिङ्गनिर्देशात् स्त्रियां मेष्या प्रैषो न भवतीति। वस्तुतस्तु चोदकप्राप्तस्य प्रैषस्य मेष्यामूहेन प्रवृत्तिरिति ॥

(टि) ऊहप्रसङ्गादिदं समानासमानविध्यविचारप्रयोजनप्रदर्शनार्थमारभ्यते ॥

## ॥ यज्ञायज्ञीये गिराशब्दस्य स्थान इराशब्दस्यैव कर्तव्यताधिकरणम् ॥

सू. आमनातादन्यदधिकारे वचनाद्विकारः स्यात् ।

(मू) ज्योतिष्टोमे "यज्ञायज्ञियेन स्तुवीते"ति यज्ञायज्ञीयं प्रकृत्य श्रूयते "न गिरा गिरेति ब्रूयात् यद्गिरा गिरेति आत्मानं तदुद्गाता उद्गिरेत् ऐरं कृत्वोद्गेयमि"ति "यज्ञा यज्ञा वा अग्नये गिरा गिरा चक्षसे" इत्यस्यामृचि उत्पन्नं साम यज्ञायज्ञियमित्युच्यते । तत्र सामगा योनिगानमधीयानाः मगकारेण गायन्ति गायिरा गिरा इति। "ऐरं कृत्वे"ति ब्राह्मणवाक्येन तु गकारलोपपूर्वकं गानं विधीयते। इरापदसम्बन्धि ऐरमित्युच्यते । तथा च ओ यीरा इति गेयमित्यर्थः।

तत्र संशयः - किमिदं इरापदस्य गिरापदस्थानापत्तिः पाक्षिकी इरापदं गिरापदं वा प्रयोक्तव्यमिति विकल्पः उत नियतस्थानापत्तिः इरापदमेव प्रयोक्तव्यमिति । तत्र गिरेरापदयोः काल्पनिकत्वस्तोत्राङ्गत्वाविशेषात् विकल्प इति प्राप्ते,

ब्रूमः। प्रत्यक्षविहितस्येरापदस्य अम्नानमात्रगिरापदात् बलीयस्त्वात् इरापदमेव प्रयोक्तव्यमिति ।

अत्रेदमवधेयम् - ज्योतिष्टोमे द्वादशमग्निष्टोमाख्यं स्तोत्रं कर्म मध्ये स्तुतिः स्तोत्रमित्युच्यते। ज्योतिष्टोमप्रकरणे यज्ञायज्ञीयप्रगाधः पठचते । यज्ञायज्ञीयगानेन च अग्निष्टोमस्तोत्रं विधीयते । ज्योतिष्टोमप्रकरण एव "ऐरं कृत्वोद्गेय"मिति विधीयते। तथा च प्रगाथैवदेशभूतस्य गिरापदस्य प्रगाथैकवाक्यतया गानसम्बन्धः क्रमात् अग्निष्टोमक्रमपठितस्य प्रगाधावयवस्य गिरापदस्य क्रमादेव स्तोत्राङ्गत्वम् । इरापदस्य तु श्रुत्या

गानसम्बन्धः प्रकरणाच्च स्तोत्राङ्गत्वं, श्रुतिश्च वाक्याद्बलीयसी प्रकरणं च क्रमाद्बलीय इति इरापदेन गिरापदबाधः ॥ नच "यज्ञायज्ञियेन स्तुवीते"ति प्रत्यक्षवचनादृचोऽपि प्रत्यक्षमेव स्तोत्राङ्गत्वमिति भ्रमितव्यम् । गानस्यैवानेन स्तोत्राङ्गत्वविधानात् अन्यथानुपपत्त्यैव त्वृचां स्तोत्राङ्गात्वं यूपं विना गातुं न शक्यत इति ॥

(टि) इदानीं साम्नामूहं चिन्तयितुं तदुपोद्घातं दशभिः सप्तदशभिर्वाधि -करणैश्चिन्तयति। गीतानि ह्यक्षरान्तरेषु समाम्नातान्यक्षरान्तरेषु ऊह्यन्ते । तत्रेह गिरापदगीतेरिरापदे स्थानापत्त्या प्राप्तिं वक्तुं स्थानापत्तिमेव चिन्तयति - किं पाक्षिकी नियतेति काल्पनिकेति । अयमाशयः - "ऐरं कृत्वोद्गेयमि"ति वचनेन इरापदमात्रं विधीयते । न चोद्गानसम्बन्धः स्तोत्रसम्बन्धो वा । प्रकरणात्तु स्तोत्राङ्गता स्यात् स्तोत्राङ्गभूतस्य चेरापदस्य स्तोत्रसाधन-भूतयज्ञायज्ञियगानसम्बन्धः ततः प्राप्त एवोद्गेयमित्यनूद्यते । ततश्च काल्पनिकमेव स्तोत्राङ्गत्वमिरापदस्य । तच्च गानसम्बद्धस्य गिरापदस्याप्यस्तीति बलाबलमेव प्रतिपादयति अत्रेदमित्यादिना । प्रगाधावयवस्येति । यज्ञायज्ञियप्रगाधोऽग्निष्टोमस्तोत्रक्रमे पठ्यत इति प्रगाधस्य क्रमादग्निष्टोमस्तोत्राङ्गत्वमिति प्रगाधैदेशस्य गिरापदस्यापि क्रमात्तदङ्गत्वमिति भावः। यत्तूद्गानसम्बन्धो न विधीयत इति तत्राह - श्रुत्या गानसम्बन्ध इति । इरापदस्य हि प्रकरणसनाथया श्रुत्याग्निष्टोमस्तोत्रसाधनभूतोद्गानसम्बन्धित्वेन विधीयमानस्य श्रुत्यैव हि गानसम्बन्ध इत्यभिप्रायः। गातुं न शक्यत इति। किञ्च "यज्ञायज्ञियेन स्तुवीते"ति स्तुतिसाधनत्वेन हि साम विधीयते। एतदेव हि साम्नः स्तुतिसाधनत्वं यद्गुणाभिधान- पराणामृगक्षराणामभिव्यक्तिरिति ऋगक्षराभिव्यक्तिं विना न स्तुतिसाधन त्वमित्यन्यथानुपपत्त्या ऋचां स्तोत्राङ्गत्वमिति। अतो "यज्ञायज्ञियेन स्तुवीते"त्यस्यायमर्थः यज्ञायज्ञियाभिव्य-

तैर्ऋगक्षरैः स्तुवीतेति। ततश्च प्रगाधगतानां सर्वपदानां साधारण्येन विनियोगो न गिरापदस्य विशेषेण इरापदस्य तु साक्षादेव विशेषरूपेणेत्यतोऽपि तस्य बलवत्तेति बोध्यम् ॥

## ॥ इरापदस्य प्रगीतताधिकरणम् ॥

## सू. अप्रगाणाच्छब्दान्यत्वे तथाभूतोपदेशः स्यात् ॥

(मू) ज्योतिष्टोमे च "यज्ञायज्ञीयेन स्तुवीते"ति प्रकृत्येदमाम्नायते "नगिरा गिरेति ब्रूयात् यद्गिरा गिरेति इदानीं गिरापदगीतिरिरापदे स्याद्वा न वेति चिन्त्यते गिरा मित्यप्रगीतस्येति। अयमाशयः - ऐरमिति तद्धितः तार्थे विकारार्थे वा भवति । तत्राद्ये इरां कृत्वोद्गेयमित्येतावानर्थः स्यात् । अप्रगीतादिरापदाद्धयं तद्धितः। अन्यथा वृद्धं तालव्यं प्रथमस्वरमायी भवतीति इकारस्यायीभावे वृद्धाच्छ" इति छप्रत्यये सति आयीरियमिति स्यात्। ऐरमिति तु रूपमप्रगीतादेवेत्यप्रगीतस्यैवात्र विधानम्। अथ विकारार्थे तद्धितः तथापि प्रगाणं विनाप्यक्षरविकारसम्भवादप्रगीतस्य चेरापदस्य विधानादप्रगाणरूप एव विकारः प्राप्तस्तद्धितेनानूद्यत इति अप्रगीतमेव प्रयोक्तव्यमिति सत्यं न प्रगाणं विधीयते तथापि स्थानापत्त्या प्रागाणप्राप्तिरित्याशयेनाह - गिरापदस्थान इति। प्रसङ्गादाह एव मित्यादिना ॥

## ॥ इति केरलीये षोडशाध्यायीटिप्पणे ॥

## ॥ नवमाध्यायस्य प्रथमः पादः ॥

ब्रूयात् आत्मानं तत् उद्गातोद्गिरेत् ऐत तत्र ज्योतिष्टोमे गिरापदस्य. स्थाने इराप स्थितम् । तत्र संशयः - किमिदमिरापदमप्रगी उत प्रगीतमिति । तत्र ऐरमित्यप्रगीतस्य विप्रयोक्तव्यमिति प्राप्ते,

ब्रूमः। गिरापदस्थाने विहितस्येरापदस्य गिर प्राप्तेः प्रगीतमेवेरापदं प्रयोक्तव्यमिति । एवंविधा प्राप्तिस्थानापत्त्या प्राप्तिरित्युच्यते।

इदं त्ववधेयम् - यो गिरापदगतो गीत्यंशः स देशात् गिरापदे स्वगेयभूते निवृत्ते गेयमपेक्षते। गानसाध्यस्तोत्राङ्गभूतं गानसंस्कारमलभमानं स्तोत्रसाधनीभवितुमशक्नुवन् संस्कारकं सामांशमपेक्षत इति सम्बन्धं लभेत । एवंविधः सम्बन्धो नष्टाश्वदग्धरथवत्सम्बन्ध इत्युच्यत इति ॥

॥ इति नवमाध्यायस्य प्रथमः पादः ॥

*Printed by :* 854 56 70

**Royapettah Stationery and Printing and Allied Products Producers Industrial Co-op. Society Ltd.,**
26, Koya Arunagiri First Street, Royapettah, Chennai - 14.